Arya Samaj Foundation Chennai

A DESCRIPTIVE CATALOGUE OF SANSKRIT MANUSCRIPTS

R
016.4912
T17D

Domain. Gurukul Kangri Collection

Digitized by Arya Samaj Foundation Chennai and eGangotri

Calcutta Sanskrit College Research Series No. LXVI

A DESCRIPTIVE CATALOGUE

OF

SANSKRIT MANUSCRIPTS IN THE COLLECTIONS

OF

THE SANSKRIT COLLEGE

VOLUME ONE

PART III

By

JAGADISH CHANDRA TARKATIRTHA

AND

ANANTA DEV TARKATIRTHA

016.4912
T17 D

4912
7D

SANSKRIT COLLEGE

CALCUTTA

1969

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुकुल कांगड़ी विश्वविद्यालय, हरिद्वार
पुस्तकालय

विषय संख्या 016.4912
पुस्तक संख्या T17D
आगत पंजिका संख्या

पुस्तक पर किसी प्रकार का निशान लगाना वर्जित है। कृपया १५ दिन से अधिक समय तक पुस्तक अपने पास न रखें। D1110

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

R
016.4912
पुस्तकालय T17D

गुरुकुल कांगड़ी विश्वविद्यालय, हरिद्वार

पुस्तक-वितरण की तिथि नीचे अंकित है। इस तिथि सहित १५वें दिन तक यह पुस्तक पुस्तकालय में वापिस आ जानी चाहिए। अन्यथा ५ पैसे प्रतिदिन के हिसाब से विलम्ब-दण्ड लगेगा। D 1110

Stock Verification-2024

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Calcutta Sanskrit College Research Series No. LXVII

Published under the auspices of the
Government of West Bengal

STUDIES NO. 44

Presented by the Ministry
of Education and Social Welfare,
Government of India.

A DESCRIPTIVE CATALOGUE OF SANSKRIT MANUSCRIPTS IN THE COLLECTIONS OF THE SANSKRIT COLLEGE

VOLUME ONE

PART III

SANSKRIT COLLEGE
CALCUTTA
1969

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Calcutta Sansksit College Research Series No. LXVII

Board of Editors:

Dr. Radhagovinda Basak, M.A., Ph.D.,
Vidyāvacaspati, Chairman

Dr. Suniti Kumar Chatterji, M.A., D.Litt. (London)

Professor Kali Kumar Dutta Sastri M.A., D. Phil.,
Kāvya-Sāṅkyatīrtha

Dr. Tara Sankar Bhaṭṭacharya, M.A., D.Litt.
Secretary and General Editor

Pandit Nani Gopal Tarkatīrtha, *Editor*

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

1110

Calcutta Sanskrit College Research Series No. LXVII

R016.4912, T17D
D1110

A DESCRIPTIVE CATALOGUE

OF

SANSKRIT MANUSCRIPTS IN THE COLLECTIONS

OF

THE SANSKRIT COLLEGE

VOLUME ONE

PART III

By

JAGADISH CHANDRA TARKATĪRTHA

AND

ANANTA DEV TARKATĪRTHA

SANSKRIT COLLEGE

CALCUTTA

1969

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Published by:
The Principal, Sanskrit College,
1, Bankim Cheatterjee Street,
Calcutta-12.

016.4912
T 17 D

Price : **Rupees Ten only**

Printed by:
The Calcutta Oriental Press Private Ltd.,
9, Panchanan Ghosh Lane, Calcutta-9.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कलिकातासंस्कृतमहाविद्यालयगवेषणाग्रन्थमाला—ग्रन्थाङ्कः ६३

कलिकातासंस्कृतमहाविद्यालयसंगृहीत-

हस्तलेखसंस्कृतग्रन्थविवरणे

[न्यायशास्त्रविषयकप्रथमखण्डस्य]

तृतीयो भागः

श्रीजगदीशचन्द्रतर्कतीर्थेन

श्रीअनन्तदेवतर्कतीर्थेन च

सम्पादितः

१८६०तमे शकवत्सरे कलिकातानगर्यां प्रकाशितः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

FOREWORD

I feel very happy to present the third part of the first volume of the Descriptive Catalogue of Sanskrit Manuscripts preserved in the College Library. Our work is continuing uninteruptedly and we expect to bring out our next volume in about a year's time.

SANSKRIT COLLEGE,
CALCUTTA
27. 2. 69.

TARASANKAR BHATTACHARYA
Principal

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हस्तलेखसंस्कृतग्रन्थविवरणे

तृतीयो भागः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

1721 अतएवचतुष्टय-जागदीशी ।

Ataevacatuṣṭaya-jāgadīśī.

By Jagadīśa Tarkālāṁkāra.

Substance: Country-made reddish and yellow paper. Size 18 × 4 inches. Folia 6 (1a-6b). Neatly written in Bengali character. 8 lines in a page. Extent about 160 ślokas. Appearance old. Prose. Generally correct. Complete. Condition : good.

There is a square blank space in the middle of each page. Date n. d. Published.

Beginning : [१(क) पृः ५पः) सर्वत्र साक्षादुपाधेरवच्छेदकत्वासम्भवादाह विशेषणेति ।

End : साध्यव्यापकतामात्रमिति । साधनाव्यापकत्वस्य व्यभिचारिहेतौ स्वनिष्ठ-व्याप्तिसंक्रामकत्वरूपयोगार्थबलादेव प्राप्तेरिति भावः ।

विवरणम् : अनुमानचिन्तामण्यन्तःपात्यतएवचतुष्टयीयदीधितेष्टीकापरोनिबन्धोऽयं व्यरचि तर्कालङ्कारोपाधिकेन श्रीमता जगदीशेन । विशेषव्याप्तिनिरूपणानन्तरं तत्रैव-"वह्निसामानाधिकरण्यं हि धूमे धूमत्वेनावच्छिद्यते सोपाधौ तूपाधिना" इत्युक्तम् । तत्र सोपाधौ साधनतावच्छेदकं न साध्यसम्बन्धितावच्छेदकमित्यत्र "अतएव" "अतएव" इति कृत्वा प्राभाकरसम्मतानि त्रीण्युपाधिलक्षणानि मूले उपन्यस्य आचार्यसम्मतमेकमुपाधिलक्षण-मुपन्यस्तं मणिकृता । तेषामेव दीधितिमधिकृत्य सुविशदं समालोचनं कृतमत्र निबन्धकारेण । निबन्धोऽयं नूनमुपाधिविषयकव्युत्पत्त्याधायकः । प्रथमपत्रस्य कपृष्ठायां प्रकृतनिबन्धस्या-रम्भणात् पूर्वं विशेषव्याप्तेर्जागदीश्याः टीकाया अन्तिमांशमात्रमास्ते । तत्र विशेषव्याप्ते-र्जागदीश्याः टीकायाः पुष्पिका न वर्तते—अतएवचतुष्टयस्य विशेषव्याप्त्यन्तर्गतत्वेन केषु-चिदादर्शपुस्तकेषु पृथङ्निर्देशेऽपि अत्र पृथङ्निर्देशाभावात् । अयं प्राचीनः । प्रकाशन-मस्य वारमेकमजनिष्ट एशियाटिक्सोसाइटि समाख्यभवनात् ।

This is a commentary by Jagadīśa on the Dīdhiti of At-aeva-catuṣṭaya of Gaṅgeśa. Gaṅgeśa's work includes the three definitions

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

of upādhi as propounded by Prabhākara as also the one put forward by Udayana.

Ataeva is not a separate work. It is just a part of Viśeṣavyāpti, hence these is no colophon indicating the end of Ataeva.

602

1067 १। अतएवचतुष्टयमाथुरी टीका।

Ataevacatuṣṭayamāthurī ṭīkā.

२। व्याप्तिग्रहोपायमाथुरी टीका।

Vyāptigrahopāyamāthurī ṭīkā.

By Mathurānātha Tarkavāgīśa.

Substance: Country-made red and yellow paper. Size : $17\frac{1}{2} \times 4$ inches. Folia 7 (by counting) Written in Bengali character. 7-9 lines in a page, Extent about 268 ślokas. Appearance old and worn out. Prose. Generally correct. Incomplete at the end Condition : bad.

There is a square blank space in the middle of each page. Date n. d. Published.

(1) Beginning : सोपाधौ साधनतावच्छेदकं न साध्यसम्बन्धितावच्छेकमित्यत्र प्राभाकरसम्मतिमाह अतएवेति

(1) End : न च अव्यभिचारित्वेन साध्यव्यभिचारानुमापकत्वमेव तथास्तु अ-प्रयोजकादिस्तु न तथेति वाच्यं योगार्थापेक्षया एव तस्य गुरुत्वादितिदिक् ॥

Colophon : इति व्याप्तिवादरहस्यं समाप्तं ॥

(2) Beginning of the Vyāptigrahopāya : ॐ नमोगणेशाय। व्याप्तिस्वरूपं निरूप्य परमतनिराकरणपूर्वकं स्वमतेन तद्-ग्रहोपायमभिधातुं प्रथमं प्राभाकरमतमुपदर्शयति सेयमित्यादिना मैवमित्यन्तेन।

(2) End of the Vyāptigrahopāya : केवलाधिकरणमिति तच्च साधनं धूमादिरिवेतिभावः नन्वेवं प्रतियोगिकालेपि तदधिकरणमस्त्येव कथं वा अधिकरणाभावे वयोराधा(?) [४(ख)पृः]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विवरणम् : अनुमानचिन्तामणयन्तर्गतव्याप्तिवादीयातएवचतुष्टयनामकग्रन्थस्य टीका-परोऽयं निबन्धः। सोपाधौ साधनतावच्छेदकं न साध्यसम्बन्धितावच्छेदकमित्युक्तं पूर्ववर्ति-विशेषव्याप्तिग्रन्थे। अत्र प्राभाकरादिसम्मतस्य अतएव साधनतावच्छेदकभिन्नेन येन साधनताभिमते साध्यसम्बन्धोऽवच्छिद्यते स एव तत्र साधने विशेषणमुपाधि-रित्यादिकल्पचतुष्टयात्मकस्योपाधिनिर्वचनपरस्य मूलग्रन्थस्याभिनवोहापोहप्रदर्शनमुखेनातिदीर्घं व्याख्यानं वर्तते। भावगम्भीरस्यास्य मूलस्योपलभ्यमानं व्याख्यानमिदमार्जवपूर्णं विविध-विचारसंम्वलितञ्च। अतएव चतुष्टयाभिधस्य ग्रन्थस्य व्याख्यानं तावदत्र सम्पूर्णमेवावतिष्ठते, व्याप्तिग्रहोपायनामकग्रन्थस्य व्याख्यानन्त्वसम्पूर्णं वर्तते। प्राचीनोऽयं जीर्णतामुपागतः। एशियाटिक्सोसाइटिभवनतोऽस्य प्रकाशनं सकृदेव जातम्।

603

1740 अनुपसंहारि-गादाधरी।

Anupasaṁhārī-gādādharī.

By Gadādhara Bhaṭṭācārya.

Substance : Country-made white, red and yellow paper. Size $17 \times 3\frac{1}{2}$ inches. Folia 12 (1a-12b). Neatly written in Bengali character. 6-8 lines in a page. Extent about 560 ślokas. Appearance old. Prose. Generally correct. Complete. Condition good. Printed. There is a square blank space in the middle of each page. Date 1789 śaka.

Beginning : ॐ सर्वमभिधेयं घटत्वादित्यादेः केवलान्वयिसाध्यकस्यापि न निर्दोषत्व-रूपं सद्धेतुत्वं सर्वमनित्यं घटत्वादित्यादेर्व्यतिरेकिसाध्यकस्यापि न साधारणत्वमतोहेतुविशेष-परतया सद्धेतुत्वात् साधारणत्वादितिमूलं सङ्गमयति सद्धेतुत्वमिति।

End : न चैवमपि केवलान्वयिसाध्यकहेतोराभासतया तत्प्रयोक्तुर्निग्रहप्रसङ्ग इति वाच्यं अभिमतसाधकताविघटकाभासस्यैव निग्रहप्रयोजकतया अनुमि···(?) मुद्रय गमकता यत्राभिमता तत्र निग्रहायोगात् व्यतिरेकिप्रयोगे निग्रहस्यादोषत्वादिति॥

Colophon : इत्यनुपसंहारिटिप्पनी समाप्ता॥ समाप्तश्चायं सव्यभिचारग्रन्थः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Post colophon : शुभमस्तु मयि लेखके ॥ शकनरपतेरतीताब्दाः १७८६ । जयति हरोरसि काली ॥

विवरणम् : ग्रन्थोऽयं प्राचीनो मूषिकदष्टश्च । प्रतिपत्रं प्रान्तभागाः सलिलसमासङ्गज-चिह्नसम्पृक्ताः ।

604

1704 अनुमानचिन्तामणिः ।

Anumānacintāmaṇiḥ.

By Gaṅgeśopādhyāya.

Substance: Country-made white, red and yellow paper. Size 18 × 3 inches. Folia 4 (1a-4b). Neatly written in Bengali character. 4 lines in a page. Extent about 67 ślokas. Appearance old and worm-eaten. Prose. Generally correct. Incomplete at the end. Condition good.

There is a square blank space in the middle of each page. Date n. d. Published.

Beginning : [१(क) पृः] ॐ नमोगणेशाय । प्रत्यक्षोपजीवकत्वात् प्रत्यक्षानन्तरं बहुवादिसम्मतत्वादुपमानात् प्रागनुमानं निरूप्यते ।

End : न च सामान्यतोव्याप्त्यवगमोऽस्त्येव परस्य कथमन्यथा दूषणेनासाधकतां साधयेदिति वाच्यं स्वार्थानुमानोपयोगिव्याप्तिस्वरूपनिरूपणं विना कथायामप्रवेशात् ॥

Post colophon : श्रीरामः ॥ नमः सरस्वत्यै ॥

विवरणम् : अनुमानचिन्तामणिनामधेयोऽयं ग्रन्थः । अत्रानुमितेः प्रथमत आरभ्य पूर्वपक्षपर्यन्तश्चिन्तामणिग्रन्थो वर्तते । रचयिताऽस्य गङ्गेशोपाध्यायः । ग्रन्थोऽयं प्राचीनता-मुपागतः । एतदीय द्वितीयपत्रस्य दक्षिणप्रान्तभागे कीटदंशनजचिह्नं व्यक्तमुपलभ्यते । प्रकाशनमस्य भूरिशो जातम् ।

This ms. contains from the Anumiti up to Pūrvapakṣa. There is no colophon in the ms.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

605

1722 अनुमानचिन्तामणिः ।

Anumānacintāmaṇiḥ.

By Gaṅgeśopādhyāya.

Substance: Country-made white, red and yellow paper. Size $14\frac{1}{4} \times 2\frac{3}{4}$ inches. Folia 5 (1b-5b). Neatly written in Bengali character. 5-6 lines in a page. Extent about 85 ślokas. Appearance old, worm eaten and worn out. Prose. Generally correct. Incomplete at the end. Condition good.

There is a square blank space in the middle of each page. Date n. d. Published.

Beginning : [१ (क) पृः] ॐ महागणेशाय नमः। प्रत्यक्षोपजीवकत्वात् प्रत्यक्षान्तरं वहुवादिसम्मतत्वादुपमानात् प्रागनुमानं निरूप्यते।

End : अन्यवृत्तिवह्नितद्वतोः अन्यवृत्तिधूमवन्निष्ठात्यन्ताभावान्योन्याभावप्रतियोगित्वात् व्यधिकरणवह्निधूमयोर्ना(?) व्याप्तिः किन्तु तत्तद्धूमस्य सामाना··· [५(ख) पृः]

विवरणम् : अनुमानचिन्तामणेः प्रथमत आरभ्य विशेषव्याप्तेः कियदंशपर्यन्तो ग्रन्थोऽत्र वर्तते। अन्तिमपत्रस्य तत्पूर्ववर्तिपत्रेण सार्धं काऽपि सङ्गतिर्नोपलभ्यते। अयं प्राचीनतां जीर्णताञ्च समुपागतः। प्रतिपत्रमेव कीटदंशनजचिह्नानि व्यक्तमुपलभ्यन्ते। पत्राणां प्रान्तभागाः सलिलसम्पर्कजचिह्नसम्पृक्ताः। मुद्रणमस्य वहुशः समजनिष्ट।

This ms. contains from Anumiti up to the beginning of Viśeṣavyāpti.

606

1738 अनुमानचिन्तामणिः ।

Anumānacintāmaṇiḥ.

By Gaṅgeśopādhyāya.

Substance: Country-made white, red and yellow paper. Size $15 \times 2\frac{3}{4}$ inches. Folia 12 (By counting). Neatly written in Bengali character 5-6 lines in a page. Extent about 288 ślokas.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Appearance old. Prose. Generally correct. Incomplete at the beginning, in the middle and at the end. Condition good. Printed.

There is a square blank space in the middle of each page. Date n. d.

Beginning : [१५(क) पृः] प्रतियोगित्वञ्च तदधिकरणानधिकरणत्वमिति वदन्ति ।

End : किञ्च लिङ्गं नानुमितिहेतुः लिङ्गं विनापि धूलीपटलाल्लिङ्गभ्रमेणानुमित्युत्पत्तेः । नापि लिङ्गं प्रमानुमितौ परामर्शोऽनुमितिमात्रे हेतुः तद्विशेषप्रमात्वाभ्यामेवानुमिति तथात्वात् [३० (ख) पृः]

विवरणम् : गङ्गेशोपाध्यायप्रणीतोऽयं ग्रन्थः । अत्रानुमानचिन्तामणेः कियदंशमात्रमवतिष्ठते । पत्राण्यस्य व्युत्क्रमेण वर्तन्ते । प्राचीनतामुपागतोऽयम् । प्रकाशनमस्यानेकशः समजनि ।

607

1754 अनुमानचिन्तामणिः ।

Anumānacintāmaṇiḥ.

By Gaṅgeśopādhyāya.

Substance: Country-made yellow paper. Size 15×2½ inches. Folia 51. (By counting). Neatly written in Bengali character. 5 lines in a page. Extent about 1,428 ślokas. Appearance torn, old and worn out. Prose. Generally correct. Incomplete towards the beginning and at the end. Condition very bad. Printed. Date n. d.

Beginning : भाववदवृत्तित्वं साध्यवत्प्रतियोगिकान्योन्याभावासामानाधिकरण्यः

End : उच्यते, साध्यविरोध्युपस्थापनसमर्थसमानवलोपस्थित्या प्रतिरूद्धकार्य्यलिङ्गत्वं तत्त्वं वलञ्च व्याप्तिपक्षधर्मते, वि......

विवरणम् : श्रीमद्गङ्गेशोपाध्यायविरचिततत्त्वचिन्तामण्यन्तर्गतानुमानचिन्तामणिनामधेयोऽयं ग्रन्थः । प्रारम्भसमाप्तिरहितेऽत्र ग्रन्थे व्याप्तिपञ्चकादारभ्य सत्प्रतिपक्षीय-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सिद्धान्तलक्षणपर्यन्तो ग्रन्थोवर्तते। जीर्णतां छिन्नतां पराचीनताञ्च समुपागतोऽयम्। पत्राणि प्रायः सर्वाण्येव सलिलसंश्लेषजचिह्नान्वितत्वादपाठ्यतामुपागतानि। पत्राङ्करहितानि विषमाणि च पत्राण्यत्रावतिष्ठन्ते। प्रकाशनमस्यानेकशः समजनि।

The ms. wants beginning and the end. It begins from the Vyāptipañcaka upto the first portion of satpratipakṣa.

608

403 अनुमानदीधितिः।

Anumānadīdhitiḥ.

By Raghunātha Śiromaṇi.

Substance:. machine-made yellow and reddish paper. Size $13\frac{1}{2} \times 2\frac{1}{2}$ inches. Folia 124 (By counting). 5 lines on a page. Extent about 2,255 ślokas. Character Bengali. Appearance very old, torn and worn out. Prose. Generally correct. Incomplete at the beginning and at the end. Date n. d. Printed.

A commentary on the Cintāmaṇi of Gaṅgeśa entitled Dīdhiti by Raghunātha Śiromaṇi.

Beginning: ॐ नमो दुर्गायै। समारब्धानुमानप्रामाण्यपरीक्षाकारणीभूतव्याप्तिग्रहोपायप्रतिपादननिदानं व्याप्तिस्वरूपनिरूपणमारभते नन्वित्यादिना।

End: व्याप्तिपक्षधर्मताविरहस्य साध्यत्वे पक्षतावच्छेदकत्वे वा तत्सम्भवात् पक्षः साध्याभावव्याप्यवान् साध्यं पक्षवृत्तित्वाभावव्याप्यवदिति पक्षस्य व्यापकभेदेन अन्वयव्यतिरेकभेदेन च व्याप्तेर्भिन्नत्वात् एकोपादाने अन्यासंग्रहोवलस्याविवक्षितत्वात्। साध्यधीविरोध्यनुमिति जनकज्ञानविषयत्वेन तदुपादाय [१३६ (ख) पृः]

विवरणम्: द्वितीयचिन्तामण्यन्तर्गतव्याप्तिपञ्चकव्याख्यानादि-तदीयसत्प्रतिपक्ष-सिद्धान्तलक्षणव्याख्यानप्रारम्भमात्रावसानपरोऽयं ग्रन्थः। विपश्चित्समाजेऽयं नाम अनुमानदीधितिनाम्ना प्रसिद्धः। रचयिताऽस्य तार्किकशिरोमणीरघुनाथः। प्राचीनत्वादयं जीर्णत्वं छिन्नत्वञ्च समुपागतः। अन्तराऽन्तराऽस्य वर्तन्ते विच्छेदाः। व्यक्तिद्वयेनैतदीया प्रतिलिपिर्विनिर्मिता। मुद्रितोऽयमनेकत्र।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

This ms. contains from Vyāptipañcaka up to the beginning of Satpratipakṣasiddhāntalakṣaṇa.

609

1703 अनुमानदीधितिः ।

Anumānadīdhitiḥ.

By Raghunātha Śiromaṇi.

Substance: Country-made yellow paper. Size $13\frac{3}{4} \times 2\frac{3}{4}$ inches. Folia 126 (9a-134b). Neatly written in Bengali character. 5 lines in a page. Extent about 2,520 ślokas. Appearance old, torn and worn out. Prose. Generally correct. Incomplete towards the beginning and at the end. Condition good.

There is a square blank space in the middle of each page. Date n. d. Published.

A commentary on the Cintāmaṇi of Gaṅgeśa entitled Dīdhiti by Raghunātha Śiromaṇi.

Beginning : [६(क) पृः] समारब्धानुमानप्रामाण्यपरीक्षाकारणीभूतव्याप्तिग्रहो·· पायप्रतिपादननिदानं व्याप्तिस्वरूपनिरूपणमारभते नन्वित्यादिना ।

End : इदं पुनरवधेयं कथितरूपाणि किं स्वरूपतोऽज्ञातान्येव सामानाधिकरण्यग्रह-विरोधीति असामाधिकरण्यव्याप्यत्वेन नाना···व्याप···[१३४(ख) पृः]

विवरणम् : अनुमानचिन्तामणेर्दीधित्यभिधव्याख्यानात्मकोऽयं ग्रन्थः । अस्य खलु रचयिता तार्किकशिरोमणी रघुनाथः । अत्र व्याप्तिपञ्चकादारभ्य विरुद्धस्य कियदंशपर्यन्तस्य चिन्तामणिग्रन्थस्य दीधित्यभिधं व्याख्यानं वर्तते । प्राचीनतां छिन्नतां जीर्णताञ्च समुपागतोऽयम् । प्रायः प्रतिपत्रं प्रान्तभागाः सलिलसम्पर्कचिह्नसम्पृक्ताः । प्रकाशनमस्यानेकशः समजनिष्ट ।

The ms. wants beginning and the end. It begins from the Vyāptipañcaka up to a portion of Viruddha.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

D 1110

610

1741 अनुमान-माथुरी ।

Anumānamāthurī.

By Mathurānātha Tarkavāgīśa.

Substance: Country-made yellow paper. Size 19×4 inches. Folia 45 (87a-131b). Neatly written in Bengali character. 7-10 lines in a page. Extent about 2,596 ślokas. Appearance old. Prose. Generally correct. Incomplete towords the beginning and at the end. Condition good. Printed.

There is a square blank space in the middle of each page. Date n d.

A commentary on the Cintāmaṇi of Gaṅgeśa by Mathurānātha Tarkavāgīśa.

Beginning : अनुमितिरूपैककार्य्यानुकूलत्वसङ्गत्या पक्षतानिरूपणानन्तरमनुमितिहेतुत्वेन परामर्शं निरूपयति पक्षधर्मस्येति ।

End : अर्थापत्तिः अर्थापत्तिशब्दवाच्यं ज्ञानं ॥

Colophon : इति श्रीमथुरानाथतर्कवागीशभट्टाचार्य्यकृतेऽनुमानपरिच्छेदेऽर्थापत्तिरहस्यं ॥

विवरणम् : अनुमानचिन्तामण्यन्तःपातिनः परामर्शाद्यर्थापत्तिपर्यन्तग्रन्थस्य टीकापरोऽयं ग्रन्थः । रचयिताऽस्य तर्कवागीशोपनामकः श्रीमान् मथुरानाथः । प्राचीनतामुपागतोऽयम् । व्यक्तिद्वितयेनास्य लिपिर्विनिर्मिता । प्रायः प्रतिपत्रमेव मसीलोपोपक्रमः संवृत्तः । कतिपयपत्राणां पार्श्वभागाः सलिलसम्पर्कजचिह्नसम्पृक्ताः । प्रकाशनमस्य वारमेकं जातम् ।

The Ms. wants beginning and the end. It begins from the Parāmarśa up to Arthāpatti. The Ms. is written by two scribes.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

611

1742 अनुमानमाथुरी ।

Anumāna-māthurī.

By Mathurānātha Tarkavāgīśa.

Substance: Country-made yellow paper. Size 17×4 inches. Folia 21 (3a-23a). Neatly written in Bengali character. 6-10 lines in a page. Extent about 1050 ślokas. Appearance old. Prose. Generally correct. Incomplete towards the beginning and at the end. Condition good. Printed.

There is a square blank space in the middle of each page. Date n d.

A commentary on the cintāmaṇi of Gangeśa by Mathurānātha Tarkavāgiśa.

Beginning: [३(क) पृः]...प्योधूम इत्यादिकेवलव्याप्तिप्रकारकज्ञानजन्ये वह्निव्याप्यधूमवान् पर्वत इत्यादिज्ञाने इति व्याप्तिवारणाय पक्ष घर्मतेति ।

End: तथाच न केवलमिह परप्रश्नसमाधित्सया व्याप्तिनिरूरणं अपि तु शिष्याणां व्याप्तिस्वरूपज्ञानं विना कथायां प्रवेशो न सम्भवतीति एतदर्थमपीतिभावः ।

Colophon: व्याप्तिपूर्वपक्षरहस्यं ॥

विवरणम्: अनुमित्यादि-पूर्वपक्षान्तस्य चिन्तामणिग्रन्थस्य व्याख्यापरोऽयं ग्रन्थः । अस्य खलु रचयिता श्रीमथुरानाथतर्कवागीशः । अस्य प्रारम्भो न वर्तते । प्राचीनतामुपागतोऽयम् । प्रायः प्रतिपत्रमेव मसीलेपोपक्रमः संवृत्तः । व्यक्तिद्वितयेनास्य लिपिर्विनिर्मिता प्रकाशनमस्य वारमेकमजनिष्ट ।

This Ms contains from the Anumiti (Incomplete at the end) up to Pūrvapakṣa.

612

1743 अनुमान-माथुरी ।

Anumāna-māthurī.

By Mathurānātha Tarkavāgīśa.

Substance: Country-made yellow paper. Size 19×4 inches.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Folia 28 (By counting). Neatly written in Bengali character. 7-11 lines in a page. Extent about 1,592 ślokas. Appearance old. Prose. Generally correct. Incomplete at the end. Condition: torn and worn out, Printed.

There is a square blank space in the middle of each page, Date n. d.

Beginning: ओं नमः शिवाय। व्याप्तिस्वरूपं निरूप्य परमतनिराकरणपूर्वकं स्वमतेन तदग्रहोपायमभिधातु' प्रथमं प्राभाकरमतमुपदर्शयति सेयमित्यादिना मैवमित्यन्तेन।

End: न च तथापि लाघवादिच्छादिसाधारणसामान्यप्रकारकमेव प्रत्यासत्तिरस्तु कि' ज्ञानत्वान्तर्भावेनेति वाच्यं। घटत्वादिनिर्विकल्पकात्मकस्य घटत्वादिविशेष्यकज्ञानस्य सत्त्वे घटत्वादिप्रकारकेच्छादितोघटत्वा...

विवरणम्: व्याप्तिग्रहोपायाद्युपाधिपर्यन्तस्य चिन्तामणिग्रन्थस्य व्याख्यानात्मकोऽयं ग्रन्थः। रचयिताऽस्य तर्कवागीशोपनामकः श्रीमान् मथुरानाथः। अत्र व्याप्तिग्रहोपाय-तर्क-सामान्यलक्षणामूलानां माथुरीटीका सम्पूर्णा एव वर्तते। उपाधिमूलस्य तु प्रथमतः कियदंशस्य माथुरी विद्यते। कतिपयपत्राणां पार्श्वभागेषु क्षुद्राः टिप्पन्य आसते। प्राचीनतां छिन्नतां जीर्णताञ्च समुपागतोऽयम् व्यक्तिद्वयेनास्य लिपी रचिता। प्रतिपत्रमेव-मसीलोपात् प्रायेणैवापाठ्यतामुपागतम्। मुद्रणमस्य वारमेकं जातम् एशियाटिक सोसाइटिसमाख्यभवनतः।

The codex contains Mathurānātha's commentaries on Gongeśopādhyāya's Tattacintāmaṇi on Vyāptigrahopāya, Tarka and Sāmānya-lakṣaṇā. There are some occasional nots in the margin. The Ms. is written by two scribes. The Ms. is almost illegible on account of the faiding away of the ink used,

613

70 अनुमान-माथुरी टीका।

Anumāna-māthurī ṭīkā.

By Mathurānāthā Tarkavāgiśa.

Substance: Country-made yellow and reddish paper. Size $19 \times 3\frac{1}{2}$ inches. Folia 28 (By counting). 7-8 lines in a page. There

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

is a square blank space in the middle of each page. Extent about 1,176 ślokas. Character Bengali Appearance very old, torn and worn out. Prose. Generally correct. Incomplete at the end. Date n. d.. Printed.

Beginnlng : ॐ नमो गणेशाय। न्यायाम्बुधिकृतसेतुं हेतु श्रीराममखिल-सम्पत्तेः। तातं त्रिभुवनगीतं तर्कालङ्कारमादरान्नत्वा। श्रीमता मथुरानाथतर्कवागीश-धीमता। विषदीकृत्य दर्श्यन्ते द्वितीयमणिफक्किकाः॥ आन्विक्षिकीपरिडतमरडलीषु सत्तारडवैरध्ययनं विनापि। सदुक्तमेतत् परिचिन्त्यधीरा निःशङ्कमध्यापनमातनुध्वं॥ यद्यपीदं बहुषु बहुभिर्बहुधाचरितं ज्ञायते च कैश्चित् सामान्यतो हेत्वाभासान्तं तथापि तन्नानास्थान-विततशेषाप्रकाशकं बहुतरकुतर्कसम्वलितमसाम्प्रदायिकञ्चातोव्यामोहायैव केवलं सर्वेषां भवतीति सर्वानुजिघृक्षता सत्तर्कमामूलध्याख्यानाय वैशद्याय च समात्र निर्वन्धः।

End : इत्थञ्च प्रतियोग्यनधिकरणं यद्धेतुतावच्छेदकसम्बन्धेन हेतुतावच्छेदकविशिष्ट-हेत्वधिकरणं तत्र येन केनचित् सम्बन्धेन वर्त्तमानोयोऽभाव इत्यन्ताभावान्तार्थ इति निष्कर्षः प्रतियोग्यनधिकरणहेत्वधिकरणस्यैव प्रतियोग्यनधिकरणवृत्तित्वविशिष्टहेत्वधिकरण……

विवरणम् : अनुमित्यादिसिद्धान्तलक्षण-व्याख्यानावसानोऽयं निबन्धः। अत्र सिद्धान्तलक्षणव्याख्यानस्य प्रारम्भमात्रमेवावतिष्ठते। व्यक्तिद्वयेनास्य प्रतिलिपिर्विनिर्मिता। प्रायः प्रतिपत्रमेव मसीलोपोपक्रमः संवृत्तः। अत्रत्याः केचन पत्रपार्श्वभागाः टिप्पन्यन्विताः सन्तिष्ठन्ते। अत्यन्तपराचीनत्वादयं जीर्णत्वं छिन्नत्वञ्च समुपागतः। एतदीयपत्रपार्श्वदेशेषु सलिलसमाश्लेषजचिह्नानि परिदृश्यन्ते। मुद्रणमस्य सकृदेव समजनि कलिकातास्थ एशियाटिक् सोसाइटि समाख्यभवनतः।

This Ms. contains from Anumiti up to siddhāntalakṣaṇa. There are some occasional nots in the margin. The Ms. is written by the two scribes. The Ms. is almost illegible on account of the faiding away of the ink used.

614

431 अनुमितिगादाधरी टीका।

Anumiti Gādādharī ṭikā.

By Gadādhara Bhattāchārya.

Substance : Country-made yellow paper. Size $18\frac{1}{2} \times 33\frac{1}{2}$ inches.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Folia 43 (By counting). 6-7 lines in a page. Extent about 2,394 ślokas. Character Bengali. Appearance old, torn and worn out. Prose. Generally correct. Incomplete at the beginning. Date S.K 1788. Printed. There is a square blank space in the middle of each page.

A commentary on the Cintāmaṇḍīdhīti of Raghunatha by Gadādhara Bhaṭṭācārya.

Beginning : [३(क) पृः] ···न्थ ज्ञानाधीनप्रत्यक्षादिचतुष्टयधर्मिकप्रमाणेतर-भेदपरिच्छेदरूपफलविशेषेच्छावतोऽधीतप्रत्यक्षपरिच्छेदस्य शिष्यस्य तादृशफलोपयोग्यानुमान-परिच्छेदाध्ययनप्रवृत्तावुपयुज्यते । केचित्तु एकवाक्यत्वं निःश्रेयसैकफलप्रयोजकत्वं (।) तत्प्रतिपत्तिश्च अनुमानग्रन्थज्ञानधर्मिकमुक्तिरूपेष्टसाधनताज्ञानरूपा (।) सा च शिष्यप्रवृत्ता-वुपयुज्यते जायते च सङ्गतिमदर्थप्रतिपादकत्वरूपहेतुमत्त्वज्ञानजनकात् सङ्गतिप्रदर्शादिति (?) व्याकुर्वन्ति ।

End : तन्मते निर्विकल्प(?) सप्रकाशतयाऽनुव्यवसायाभावे ··गाहित्वोपगमे विषया-नवस्थाप्रसङ्गेन सम्भावनायाश्चाप्रमात्वेन तद्‌व्यवस्थापकप्रमाणाभावादिति भावः ।

Colophon : इति महामहोपाध्यायगदाधरभट्टाचार्यचक्रवर्त्तिविरचितानुमितिटिप्पनी संपूर्णा ।

Post colophon : अङ्कवामाब्धिचन्द्रेऽब्दे मधोः स......मनुमिते रामनारायणो-ऽलिखत् ॥०॥०॥

विवरणम् : द्वितीयचिन्तामणयादिमग्रन्थस्यानुमितिप्रकरणस्य दीधितिमुपजीव्य रचितो-ऽयं टीकापरोनिबन्धः । अस्य खलु रचयिता महामहोपाध्यायविरुदसमलङ्कृतस्तार्किकाग्रेसरः श्रीगदाधरभट्टाचार्यः । अत्रत्यं प्रत्यक्षखण्डेन साकमनुमानखण्डस्य संगतिप्रदर्शनपर-दीधितिसन्दर्भीयं व्याख्यानमतिविस्तृतमपि नूनं पठनपाठनसमये नैयायिकानां न धैर्यच्युतिं घटयति । नानामतमालम्ब्यानुमानलक्षणवाक्यस्य समासप्रदर्शनमुखेन सूक्ष्मविचारात्मकं व्याख्यानञ्च व्याख्यातुरणवद्यसुगभीरपाण्डित्यपरिचायकम् । स्मृतिसंस्कारयोः कार्यकारण-भावप्रदर्शनात्मकग्रन्थस्य अनुमान-स्वरूप प्रामाण्ययोश्च व्याख्या मनोमोदकरी विपश्चिताम् । प्रारम्भेऽस्य पत्रद्वयं न वर्तते । अत्यन्तपराचीनत्वादेव जीर्णत्वं छिन्नत्वञ्चापन्नः । केचिदेतदीयपत्रपार्श्वभागाष्टिप्पन्यन्विताः । मुद्रणमस्य समजनि वाराणसीस्थचौखम्बाख्य-मुद्रणयन्त्रालयतः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

The book contains portion establishing causal relation between memory and habit. It also contains discursion on the nature of inference and nature of validity. Printed at the Chowkhamba Sanskrit Series.

615

913 अनुमितिगादाधरी टीका।

Anumiti Gādādharī ṭikā.

By Gadādhara Bhaṭṭācārya.

Substance: Country-made yellow paper. Size $19\frac{1}{3} \times 3\frac{1}{2}$ inches. Folia 61 (By Couting). 8 lines on a page. Extent about 3,416 ślokas. Character Bengali. Appearance old, torn and worn out. Prose. Generally correct. Incomplete. Date n. d. Available in print.

There is a square blank space in the middle of each page.

Beginning : [२२ (क) पृः] स्यापि तदन्यत्वावच्छिन्नोत्पत्तिप्रयोजकत्वात् अन्यथा पटज्ञानान्यघटज्ञानत्वावच्छिन्नोत्पत्तावपेक्षितस्य पटादिज्ञानसामग्रयभावस्य-पटज्ञानान्यज्ञानत्वाद्यवच्छिन्नहेतुताप्रसङ्गात्

End : आकाङ्क्षाघटितहेतोराकांक्षाविरहप्रदर्शनेनाव्यभिचारं स्फुटयति न चेति (।) अन्वयाननुभावकत्वाभावादिति (।) पुत्रेणैव राजसम्बन्धानुभवजननादिति भावः (।) वस्तुतः स्वरू... [२२ (ख)]

विवरणम् : पत्राण्यस्य प्रायः सर्वाण्येव व्युत्क्रमेणैवावतिष्ठन्ते। बहुषु पत्रेषु पत्राङ्का न वर्तन्ते। अन्तिमपत्रत्रयमस्य ग्रन्थान्तरीयम्। तत्र पत्रद्वितयवामपार्श्वभागयोर्नागराक्षरेण "हा. मि. टी-ग" इत्यङ्कितमास्ते। व्यक्तित्रयेनास्य लिपिर्विनिर्मिता। क्वचित् क्वचिदपक्षियमाणा मस्यप्युपलभ्यते। निबन्धोऽयं प्राचीनत्वेन जीर्णत्वं छिन्नत्वञ्च समुपागतः। ६१४ सूचीद्रष्टव्या।

In the Ms. some folia are not marked by the serial no, and some folia are marked inverted order. Some folia are illegible on account of the faiding away of the ink used.

For description of contens see cat no 614

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

616

992 अनुमिति-गादाधरी टीका ।

Anumiti Gādādharī ṭikā.

By Gadādhara Bhaṭṭācārya.

Substance: Country made yellow papər. Size 18 × 4 inches. Folia 59 (1a-59b). 6-10 lines on a page. Extent about 2,489 ślokas.Character Bengali. Appearance old, torn and worn out. Prose. Generally correcr. Incomplete at the end. Date n. d. Published.

This is another incomplete copy, already noticed.

There is a square blank space in the middle of each page.

Beginning: ॐ नमो गणेशाय। अभिवन्द्य मुहुः समादरात् पदपाथोजयुगं मुरद्विषः। विवृणोति गदाधरः सुधीरतिदुर्बोधगिरः शिरोमणिः (णेः) ॥

End: अस्तु वा स्ववृत्तित्व, स्ववृत्तिधूमादिपरामर्शाव्यवहितोत्तरत्वोभयसम्बन्धेनात्म-विशिष्टत्वमेव धूमादिपरामर्शजन्यतावच्छेदकं तावताप्यलिङ्गकानुमितौ व्यभिचारवारणादात्म-वृत्तित्वविशिष्टस्यैव आधेयतया आत्मविशिष्टस्यापि आत्मन्येव वृत्तेरिति [५९ (ख) पृः]

विवरणम्: असमाप्तेऽस्मिन् ग्रन्थेऽनुमानचिन्तामणयादिमग्रन्थानुमितिप्रकरणीय-दीधितेः प्रथमतः "पर्वतवह्निव्याप्यवैशिष्ट्यावगाहिनिश्चयत्वावच्छिन्नकारणताप्रतियोगिक-कार्यताया.........अवच्छेदिका ज्ञानवृत्तिः सामानाधिकरण्येन वाऽवच्छेदिका या जातिस्तद्-वत्त्वं वा बोध्यम्" इत्यन्त ग्रन्थस्य व्याख्याऽवतिष्ठते। अस्योत्सङ्गे क्रोडपत्रमेकं (२१ संख्याङ्कितं) वर्तते। केषुचिदत्रत्य पत्रपार्श्वभागेषु क्षुद्राष्टिपन्योविद्यन्ते।

For descriptions of contents see cat no 614.

617

935 अनुमितिगादाधरी टीका ।

Anumitigādādharī ṭikā.

By Gadādhara Bhaṭṭācārya.

Substance: Country-made yellow paper. Size $17\frac{1}{2} \times 3\frac{1}{2}$ inches. Folia 11 (1b-9b and 12a-13b). Character Bengali. 6-9 in a page. Extent 556 ślokas. Appearance old and worm out. Prose. Generally

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

correct. Incomplete at the end and in the middle. Date n. d. Published.

There is a square blank space in the middle of each page.

Beginning : ओँ नमो गणेशाय। अभिवन्द्य मुहुः समादरात् पदपाथोजयुगं पुरद्विषः। विवृणोति गदाधरः सुधीरतिदुर्वोधगिरः शिरोमणेः॥ प्रारिप्सितग्रन्थसमाप्ति-परिपन्थिप्रत्यूहव्यूहविध्वंसपटीयसीं परमेश्वरप्रणतिमादौ निवध्नाति ओमिति (।)

End : अथ सामानाधिकरण्यान्तेन व्याप्तिवैशिष्ट्यसामानाधिकरण्यावच्छिन्नं पक्ष-धर्मत्वमेव विवक्षितं पदार्थतावच्छेदकद्वयसामानाधिकरण्यवचनत्वादित्य [१३ (ख) द्रः]

विवरणम् : समाप्तिरहितोऽयं ग्रन्थः। अन्तराचास्य १०म, ११श पत्रे न स्तः। प्राचीनत्वेनायं जीर्णत्वमुपागतः।

For description of contents see cat no. 614.

618

64 अनुमितिमाथुरी टीका।

Anumitimāthurī ṭīkā.

By Mathurānātha Tarkavāgīśa.

Substance : Country-made yellow and reddish paper. Size : $16\frac{3}{4}\times 3\frac{3}{4}$ inches. Folia 11 (1b-11a). 8 lines on a page. Extent about 410 ślokas. Character Bengali. Appearance fresh. Prose. Generally correct. Complete. Date n d. Printed.

A commentary on the cintāmaṇi of Gaṅgeśa by Mthurānātha.

Beginning : ओँ नमो गणेशाय। सनीरनीरदश्यामं मञ्जुखञ्जनलोचनं। वल्लवीवल्लभं बन्दे वृन्दावनविहारिणं॥ न्यायाम्बुधिकृतसेतुं हेतुं श्रीराममखिलसम्पत्तेः। तातं त्रिभुवनगीतं तर्कालङ्कारमादरान्नत्वा॥ श्रीमता मथुरानाथतर्कवागीशधीमता। विषदीकृत्य दर्श्यन्ते द्वितीयमणिफक्किकाः॥ आन्विक्षिकीपण्डितमण्डलीषु सत्ताण्डवैरध्ययनं विनापि। मदुक्तमेतत् परिचिन्त्य धीरा निःशङ्कमध्यापनमातनुध्वं॥ यद्यपीदं बहुभिर्बहुषु बहुधा चर्वितं ज्ञायते च कैश्चित् सामान्यतोहेत्वाभाषान्तं (?) तथापि तत्तन्नानास्थानवित-तमशेषाप्रकाशनं वहुतरकुतर्कसम्वलितमसाम्प्रदायिकच्चातोव्यामोहायैव केवलं सर्वेषां भवतीति सर्वान् जिघृत्तया सत्तर्कन्यायमूलव्याखयानाय वैषद्याय च ममात्तपरं निबन्धः (?)।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

End : ननु व्याप्तिनिश्चयस्योत्पत्तावेव प्रामाण्यं सम्भ(व)ति सैव न सम्भवति उपायाभावात् इत्यत आह व्याप्तिग्रहोपाय इति ।

विवरणम् : अनुमितिनामधेयस्य द्वितीयतत्त्वचिन्तामण्यादिमग्रन्थस्य व्याख्यानपरोऽयं निबन्धः । रचयिताऽस्य मथुरानाथतर्कवागीशः । विषयो ह्येतदीयः सुप्रसिद्ध एव न्यायविदां समाजे । मुद्रणमस्य सकृदेव समजनि कलिकातास्थ "एशियाटिक् सोसाइटि" समाख्यभवनतः ।

619

1711 अनुमितिमूल-माथुरी ।

Anumitimūla-māthurī.

By Mathurānātha Tarkavāgīśa.

Substance : Country-made white and yellow paper. Sixe $18\frac{1}{2} \times 3\frac{1}{2}$ inches. Folia 10 (2a-11b). Neatly written in Bengali character. 7-9 lines in a page, Extent about 380 ślokas. Appearance old and worn out. Prose. Generally correct. Incomplete towards the beginning. Condition not good. Date n. d. Published.

There is a square blank space in the middle of each page.

This is another incomplete copy, already noticed.

Beginning : [२(क) पृः] ···मित्यर्थः । एतेन सङ्गतित्वेन सङ्गतिर्दर्शिता, अनन्तराभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयत्वं सङ्गतित्वं ।

End : ननु व्याप्तिनिश्चयस्योत्पत्तावेव प्रामाण्यं सम्भवति सैव न सम्भवत्युपायाभावात् इत्यत आह व्याप्तिग्रहोपाय इति ॥ प्रामाण्यत्त्वादेव रहस्यं(?) ॥

Post-Colophon : ओँ नमो जनार्द्दनाय ॥

विवरणम् : प्राचीनतां जीर्णताञ्च समुपागतस्य ग्रन्थस्यास्य प्रथमपत्रं न वर्तते । प्रतिपत्रं प्रान्तभागेषु जलसम्पर्कजचिह्नानि व्यक्तमुपलभ्यन्ते ।

For description of contents see cat. no, 618.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

620

1706 अनुमिति-माथुरी ।

Anumiti-māthurī.

By Mathurānātha Tarkavāgīśa.

Substance : Country-made yellaw paper. Size 16×4 inches. Folia 8 (1b-8b), Neatly written in Bengali character. 8 lines in a page. Extent about 401 ślokas. Appearance old. Prose. Generally correct. Incomplete at the end. Condition good.

There is a square blank spaee in the middle of each page. Date n. d. Published.

This is another copy of our previous cat. no. 618 already noticed.

Beginning : [१(ख) पृः] ओँ नमो गणेशाय । न्यायाम्बुधिकृतसेतुं हेतुं श्रीराममखिलसम्पत्तेः । तातं त्रिभुवनं गीतं तर्कालङ्कारमादरान्नत्वा ।। श्रीमता मथुरानाथ तर्कवागीशधीमता । विषदीकृत्य दर्श्यन्ते द्वितीयमणिफक्किकाः ।।

End : नाप्रत्यक्षं प्रमाणमित्युपक्रमः अनुमानं न प्रमाणमित्यादिकन्तु हेतुरि…… [८(ख) पृः]

विवरणम् : चिन्तामणेरनुमितिग्रन्थस्य प्रथमत आरभ्य "लोके धूमादिदर्शनानन्तरं वह्न्यादिव्यवहारश्च सम्भावनामात्रा"दितिग्रन्थपर्यन्तस्य व्याख्यानमत्रावतिष्ठते । प्रतिपत्रस्य वामप्रान्तभागे "प्रामाण्यवादमूल माथुरी" इति लिखितमास्ते । तत्तु लिपिकारप्रमादजमित्यवगन्तव्यम् । वस्तुतस्तु ग्रन्थोऽयमनुमितिप्रकरणस्य व्याख्यानपरः । प्राचीनोऽयम् । क्वचित् क्वचिन्मसीलोपोपक्रमः संवृत्तः ।

621

891 अपूर्ववाद पत्रिका ।

Apūrvavāda patrikā.

By Umācaraṇa Śarmā.

Substance : Country-made white paper. Size 16½×4 inches. Folia, 10 lines in a page. Extent 47 ślokas. Character Bengali.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Appearance old. Prose. Generally correct. Incomplete at the end. Date n. d. Unpublished.

Beginning : [२(क) पृ:] मृतस्य गयाश्राद्धतृतीयक्षणे प्रेतत्वपरिहारस्य सर्वजनानुभवसिद्धतया तच्छ्राद्धद्वितीयक्षणे श्राद्धध्वंसविरहात् तदा तत्परीहारानुपपत्तेः ।

End : दशवाजपेयादिजन्यस्वर्गभोगस्थले दशमापूर्वजन्यचरमस्वर्गवृत्तिरेव सा जातिरतोनानुपपत्तिरित्याहुरित्यलं विस्तरेण (।)

Colophon : इत्यपूर्ववादपत्रिका समाप्ता (।)

Post colophon : श्रीउमाचरणशर्मणः पत्रिकेयं ॥०॥

विवरणम् : तुरीयचिन्तामरायन्तर्गतापूर्ववादतः स्थलमेकं समाहृत्य तदुपरि विनिर्मितोऽयं निवन्धः श्रीउ़माचरणशर्मणा । विचाररीतिरस्यानधिकं नावीन्यमाधत्ते । प्राचीनोऽयम् । प्रारम्भोऽस्य न वर्तते । पत्रपार्श्वे टिप्पनी समुपलभ्यते । अमुद्रितोऽम् ।

622

1658 अपूर्ववाद-मिश्रटीका ।

Apūrvavāda-miśraṭīkā

Mathurānātha Tarkavāgīśa.

Substance: Country-made yellow paper. Size $20\frac{1}{4} \times 3\frac{1}{2}$ inches. Folia 8(1a-8b). Neatly written in Bengali character. 7-8 lines in a page. Extent about 270 ślokas. Appearance old and torn. Prose. Generally correct. Incomplete at the end. Condition good.

There is a square blank space in the middle of each page. Date n.d. Unpublished.

A Commentary on the commenary of Apūrvavāda of Jayadeva Miśra by Mathurānātha.

Beginning : [१ (ख) पृः] ॐ नमो गणेशाय । ननु स्वर्गकामोयजेतेत्यादावित्यत्रापि पदार्थतावच्छेदकस्यानुगतानतिप्रसक्तस्य दुर्वचतयाऽन्यावर्त्तकत्वे········

End : ज्ञानाभावादिति । प्रधानविधिवाक्यात् प्रथमं ज्ञानासम्भवादित्यर्थः । भावेवेति, तादृशयोग्यताज्ञानं विनैव भावेवेत्यर्थः । [८ (ख) पृः]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विवरणम् : शब्दचिन्तामरायन्तःपातिनोऽपूर्ववादस्य जयदेवमिश्ररचितायाः टीकायाः टीकापरोऽयं ग्रन्थः। अस्य खलु रचयिता तर्कवागीशोपनामकः श्रीमान् मथुरानाथः। प्राभाकरसस्ताया अपूर्वस्य विधिप्रत्ययवाच्यताया निराकरणमुखेन दृढयुक्त्या नैयायिक-राद्धान्तः प्रदर्शितोऽत्र ग्रन्थकृता। कथितमिश्ररचितटीकायाः प्रथमतः कियदंशस्य व्याख्यान-मात्रमत्रास्ते। प्राचीनोऽयं छिन्नतामुपागतः। प्रकाशनमस्य न जातम्।

623

1423 अपूर्ववाद्-टीका।

Apūrvavāda-ṭīkā,

By Unknown author.

Substance : Country-made yellow paper. Size $16\frac{1}{4} \times 3\frac{1}{2}$ inches. Folia 10. (By counting). 7-9 lines in a page. Neatly written in Bengali character. Extent about 300 ślokas. Appearance old, torn and worn out. Prose. Generally correct. Incomplete at the end. Condition not good.

There is a square blank space in the middle of each page. Date n.d. Unpublished.

A commentary on the Apūrvavādacintāmaṇi of Gaṅgeśa by unknown author. The name of the author is not mentioned in the Ms. but according to the seribe's note on the first page(अपूर्व मू टी भं) its author is Gadādhara.

Beginning : ॐ नमो गणेशाय। लिङर्थः कार्यत्वं पाकादिरूपलौकिकक्रियायामेव प्रथमतोऽन्वेति न तु स्वर्गकामोयजेत इत्यादितो यागादौ प्रथमतस्तदन्वयः।

End : अन्तिमपत्रं जीर्णत्वाच्छिन्नत्वान्मसीलोपाच्चापाठ्यतामुपागतम्। अतस्तत्स्थो-ग्रन्थो न लिखितः।

विवरणम् : शब्दचिन्तामरायन्तःपातिनोऽपूर्ववादस्य टीकापरोऽयं ग्रन्थः। एतद्-रचयितुर्नामात्र न वर्तते। प्रथमपत्रस्य (ख) पृष्ठाया वामपार्श्वभागे "अपूर्व मूटीभ" इत्यस्ति सम्यगङ्कितम्। एतदीयरचनशैली गदाधरीयरचनशैलीवत् प्रतिभाति। विचाररीतिरपि तदीयविचाररीतिमनुकरोति। एतेभ्यो हेतुभ्यो गदाधरभट्टाचार्य एवास्य रचयितेति निर्व्यूढं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रतीयते। ग्रन्थकृताऽत्रापूर्वविषये नानामतानि समुपस्थापितानि, निराकृतानि च, विधेः कार्यत्वे शक्तिवादिनां नैयायिकानां मतमपि सम्यगुपवर्णनमुखेन स्थापितम्। अयं पराचीनो जीर्णश्च। क्वचित् क्वचिदपस्त्रियमाणा मसी समुपलभ्यते। अन्तिमपत्रं जीर्णत्वात् छिन्नत्वान्मसीलोपाच्चापाठ्यत्वमुपागतम्। प्रकाशनमस्याद्यापि न जातम्।

This work, which appears, by the style of the composition to have been written by Gadādhara. Different views on apūrva, have expounded in the work, though finaly the position of the naiyāyikas has been upheld.

624

1074 अपूर्ववादटीका।

Apūrvavāda-ṭīka.

By Mathurānātha Tarkavāgīśa.

Substance: Country-made yellow and raddish paper. Size $17\frac{1}{4} \times 4$ inches. Folia 31 (1a-31b). 8-10 lines in a page. Neatly written in Bengali character. Extent about 1545 ślokas. There are some marginal notes. Appearance old. Prose. Generally correct. Complete. Condition is good. Date n.d. published.

There is a square blank space in the middle of each page.

A Commentary on the Apūrvavāda-Cintāmaṇi of Gaṅgeśa by Mathurānātha Tarkavāgīśa.

Begining: प्रसङ्गादपूर्वस्य विधिप्रत्ययवाच्यतां प्रभाकराभिमतां निराकर्त्तुं विचाराङ्ग-संशयप्रयोजिकां विप्रतिपत्तिमादर्शयति अथेत्यादिना।

End: एतदुपलक्षणं क्वचिन्ना(?)यगम्यमपि यथा विश्वजिता यजेतेत्यादाविति॥

Colophon: इति शब्दपरिच्छेदरहस्येऽपूर्ववादरहस्यं॥०॥

विवरणम्: शब्दचिन्तामण्यन्तर्गतापूर्ववादस्य टीकात्मकोऽयं ग्रन्थः। अस्य खलु रचयिता तर्कवागीशोपनामकः श्रीमान् मथुरानाथः। अपूर्वं नाम यागादिजन्यः स्वर्गादिहेतुः कश्चन गुणविशेषः। तञ्च गुणविशेषमपूर्वमाहुर्मीमांसकाः। नैयायिकास्तु धर्माधर्माविति प्राहुः। मीमांसकमते प्रधानापूर्वाङ्गापूर्व-कलिकापूर्वभेदेनापूर्वं त्रिविधम्। प्रधानापूर्वमेव परमापूर्वम्। तदवान्तरक्रियाकूटजन्यमपूर्वं कलिकापूर्वम्। कलिकापूर्वं हि परमापूर्व-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुत्पाद्य नश्यति। अङ्गापूर्वन्तु परमापूर्वं विशेषमादधातीति विशेषः। अङ्गापूर्वसहितं परमापूर्वं विशिष्टफलं जनयतीति संक्षेपतस्तन्मतम्

मूलोक्तस्य विचाराङ्गसंशयप्रयोजकविप्रतिपत्तिवाक्यस्य विधिकोटिनिषेधकोटिप्रदर्शनपुरःसरं विस्तरशो व्याख्यानमुखेन (मीमांसक) प्रभाकराभिमतस्यापूर्वनिष्ठविधिप्रत्ययवाच्यत्वस्य नानासूक्ष्मयुक्तया सुविशदं निराकरणमत्रावतिष्ठते।

८ (क) पृष्ठायां षड्भ्यः कलिकापूर्वेभ्य एव स्वर्गोत्पत्तेश्चरमपरमापूर्वेऽपि मानाभाव इति वादिनामुच्छृङ्खलानां मतस्योपवर्णनमुखेन मनोरमं खण्डनमस्ति।

८ (ख) पृष्ठायां नवावृत्त्यादिस्थले दशपार्थिवशिवपूजादिस्थले च केन रूपेण परमापूर्वविशेषे स्वर्गविशेषे च हेतुत्वं नवावृत्त्यादेर्जातित्वाभावादिति पृच्छायाः सुन्दरं समाधानं वर्तते।

भट्टैकदेशिमतं मीमांसकोत्तानमतञ्च सम्यगुपवर्ण्य तयोर्निर्युक्तिकत्वमभिनवप्रणाल्या प्रदर्शितमत्र व्याख्याता। लिङादिपदानां समालोचनस्यैव बाहुल्यमत्रावलोक्यते। अपूर्वसमालोचनप्रसङ्गेनात्र नानाविषयाः समालोचिताः।

अयं पराचीनः। पत्रपार्श्वभागेषु क्षुद्राष्टिप्पन्यो वर्तन्ते। क्वचित् क्वचिन्मसीलोपोपक्रमः संवृत्तः। एशियाटिक्सोसाइटिसमाख्यभवनतः प्रकाशनमस्य वारमेकमेव समजनि।

Apūrva is a category maintained by the Mimāṃsakas. Naiyāyiks get its purpose served by Dharma and Adharma. Different subdivisions of Apūrva have been explained in the work.

625

1097 अपूर्ववादमाथुरीटीका।

Apūrvavādamāthurīṭīkā.

By Mathurānātha Tarkavāgīśa.

Substance: Country-made yellow paper. Size $16\frac{1}{2} \times 3\frac{1}{2}$ inches. Folia 6(1a-6b). 6-8 lines in a page. Neatly written in Bengali character. Extent about 276 ślokas. Appearance old and worm-eaten. Prose. Generally correct. Incomplete at the end. Condition not good.

There is a square blank space in the middle of each page. Date n.d. published.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

A commentary on the Apūrvavāda of Gaṅgeśa by Mathurānātha.

Beginning : ॐ नमः परदेवतायै । प्रसङ्गादपूर्वस्य विधिप्रत्ययवाच्यतां प्राभाकराभिमतां निराकर्त्तुं विचाराङ्गसंशयप्रयोजिकां विप्रतिपत्तिमादर्शयति अथेत्यादिना ।

End : ननु फलसाधनतान्वये फलसमयस्थायित्वतादृशव्यापारोपधायकत्वान्यतरवत्त्वस्य योग्यतात्वे आग्नेयाष्टाकपालयाग ऐन्द्रदधियागऐन्द्रपययागात्मकयागतन्वरूपस्य(?) दर्शस्य आग्नेयाष्टाकपा··· [६(ख) पृः]

विवरणम् : ग्रन्थोऽयं प्राचीनः कीटदष्टश्च । शब्दचिन्तामण्यन्तःपात्यपूर्ववादीय रहस्यस्य प्रारम्भतः कियदंशमात्रमत्रावतिष्ठते । लिपिरस्य जनद्वयेन विनिर्मिता । क्वचित् क्वचिन्मसीलोपोपक्रमः संवृत्तः । पत्रपार्श्वैकदेशभागाः तैलसंयोगजनितचिह्नान्विता वर्तन्ते ।

For description of contents see cat no 623.

626

68 अपूर्ववादमाथुरीटीका ।

Apūrvavādamāthurīṭikā.

By Mathurānātha Tarkavāgīśa.

Substance: Country-made yellow paper. Size $18\frac{1}{2} \times 3\frac{1}{3}$ inches. Folia 38 (1a-38a). 7-8 lines on a page. Neatly written in Bengali character. Extent about 1485 ślokas. Appearance old, torn and worn out. Prose. Generally correct. Complete. Date n. d. Printed.

There is a square blank space in the middle of each page.

It contains the text of the Asādhāraṇa, a part of Śabdachintāmaṇi with the commentary of Mathurānatha.

Beginning : श्रीश्रीहरिः । प्रसङ्गादपूर्वस्य विधिप्रत्ययवाच्यतां प्राभाकराभिमतां निराकर्त्तुं विचाराङ्गसंशयप्रयोजिकां विप्रतिपत्तिमादर्शयति अथेत्यादिना । यद्विधिः यद्विधिपदोपस्थापितोऽर्थः । समभिव्याहृतक्रियान्वयीति । एतद्विधिपदसमभिव्याहृतधातूपस्थापितार्थान्वयी तदन्यान्वयीवेत्यर्थः ।

End : एतदुपलक्षणं क्वचिच्च न्यायगम्यमपि यथा विश्वजिता यजेतेत्यादाविति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Colophon : इति महामहोपाध्याय श्रीमथुरानाथतर्कवागीशभट्टाचार्यविरचिते शब्द-परिच्छेदरहस्ये अपूर्ववादरहस्यं ॥०॥

विवरणम् : तुरीयचिन्तामण्यन्तर्गतस्यापूर्ववादप्रकरणस्य व्याख्यानपरोऽयं निबन्धः। विनिर्माताऽस्य श्रीमान् मथुरानाथतर्कवागीशः। अपूर्वविषयेऽत्र प्राभाकरोत्तानादिमत-निरसनपुरःसरं विस्तृतविचारमुखेन नैयायिकसिद्धान्तं स्थापयामास निबन्धकारः। अत्यन्त-प्राचीनत्वादेवायं छिन्नत्वं जीर्णत्वञ्च समुपागतः। उत्सङ्गेऽस्यापूर्ववादमूलाङ्कितपत्रद्वयमव-तिष्ठते। केचनैतदीय पत्रपार्श्वभागाः टिप्पनीपरिशोभिता वर्तन्ते। मुद्रितोऽयं कलिकातास्थ एशियाटिक् सोसाइटिसमाख्यभवने।

For description of contents see cat no 623.

627

1582 अपूर्ववादरहस्यम्।

Apūrvavādarahasyam.

By Unknown author.

Substance : Country-made yellow paper. Size 18 × 4 inches. Folia 4 (1a-4b). 8-12 lines in a page. Neatly written in Bengali character. Extent 298 ślokas. Appearance old torn and worn out. Prose. Generally correct. Complete. Condition good.

There is a square blank space in the middle of each page. Date n.d.

Beginning : ॐ नमो गणेशाय। स्वर्गकामोऽश्वमेधेन यजेतेत्यादौ यागादेः साक्षात् स्वर्गसाधनत्वबाधेन परम्परया साधनत्वं विध्यर्थः तृतीयप्रकाराभावात् परम्परा-साधनता च व्यापारं विनाऽनुपपद्यमाना इति तत्र व्यापारं कल्पयति स एव व्यापारोऽपूर्व-मिति सिद्धान्त इति वदन्ति।

End : न च देवताप्रीतेस्तदनुभवजन्यसंस्कारस्य च स्वर्गव्यधिकरणत्वेन कथं स्वर्ग-हेतुरिति वाच्यं पूजके प्रीतिमान् देव इत्यादिप्रतीतिबलात् तस्यापि विलक्षणः सम्बन्धः स्वीक्रियते तेन हेतुत्वमिति चेन्न यत्र यागादौ देवताप्रीत्यनुभवो न जनितस्तत्रापूर्वमवश्य(श्यं ?) वाच्यमिति ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Colophon : इत्यपूर्ववादरहस्यं समाप्तं ॥

Post colophon : ॐ गुरवे नमः ॥ श्रीजीवनकृष्णदेवशर्मणः पुस्तकमिदं लिपिश्च ॥ हरिहराय नमोनित्यं शिवायै च शिवाय च ॥

विवरणम् : अपूर्ववादपरोऽयं निबन्धो निरमायि केनचनाज्ञातनामधेयेन नैयायिकेन। अत्र यागादेः क्रियारूपतया विनाशित्वेन स्वर्गसाधनत्वाभावात् परम्परया तस्य साधनत्वं वाच्यम्। साधनत्वं हि व्यापारमन्तरेन नोपपद्यते, स एव व्यापारोऽपूर्वमित्यनतिविस्तृतत्वेन वर्णितमस्ति। अपि चात्र निबन्धकृता यागादेरिच्छारूपतां प्रकल्प्य तस्य तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वेन न साक्षात् स्वर्गसाधनत्वमिति प्रदर्शितम्। अपि च विभुसमवेतयोग्यविशेषगुणनाशत्वावच्छिन्नं प्रति स्वानन्तरोत्पन्नस्वसमानाधिकरणविशेषगुणत्वेन कारणत्वमित्याकारकं कार्यकारणभावं कल्पयित्वा तस्य प्रतिपदव्यावृत्तिप्रदर्शनमुखेनानतिविस्तृतं व्याख्यानमत्र विहितं तेन। सङ्क्षिप्तोऽयं निबन्धः सर्वथा सारल्यं न विजहाति। प्राचीनोऽयं जीर्णत्वं छिन्नत्वञ्च समुपागतः। क्वचित् कचिन्मसीलोपोपक्रमः। संवृत्तः। प्रकाशनमस्य न समजनि।

The author's name could not be traced. Sacrifices etc. are not without their end and as such they do not continue; therefore an entity called apūrva has to be postulated to make it instrumental to the attainment of heaven. Hence, the causality of sacrifices to the attainment of heaven is only secondary. The work contains definition of apūrva and the explanation of each word contained therein.

628

1641 अपूर्ववाद-रहस्यम्।

Apūrvavāda-rahasyaṃ.

By Mathurānātha Tarkavāgīśa.

Substance: Country-made yellow paper. Size $20\frac{1}{4} \times 4$ inches. Folia 30 (1a-30b). Neatly written in Bengali character. 6-9 lines in a page. Extent about 1,480 ślokas. Appearance old. Prose. Generally correct, complete. Condition good.

There is a square blank space in the middle of each page. Date 1679 śaka. Published.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

This is another copy of our previous no 1074 (cat no 623) already noticed.

Beginning : ॐ नमोगणेशाय । प्रसङ्गादपूर्वस्य विधिप्रत्ययवाच्यतां प्राभाकराभिमतां निराकर्त्तुं विचाराङ्गसंशयप्रयोजिकां विप्रतिपत्तिमादर्शयति अथेत्यादिना ।

End : एतदुपलक्षणं क्वचिन्न्यायगम्यमपि बोध्यमिति यथा विश्वजिता यजेतेत्यादाविति ।

Colophon : इतिशब्दपरिच्छेदरहस्ये अपूर्ववादरहस्यं समाप्तं ॥ ॐ तत्सत् ॥

Post-Colophon : नवसप्तर्त्तुशुभ्रांशुमिते शाकाब्दकेऽलिखत् । द्विजः श्रीरामचन्द्रोऽदः पुस्तकं शाब्दखण्डकं ॥ तारिख २५ भाद्रः तिथिस्त्वेकादशी । जयति श्रीदुर्गा ।

विवरणम् : जीर्णतां प्राचीनताञ्चोपागतोऽयं ग्रन्थः । मुद्रितपुस्तकादस्य किञ्चित् पाठवैलक्षण्यं व्यक्तमुपलभ्यते । क्वचित् कचिन्मसीलोपोपक्रमः संवृत्तः ।

For description of contents see cat. no. 623.

629

43 अवच्छेदकत्वनिरुक्ति-टीका ।

Avacchedakatvanirukti-ṭīkā.

By Jagadīśa Tarkālaṁkāra.

Substance: Country-made yellow paper. Size $19\frac{1}{2} \times 3\frac{1}{2}$ inches Folia (1b-18b). Neatly written in Bengali character. 7-8 lines in a page. Extent about 607 ślokas. Appearance old. Prose. Generally correct. Complete. Date n.d. Printed.

There is a square blank space in the middle of each page.

A commentary on the Dīdhiti of Raghunātha by Jagadīśa Tarkālaṁkāra.

Beginning : इह अनवच्छेदकमित्यत्रावच्छेदत्वं अवच्छेदकत्वपदार्थः । विशिष्टसत्तात्वसमनियतस्य सत्तात्वस्य लघुनोपि न विशिष्टसत्ताभावप्रतियोगितावच्छेदकत्वं गुणादावपि सत्ता नास्तीति प्रत्ययप्रसङ्गात् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

End : स च ग्राह्यसम्बन्धत्वावच्छिन्नाभाववद्वृत्तित्वेनैव तत्र सुलभमि-(?) त्यपि शक्यते वक्तुं तथापि तद्बुद्धेः प्रकृतसाध्यकानुमित्यविरोधितया हेत्वाभासता न स्यात् यद्विषयकत्वेन यादृशानुमानविरोधित्वं तस्यैव तत्र तथात्वादितिभावः ।

Colophon : इत्यवच्छिन्न (?) निरुक्तिजगदीशः समाप्तः (?)

विवरणम् : हेतुसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकं यत् साध्यतावच्छेदकं तदवच्छिन्नसाध्यसामानाधिकरण्यं व्याप्तिरिति व्याप्तिसिद्धान्तलक्षणघटकानवच्छेदकमित्यस्य घटकीभूतमवच्छेदकत्वं स्वरूपसम्बन्धविशेषो वा स्यात्, अनतिरिक्तवृत्तित्वविशेषो वा स्यादिति जिज्ञासानिवृत्त्यर्थं तार्किकशिरोमणिना रघुनाथेन विरचितो योऽवच्छेदकत्वनिरुक्तिनामको-ग्रन्थस्तद्व्याख्यानरूपोऽयं निबन्धः, रचयिताऽस्य जगदीशतर्कालङ्कारः ।

अवच्छेदकत्वं तावद् द्विविधं—स्वरूपसम्बन्धानतिरिक्तवृत्तित्वभेदात् । तत्रादिमं क्वचित् प्रतियोग्यंशे विशेषणीभूतधर्मे, यथा घटो नास्तीत्याकारकाभावीयप्रतियोगितावच्छेदकत्वं घटत्वे । क्वचिदप्रकारीभूतधर्मेऽपि यथा कम्बुग्रीवादिमान् नास्तीत्याकारकाभावीयप्रतियोगिता-वच्छेदकत्वं घटत्वे, सम्भवति लघौ धर्मे गुरौ तदभावादितिनियमात् । अनतिरिक्तवृत्तित्वं नाम हेतुसमानाधिकरणाभावप्रतियोगिताया यदवच्छेदकं तदभाववदवृत्तित्वं ग्राह्यम् । नव्य-न्यायशास्त्रे व्युत्पत्त्याधायकत्वादत्युत्कृष्टोऽयं निबन्ध इत्यत्र नास्ति कोऽपि विवादावसरः । प्राचीनोऽयं निबन्धः । अस्य प्रायः प्रतिपत्रमेव सलिलसंश्लेषजचिह्नान्यवतिष्ठन्ते । मुद्रणमस्य समजनिष्टानेकमुद्रणयन्त्रालयतः ।

For description of contents see cat.no. 623.

630

358 अवच्छेदकत्वनिरुक्ति-टीका ।

Avacchedakatvanirukti-ṭīkā.

By Jagadīśa Tarkālaṁkāra.

Substance: Country-made red paper. Size $16\frac{1}{4} \times 3\frac{1}{2}$ inches. Folia 3. Neatly written in Bengali character. 8-9 lines in a page. Extent about 92 ślokas. Appearance fresh. Prose. Incorrect. Incomplete at the beginning and at the end. Date n. d. Printed.

There is a square blank space in the middle of each page.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Beginning : घटवान् महाकालत्वादित्यादावव्याप्तिर्गगनत्वविशिष्टस्य कालिकसम्बन्धेन सम्बन्ध्यप्रसिद्धया पारिभाषिकावच्छेदकाप्रसिद्धयसम्भवात्। अत्र केचित् तादात्म (?) साध्यताघटकान्यतरसम्बन्धे(?) यः स्वविशिष्टसम्बन्धी तन्निष्ठः यस्तदन्यतरसम्बन्धेन प्रतियोगिव्यधिकरणोऽभावन्त(?) प्रतियोगितानवच्छेदकतत्कत्वमुक्तलक्षणार्थः।

End : समवायेन द्रव्यसाध्यकजन्यमनोऽन्यद्रव्यत्वादिहेतावतिव्याप्तेस्तादृशसम्बन्धेन साध्याभावस्य प्रतियोगिवैयधिकरण्याभावात् इति सुधीभिर्विभाव्यं।

विवरणम् : आद्यन्तरहितोऽयं निबन्धः। अत्र पत्रत्रयमात्रं वर्तते। नायं प्राचीनः।

For description of contents see cat.no. 623.

631

27 अवच्छेदकत्वनिरुक्ति-टीका।

Avacchedakatvanirukti-ṭīkā.

By Jagadīśa Tarkālaṁkāra.

Substance: Country-made yellow paper. Size $18\frac{1}{2} \times 3\frac{1}{3}$ inches. Folia 15(1a-15b). Neatly written in Bengali character. 7-8 lines in a page. Extent about 615 ślokas. Appearance old and worn out. Prose. Generally correct. Complete. Date n.d. Printed and published by the Chowkhamba Sanskrit Series Office.

Beginning : ॐ नमो गणेशाय। इह अनवच्छेदकत्वमित्यत्रावच्छेदकत्वं अवच्छेदकत्वपदार्थः। विशिष्टसत्तात्वसमनियतस्य सत्तात्वस्य लघुनोऽपि न विशिष्टाभावस्य प्रतियोगितावच्छेदकत्वं गुणादावपि सत्ता नास्तीति प्रत्ययप्रसङ्गात्।

End : तथापि तत्तद्बुद्धेः प्रकृत(त?) साध्यकानुमित्यविरोधितया हेत्वाभासता न स्यात्, यद्विषयकत्वेन यादृशानुमानविरोधित्वं तस्यैव तत्र तथात्वादितिभावः।

Colophon : अवच्छेदकनिरुक्तेष्टिप्पनी समाप्ता।

विवरणम् : ६२३ संख्यक सूची द्रष्टव्या।

For description of contents see cat. no. 623.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

632

26 अवच्छेदकत्वनिरुक्ति टीका ।

Avacchedakatvanirukti-ṭīkā.

By Jagadīśa Tārkālaṁkāra.

Substance: Country-made yellow paper. Size $5\frac{1}{2} \times 3\frac{1}{2}$ inches. Folia 15(1b-15b). Neatly written in Bengali character. 6-8 lines in a page. Extent 510 ślokas. Appearance old. Prose. Incorrect. Complete. Date n.d. Printed.

Beginning: नन्विति । इहानवच्छेदक इत्यत्रावच्छेदकत्वपदार्थः । विशिष्ट-सत्तात्वसमनियतसत्तात्वस्य लघुनोऽपि न विशिष्टसत्ताभावप्रतियोगितावच्छेदकत्वं गुणादावपि सत्तानास्तीति प्रमाप्रसङ्गात् ।

End: तद्बुद्धेः प्रकृतसाध्यत्वनित्यविरोधितया हेत्वाभाषे यद्विषयत्वेन यादृशानु मानविरोधित्वं तस्यैव तथात्वादितिभावः ।

Colophon: इत्यवच्छेदकनिरुक्तिः समाप्ता ॥

Post-Colophon: लिपिरियं श्रीवदनचन्द्र देवशर्मणः ।

लाभस्तेषां जयस्तेषां कुतस्तेषां पराभवः ।

येषामिन्दीवरश्यामोहृदयस्थोजनार्द्दनः ॥

संसारगरलार्णवे निपतितोलोभेन मोहेन वा ।

कामेनैव च मदेन तिमिरेऽहं सर्व्वदा मायया ॥

ॐ नमः कृष्णाय ।

विवरणम्: ६२३ संख्यकसूची द्रष्टव्या ।

For description of contents see cat. no. 623.

633

755 अवच्छेदकत्वनिरुक्ति-टीका ।

Avacchedakatvanirukti-ṭīkā.

By Jagadīśa Tarkālaṁkāra.

Substance: Country-made yellow paper. Size $18\frac{1}{2} \times 3\frac{1}{4}$ inches. Folia 4 (4a-7b). Bengali character. 6-8 lines on a page. Extent

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

about 129 ślokas. Appearance old. Prose. Generally correct. Inomplete at the beginning and at the end.

There is a square blank space in the middle of each page. Date n.d. Printed.

Beginning : कालिकादिसम्बन्धेन धुमत्वस्य वर्त्तमानत्वेऽपि प्रतियोगितावच्छेदकत्व-हानिः। न च तथापि समवायेन प्रमेयस्य साध्यतायां भावत्वादावतिव्याप्तिः प्रमेयत्वरूपस्या-वच्छेदकस्याभावस्याप्रसिद्धया प्रमेयाभावस्य लक्षणाघटकत्वादिति वाच्यं। हेतुमन्निष्ठाभावप्रति-योगितावच्छेदकं यद्धर्मान्यूनवृत्ति तत्त्वस्यैव विवक्षितत्वात्।

End : न च घटवान् महाकालत्वादित्यादौ तादृशप्रतियोगितावच्छेदकं यद् गगनत्वं तदवच्छिन्नाभावस्य प्रतियोगिवैयधिकरण्याऽप्रसिद्धयाऽव्याप्तिरिति वाच्यम् तत्रापि साध्यता-वच्छेदकसम्बन्धसामान्ये तादृशधर्मावच्छिन्नाभाववदनुयोगिकत्वप्रतियोगिकत्वयत् यदनुयोगि-(?)कत्वोभयाभावस्तत्सम्बन्धत्वस्य विवक्षितत्वात्। तदसम्बन्धत्वमपि साध्यतावच्छेदक-सम्बन्धेन बोध्यं।

विवरणम् : ग्रन्थोऽयं प्राचीनः प्रारम्भसमाप्तिरहितश्च। ६२९ सूची द्रष्टव्या।

For description of contents see cat. no. 629.

634

1513 (१) **अवच्छेदकत्वनिरुक्ति-टीका।**

Avacchedakatvanirukti-ṭīkā.

(२) **सामान्याभाव-टीका।**

Sāmānyābhāva-ṭīkā.

By Jagadīśa Tarkālaṃkāra.

Substance: Country-made yellow paper. Size $15\frac{1}{2} \times 3\frac{1}{2}$ inches. Folia 27(1b-19a, 19bb-27b). Neatly written in Bengali character. 6-9 lines in a page. Extent about 884 ślokas. Appearance old. Prose. Generally correct. Complete. Condition good.

There is a square blank space in the middle of each page. Date Śaka 1717. Published.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Beginning of the Avacchedakatvanirukti-jāgadīśīṭīkā : ॐ नमो गुरवे। इह अनवच्छेदकत्वमित्यत्रावच्छेदकत्वमवच्छेदकपदार्थः।

End : तथापि तद्बुद्धेः प्रकृतसाध्यकानुमितिविरोधितया हेत्वाभासता(?) न स्यात् यद्विषयकत्वेन यादृशानुमितिविरोधित्वं तस्यैव तत्र तथात्वादितिभावः॥

Colophon : इत्यवच्छेदकत्वनिरुक्तेर्जागदीशी टिप्पनी सम्पूर्णा॥

Post Colophon : आकाङ्क्षाकनकाचलश्रियमपाकर्त्तुं समजृम्भते
योग्यत्वं मुनिचेतसामपि मुहुर्मोहाय शक्तुं क्षमः
असत्तिश्च तथा यथान्तरगता रेखापि नो लभ्यते
का शाब्दीघटना विराजति कुचद्वन्द्वे कुरङ्गीदृशां॥१॥
नेयन्ते मुखमण्डलप्रतिकृतिः छाया न हावोद्भवा
वक्षोजप्रतिविम्बितं न स व्रणो जानेऽस्य तत्त्वं प्रिये।
अप्राप्याननसौभगं तव शशी मुक्ताश्चितेर्द्धामभि
कण्ठे हेमघटद्वयं दधदयं पानीयमध्यं गतः॥२

Beginning of the Sāmānyābhāva : श्रीहरिः॥ ननु व्याप्तिनिरूपणप्रस्तावे सामान्याभावव्यवस्थापनमर्थान्तरमस्तमत उपोद्घातसङ्गत्या तदवतारयति नन्विति।

End of it : अत्र प्रतिवन्धिरनुत्तरमित्यस्वरसः(?) केचिदाहुरित्याभ्यां सूचितः।

Colophon : इति सामान्यभावरहस्यं॥

Post-Colophon : शाके सप्तेन्दु सप्तेन्दुमिते प्राथमिके दिने। राधस्य लिखिता केन सामान्याभावटिप्पनी।

For description of contents see cat. no. 623.

635

4 अवच्छेदकत्वनिरुक्ति-वादार्थः

Avacchedakatvanirukti-Vādārtha.

By Unknown author.

Substance : Country-made yellow paper. Size 18½ × 4⅓ inches. Folia 4 (2a-4b). Bengali character. 8-11 lines in a page. Extent about 160 ślokas. Appearance very old and worn out. Prose.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Generally correct. Incomplete at the beginning. Not printed. Date n.d.

Beginning : गितावच्छेदकत्वावगाहिप्रत्ययस्य कोभेद इति वाच्यम् । विशेषणतया-तदवगाहिप्रत्यये तद्धर्मावच्छिन्नप्रतियोगिताकत्वविशिष्टप्रतियोगितावच्छेदकसम्बन्धावच्छिन्न-प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकत्वसम्बन्धेनाभावांशे प्रतियोगिनोभानं उपलक्षणतया-तरगाहिनि च गुरुप्रतियोगितावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकत्वसम्बन्धेनाभावांशे तदभानं इत्यत······वैलक्षण्यात् इति ।

End : न द्रव्यत्वप्रकारकप्रमाविशेष्यस्य संयोगेन साध्यत्वे सत्त्वादावतिव्याप्तिस्तत्र साध्याभावस्य प्रतियोगितावच्छेदकं(?) लाघवात् ।

post-Colophon : श्रीगोपालः । श्रीवाणीशरणं इति

विवरणम् : अवच्छेदकत्वनिरुक्तौ जगदीशविरचितटीकाया उपरि टिप्पन्यात्मकोऽयं निबन्धः । प्रारम्भेऽस्य पत्रमेकं न विद्यते । निबन्धकारस्य नामापि नोपलभ्यते । अयं खलु प्राचीनो जीर्णश्छिन्नश्च संवृत्तः । अमुद्रितोऽयम् ।

636

948 अवच्छेदकत्वनिरुक्ति पत्रिका ।

Avacchedakatvanirukti patrikā.

By Kālīśaṁkara Siddhāntavāgīśa

Substance : Country-made yellow paper. Size 16¾ × 3¼ inches. Folia 4 (by counting). Bengali character. 5-8 lines in a page. Extent 178 ślokas. Appearance old. Prose. Incorrect. Incomplete at the beginning and at the end. Date n.d. Published.

There is a square blank space in the middle of each page.

Beginning : ॐ नमः शिवाय ॥ अथ कम्बुग्रीवामत्त्वान्(?) प्रमेयत्वादित्यादौ हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकघटत्वादिभिन्नत्वस्य साध्यतावच्छेदके सत्त्वेनातिव्याप्ति-रिति । ननु कम्बुग्रीवानाशकाले कम्बुग्रीवादिमान्नास्तीति प्रतीत्या तत्र च घटोनास्तीत्य-प्रत्ययेन कथं कम्बुग्रीवादिमदभावप्रतियोगितावच्छेदकं घटत्वमिति चेन्न कम्बुग्रीवादि-मत्त्वोपलक्षिताभावप्रतियोगितावच्छेदकत्वस्य घटत्वे सत्त्वादिति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

End : केचित्तु इति कल्पे कालोघटवान् महाकालत्वात् इत्यादावव्याप्तिवारणाय अन्यतरसम्बन्धेन तद्धर्मविशिष्टसम्बन्धित्वं विवक्षितं तत्र……क्षणे सत्तावान् जातेरित्यादौ समवायतादात्म्यान्यतरसम्बन्धेन साध्यतायां विशिष्टाभावमादायाव्याप्तिरतः इत्युक्तं ।

विवरणम् : रघुनाथशिरोमणिरचितावच्छेदकत्वनिरुक्तौ जागदीश्याष्टीकया उपरि क्रोडपत्रात्मकोनिबन्धोऽयं विनिर्मितः कालीशङ्करसिद्धान्तवागीशेन, अत्र विनिर्मातुर्नाम न वर्तते, किन्तु मुद्रितकालीशङ्करीयावच्छेदकत्वनिरुक्तिक्रोडपत्रान्तर्गतत्वादस्य विनिर्माता कालीशङ्करसिद्धान्तवागीश इत्यवधार्यते। अत्र यद्यपि नमस्कारपूर्वकग्रन्थारम्भदर्शनात् प्रारम्भवानयमिति भ्रान्तिर्व्युत्पत्तिमतामपि सहजत एवोत्पत्तुमर्हति, तथापि मुद्रितग्रन्थे प्राचीनग्रन्थान्तरे च इतः प्रागपि ग्रन्थवाहुल्यदर्शनेन नायं प्रारम्भवानिति निर्व्यूढमवगन्तव्यम्। समाप्तिरप्यस्य न विद्यते। पराचीनोऽयम्। अन्तिमपत्रमेतदीयं पत्राङ्करहितमुपलभ्यते। मुद्रणमस्य सकृदेव समजनिष्ट चौखम्बामुद्रणयन्त्रतः।

637

1723 अवच्छेदकत्वनिरुक्ति-पक्षता-जागदीशी-पत्रिका।

Avacchedakatvanirukti-Pakṣatā-jāgadīsī-patrikā.

By Unknown author.

Substance : Country-made yellow paper. Size 16½×3¼ inches. Folia 21 (By counting). Written in Bengali character. 10-12 lines in a page. Extent about 1,428 ślokas. Appearance old and worn out. Prose. Incomplete in the middle. Condition good. Date n d. Unpublished.

Beginnig : श्रीभवानी। तथाविधाभावप्रतियोगितासामान्यशून्यत्वमप्रसिद्धं सर्वस्यैव वस्तुनस्तादृशयावत्वावच्छिन्नाभावप्रतियोगिसत्त्वात् अत उक्तं यत्किञ्चिदिति जगदीशः।

End : जगदीशेन तु अनुमानातिरिक्त इत्यस्य यथाश्रुतवक्ष्यमाणार्थमेव प्रायशः कृतः।

Colophon : इति शङ्करी पक्षता जागदीशीप(त्रि?)का ॥१॥६॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विवरणम् : तार्किकमुर्द्धन्यरघुनाथशिरोमणिरचितावच्छेदकत्वनिरुक्तेरनुमानचिन्तामण्यन्तर्गतपक्षतादीधितेश्च जागदीशीटीकाया उपरि क्रोडपत्रात्मकोनिबन्धोऽयं व्यरचि केन चनाज्ञातनाम्ना नैयायिकेन। अयं मध्ये खण्डितः। पत्राणि प्रायेणैव पत्राङ्करहितानि। व्यक्तिद्वयेनास्य लिपिर्विनिर्मिता। क्वचित् क्वचिन्मसीलोपोपक्रमः संवृत्तः। अस्य पुष्पिकायां "इति शाङ्करी पक्षताजागदीशीपत्रा"(?) इति लिखितमस्ति। एतेनैव प्रतीयते शङ्करनामधयः कश्चिदेवास्य रचयितेति। पत्राणि प्रायः सर्वाण्येव व्युत्क्रमेणावतिष्ठन्ते। प्राचीनतां जीर्णताञ्च समुपागतोऽयम्। प्रकाशनमस्य न जातम्।

638

228 अवच्छेदकत्वनिरुक्ति-पत्रिका।

Avacchedakatvanirukti-patrikā.

By Unknown author.

Substance: Machine-made white paper. Size $15\frac{1}{2} \times 3\frac{1}{2}$ inches. Folia 4 (1a-4a). 4-8 lines in a page. Extent about 100 ślokas. Neatly written in Bengali character. Appearance fresh. Prose. Generally correct. Incomplete at tbe end. Date nd. Unpublished.

Beginning: इहानवच्छेदकत्वमित्यत्रावच्छेदकत्वमवच्छेदकत्वपदार्थः इति जागदीशी, तत्र इहेति दीधिति उक्तानुकरणं तस्यार्थमाह अनवच्छेदकत्वमित्यत्रेति, तेन प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्येत्यादौ स्वरूपसम्बन्धावच्छेदकरूपावच्छेदकत्वनिवेशेपि न बाधः।

End: अत्रेयमनुपपत्तिर्हेतुमन्निष्ठाभाव प्रतियोगितावच्छेदक इन्धन...... ।

विवरणम्: अवच्छेदकत्वनिरुक्तेर्जागदीश्याष्टीकाया उपरि क्रोडपत्रात्मकमिदं पुस्तकम्। अत्र पुस्तककर्त्तुर्नाम नोपलभ्यते। अवच्छेदकत्वनिरुक्तेर्मुद्रितेन कालीशङ्कररचितक्रोडपत्रेण सममस्य किञ्चिदपि साम्यं न परिलक्ष्यते। अमुद्रितमिदम्।

639

216 अवच्छेदकत्वनिरुक्तिपत्रिका।

Avacchedakatvaniruktipatrikā.

By Ramākānta Bhaṭṭācārya.

Substance: Country-made reddish paper. Size $15\frac{5}{8} \times 3\frac{1}{4}$ inches.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Folia 2(1a-2b). Neatly written in Bengali character. 8-10 lines on a page. Extent 72 ślokas. Appearance old. Prose. Generally correct. Complete. Date nd. Unpublished.

Beginning : अवच्छेदकनिरुक्तेः। अथ हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकस्य ताध्यतावच्छेदकताघटकसम्बन्धेनाभाववदवृत्तित्वं पारिभाषिकावच्छेदकत्वमित्युक्तौ धूमत्वप्रकारकप्रमाविशेष्यवान् वह्नेरित्यादौ जगदीशेनातिव्याप्तिर्दत्ता। तत्रेयमाशङ्का-साध्यतावच्छेदकताघटकसम्बन्धेन तादृशावच्छेदकाभाववति प्रतियोगितावच्छेदकताघटकसम्बन्धेनावृत्तित्वमेव वक्तव्यम्। अन्यथा......

End : तस्य विशेषनिरुक्तौ ग्रन्थकर्तै(?)रवक्तव्यत्वादिति ॥

Colophon : अवच्छेदकनिरुक्तेः ॥ श्रीमृत्युञ्जयशर्म्मणः स्वाक्षरञ्च।

विवरणम् : अवच्छेदकत्वनिरुक्तर्जागदीश्याष्टीकायाः स्थलमेकमुपजीव्य क्रोडपत्रात्मकोऽयं निबन्धोऽव्यरचि रमाकान्तभट्टाचार्येण। विचारचातुर्यमस्य काञ्चिन्नवीनतामाधत्ते, अयं खल्वमुद्रितः।

640

1636 अवच्छेदकत्वनिरुक्तिवादार्थः

Avacchedakatvaniruktivādārtha.

By Unknown author.

Substance: Country-made reddish and yellow paper. Size 16 × 3 inches. Folia 5 (by counting). Neatly written in Bengali character. 9-10 lines in a page. Extent about 60 ślokas. Appearance old and torn. Prose. Generally correct. Incomplete at the end. Condition not good.

There is a square blank space in the middle of each page. Date nd.

Beginning : [१ (क) पृः] यद्यत्सम्बन्धेन यद्धर्मविशिष्टं तदवच्छिन्नाभाववत्यसम्बन्धं तत्सम्बन्धावच्छिन्नतद्धर्मावच्छिन्नविशेष्यताभिन्न साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नविशेष्यतावच्छेदकत्वं साध्यतावच्छेदके निवेशनीयमित्यत्र

End : यदेकत्वत्वं तद्विशिष्टावच्छिन्नपर्य्याप्तिकत्वं घटत्वादेरपीति घटाभावमादायैव तद्रूपवान् एतद्रसात् इत्यादावव्याप्तिवारणमिति वाच्यं तथाविवक्षणे तार्णतार्णोभयवान्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तद्धूमादित्यादावतिव्याप्तिप्रसङ्गात्   तार्णातार्णोभयत्वपर्य्याप्त्यवच्छेदकतावच्छेदक·········

[६ (ख) पृः]

विवरणम् : रघुनाथशिरोमणिरचितावच्छेदकत्वनिरुक्तिनामकनिबन्धस्य जागदीश्याः टीकायाः कतिपयस्थलान्याहृत्य तेषामुपरि केनचनाज्ञातनामधेयेन नैयायिकेन क्रोडपत्रात्मको-निबन्धोऽयं व्यरचि । नेयं कृतिः कालीशङ्करसिद्धान्तवागीशस्योभयोर्मध्ये महतोभेदस्य व्यक्तमुपलभ्यमानत्वात् । अयं प्राचीनश्छिन्नश्च संवृत्तः । पञ्चमपत्रस्याभावोऽत्र परिलक्ष्यते । चतुर्थपत्रेण तृतीयपत्रस्य काऽपि सङ्गतिर्नोपलभ्यते । समाप्तिरहितस्यास्य प्रकाशनं न जातम् ।

641

290 अवच्छेदकत्ववादार्थः ।

Avacchedakatvavādārtha.

By Rāmatanu Nyāyabhuṣaṇa.

Substance: Country-made reddish paper. Size 16 × 3½ inches. Folio 1(1a-1b). Neatly written in Bengali character. 9 lines on the first paga and 8 on the second page. Extent about 34 ślokos. Appearance old and torn. Prose. Date n. d. Unpublished.

Beginning : श्रीकृष्णाय नमः । तदवच्छिन्नाभाववदसम्बन्धस्त्वविशिष्टस्वामान्यकत्वमिति कल्पे हेतुमन्निष्ठाभावप्रतियोगितावच्छिन्नाभाववदसम्बन्धं

End : धर्मत्वप्रकारकप्रमाविशेष्यवान् वह्नेरित्यादावतिव्याप्तिदोषस्यायोगोलकावृत्तित्वावच्छिन्नाभावमादाय वारणं सम्भवतीति पूर्व्वपक्षोऽपि निरस्तमिति प्राहुः ॥

Post Colophon : श्रीरामचन्द्राय नमः ॥ श्रीकृष्णः शरणम् ॥

विवरणम् : अवच्छेदकत्वनिरुक्तावनतिरिक्तवृत्तित्वनिर्वचनावसरे रघुनाथशिरोमणिना यदुक्तं "तदवच्छिन्नप्रतियोगिताकाभाववदसम्बद्धस्वविशिष्टसामान्यकत्व" तस्योपरि समुत्थापितोऽयं वादार्थो निबन्धकारेण अत्र तावद्विचारचातुर्यं किञ्चिद्विद्यते । किन्त्वभिनवत्वं नानुभूयते । अयं प्राचीनश्छिन्नश्च संवृत्तः । अमुद्रितोऽयम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

642

20 अवयवगादाधरीटीका।

Avayavagādādharīṭīkā.

By Gadādhara Bhaṭṭācārya.

Substance: Country-made yellow paper. Size $19\frac{3}{4} \times 3\frac{1}{2}$ inches. Folia 8(1b-8b). Neatly written in Bengali character. 4-9 lines in a page. Extent about 152 ślokas. Appearance fresh. Prose. Generally correct. Incomplete at the end. Date n. d. Printed and published by the Chowkhamba Sanskrit Series.

A commentary on the Cintāmaṇi Didhiti of Raghunātha by Gadādhara Bhaṭṭāchārya.

Beginning: ॐ नमः शिवाय। अनुमानं निरूप्य न्यायतदवयवनिरूपणं प्रतिजानीते तच्चेति।

End: तादृशबोधजनकत्वस्य लक्षणत्वाभिप्रायेण व्यावृत्तिदानात् अत्र यथाश्रुतलक्षणमुक्तरीत्या हेत्ववयवादौ अतिप्रसङ्गदोषेण दुष्टमिति ध्येयम्।

विवरणम्: तत्त्वचिन्तामण्यनुमानखण्डीयावयवप्रकरणस्य दीधित्याख्यव्याख्यानोपरि टीकारूपोऽयं निबन्धः। रचयिताऽस्य गदाधरभट्टाचार्यः। अत्रावयवत्वं नाम न्यायावयवत्वम्। तच्च अनुमितिचरमकारणलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकवाक्यत्वम्। न्यायान्तर्गतत्वे सति प्रतिज्ञाद्यन्यतमत्वमित्यर्थः। न्यायान्तर्गतत्वञ्च-तादृशानुपूर्वीविशेषप्रकारकनिश्चयत्वसमनियतकारणतावच्छेदकविषयिताकत्वम्। प्रतिज्ञाद्यन्यतमत्वञ्च प्रतिज्ञात्वाद्यवच्छिन्नानुयोगिताकभेदप्रतियोगितावच्छेदकं यद्यत् तदवच्छिन्नप्रतियोगितावच्छेदको यः प्रतिज्ञादिभेदपञ्चकानुयोगितावच्छेदकं यद् यद्रूपं तदवच्छिन्नानुयोगिताकभेदप्रतियोगितावच्छेदकीभूतोधर्म्मस्तद्वत्त्वम्। अवयवास्तावत् प्रतिज्ञा-हेतूदाहरणोपनय-निगमनभेदात् पञ्चविधाः। सूक्ष्मविचारमुखेन पञ्चविधत्वमवयवानामत्र प्रतिपादितं निबन्धकृता। ग्रन्थोऽयं समाप्तिविहीनः। मुद्रितोऽयमनेकत्र।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

643

29 अवयवगादाधरीटीका ।

Avayavagādādharīṭīkā.

By Gadādhara Bhaṭṭācārya.

Substance: Country-made yellow and reddish paper. Size $19 \times 3\frac{1}{2}$ inches. Folia 19. Neatly written in Bengali character. 4-9 lines on a page. Extent about 333 ślokas. Appearance old. Prose. Generally correct. Incomplete. Date n. d. printed.

Beginning: तमत्व', न च प्रतिज्ञाद्यवच्छिन्नप्रतियोगिताकभेदानुयोगितानवच्छेदकं सत् प्रतिज्ञात्वाद्यवच्छिन्नानुयोगिताकभेदप्रतियोगितावच्छेदकं यत् समुदायत्व' तद्वत्त्व' कुतो नोच्यते लाघवादिति वाच्यम् ।

End: चेन्न, पक्षतावच्छेदकावच्छिन्नमुख्यविशेष्यतानिरूपितविषयतानिरूपिता या विषयता तन्निरूपितविषयतानिरूपितविषयतायां विशेषणविषया प्रकृतानुमितिजनकतावच्छेदकतायाः पर्य्याप्त्यधिकरणधर्मत्वेन हेतुव्यापकताविशिष्टसाध्यविषयत्वसाध्याभावव्यापक......

विवरणम्: तत्त्वचिन्तामण्यनुमानखण्डीयावयवप्रकरणस्य दीधित्याख्यव्याख्यानव्याख्यापरोऽयं ग्रन्थः । ग्रन्थेऽस्मिन् लक्षणनिर्वचनमुखेन परार्थानुमानप्रयोजकीभूतन्यायावयवा आलोचिताः । अयं तावत् प्रारम्भ-समाप्तिविहीनः । वर्त्तन्तेऽन्तराऽन्तरा महान्तोविच्छेदाः । बहुव्यक्तिभिरेवास्य प्रतिलिपयः कृताः । प्रायेणैवात्र पत्राणि विशृङ्खलभावेनावस्थितानि विषमाणि च सन्ति ।

In the Ms. some folia are set in a haphazard manner. For description of contents see cat. no. 642.

644

987 अवयवगादाधरी टीका ।

Avayava-gādādharī ṭīkā.

By Gadādhara Bhaṭṭācārya.

Substance: Country-made yellow paper. Size 18×4 inches. Folia 4 (By counting). Written in Bengali character. 5-9 lines

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

in a page. Extent about 189 ślokas. Appearance fresh. Prose. Generally correct. Incomplete at the beginning and the end. Date n. d. Published.

There is a square blank space in the middle of each page.

This is the same as our cat. no. 642.

A commentary on the Cintāmaṇi dīdhiti of Rghunāth by Gadādharā Bhaṭṭācārya. In the Ms. folia are not marked by the serial no.

Beginning : साध्यपदमनुमितिविधेयवाचकमित्यभिप्रायेण मणिकारदूषितं सूत्रकारीयप्रतिज्ञालक्षणं साध्यपदस्य पक्षतानुमितिविधेयविशिष्टार्थपरतां स्वीकृत्य परिस्कर्त्तुमारभते साध्येति ।

End : न चैवमपि निगमनीयतस्मादित्यतिरिक्तांशेऽतिव्याप्तिदुर्वारैवेति वाच्यं तस्मादित्यंशार्थमनन्तर्भाव्य व्यवहितयोः पक्षसाध्यवद्वाचकयोरन्वयबोधाजनकत्वादितिरीत्या उक्तस्थलेपि व्यावृत्तिदानसङ्गति··· । अयं पदाननुषङ्गपक्षे निगमनेऽनतिरिक्तविषयकत्वस्य

विवरणम् : निबन्धोऽयमाद्यन्तरहितः । पत्राण्यस्य पत्राङ्करहितानि । अत्रत्यप्रथमपत्रे क्षुद्राष्टिप्पन्योवर्तन्ते । मध्यकालीनोऽयम् । ६४२ शूची द्रष्टव्या ।

For description of contents see cat no. 642.

645

1120 अवयव-गादाधरी टीका ।

Avayava-gādādharī ṭikā.

By Gadādhara Bhaṭṭācārya.

Substances : Country-made yellow paper. Size 17¾ × 4 inches. Folia 42 (16a-57b)- Neatly written in Bengali character. 8 lines in a page. Extent about 1,444 ślokas. Appearance old. Prose. Correct. Incomplete at the beginning and the end. Condition good. Date not mentioned. Published. It is with marginal notes.

There is a square blank space in the middle ofeach page.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

This is the same as our cat. no. 642.

Beginning : [१६(क)] पनयार्थं याप्तिशरीरघटकसाध्यस्य धर्मितावच्छेदकाप्रवेशात् निगमनजन्यबोधे च साध्यांशे हेतुज्ञानज्ञाप्यत्वस्याधिकस्य भानात् अन्यथा बोध्यांशे शुद्धसाध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहित्वानिवेशे पक्षतावच्छेदकान्तर्भावेऽप्यनुषङ्गपक्षेऽनिस्तारादित्युदाहरणमालानुसरणं।

End : एवञ्च ज्ञानविशिष्टार्थकात्मादिपदघटितात्मा न द्रव्यमित्यादिवाक्यात् पदार्थैकदेशे ज्ञाने द्रव्यभेदान्वयवारणाय दण्डजन्यो न दण्डजन्यइत्यादिवाक्यात् पदार्थैकदेशे जन्यत्वादौ दण्डजन्यभेदाद्यन्वयबोधवारणाय च कल्पनीये ज्ञानाद्यंशे इतरान्वयबोधे स्वतन्त्रज्ञानाद्युपस्थितिहेतुत्वे कार्यतावच्छेदककोटिप्रविष्टेतरविषयतायां विषयत्वादिसम्बन्धावच्छिन्नप्रकारत्वान्यत्वं विशेषणं देयं। वस्तुतोज्ञानादिविषयकशाब्दबोधे स्व…[५७(ख) पृः]

विवरणम् : ग्रन्थोऽयं प्रारम्भसमाप्तिरहितः पराचीनतामुपागतश्च। "साध्यनिर्देशः प्रतिज्ञेति सूत्रम्। साध्यो-विधेयधर्मविशिष्टोधर्मी" इत्यादि "नव्यास्तु पञ्चम्या ज्ञानज्ञाप्यत्वलक्षणयैवोपपत्तौ न प्रातिपदिकेऽपि लक्षणा। आकाङ्क्षावैचित्र्याच्च पदार्थैकदेशेऽपि ज्ञाने प्रातिपदिकार्थो विषयत्वेनान्वेति" इत्यन्तस्य हेतुरूपावयवनिर्वचनपरदीधितिग्रन्थस्य गादाधरो व्याख्याऽत्र वर्त्तते। प्रायः प्रतिपत्रं पार्श्वभागेषु क्षुद्राः टिप्पन्योऽवतिष्ठन्ते।

There are some ocasional nots in the margin. For description of contents see cat no. 642.

646

1121 अवयव-गादाधरी टीका।

Avayava-gādādharī ṭīkā.

By Gādādhara Bhaṭṭācārya.

Substance : Country-made yellow paper. Size $19\frac{1}{2} \times 4$ inches. Folia 34 (1a-34b). Neatly written in Bengali character. 8 lines in a page. Extent about 1,407 ślokas. Appearance old. Prose. Generally correct. Incomplete at the end. Condition good.

There is a square blank space in the middle of each page. Date n. d. Published.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

This is the another copy of our previous cat. no. 642 already noticed.

Beginning : ओं नमो गणेशाय। अनुमानं निरूप्य न्यायतदवयवनिरूपणं प्रतिजानीते मूले तच्चेति।

End : एतेन तादृशवैशिष्ट्यनिरूपकविषयत्वानिरूपितत्वं तादृशविषयतावहिर्भूतत्वं तच्च न वैशिष्ट्याविषयतासाधारणं तन्निरूपितप्रकारताविशेष्यतानिरूपितत्वमादाय तन्निरूपित-विशेष्यता प्रकारतासा··· [३४(ख) पृः]

विवरणम् : उपलभ्यमानेऽस्मिन् समाप्तिरहिते ग्रन्थेऽवयवीयदीधितेः प्रथमतः किञ्चिदूनप्रतिज्ञानिर्वचनपर्यन्तग्रन्थस्य गदाधरविनिर्मितं व्याख्यानमात्रमवतिष्ठते। ६४२ सूची द्रष्टव्या।

The manuscript ends towords the end of the Pratijñālākṣana. For descriotion of contents see cat no. 642.

647

1139 अवयव-गादाधरी टीका।

Avayava-gādādharī ṭikā.

By Gadādhara Bhaṭṭācārya.

Substances : Country-made yellow paper. Size $17\frac{3}{4} \times 4$ inches, Folia 11 (By counting). Neatly written in Bengali character. 6-8 lines in a page. Extent about 386 ślokas. Appearance old. Prose. Generally correct. Incomplete at the beginning and in the middle. Condition good.

There is a square blank space in the middle of each page. Date n. d. Published,

This is another copy of our previous cat no. 642.

A commentary on the Cintāmaṇi didhiti of Rghunātha by Gadādhara Bhaṭṭācārya.

Beginning : १५(क) पृः] प्रयुक्त्यनवकाशात् एकैकावयवजन्यबोधवृत्तिजाती-रुपमादाय स्वरूपयोग्यताघटितलक्षणस्य निर्दोषत्वेपि उभयावयवादिजन्यबोधे तत्तज्ज्ञात्वभाव निर्वाहकप्रतिवध्यप्रतिबन्धकभावकल्पने महागौरवात्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

End : व्युत्पत्तिविरोध एव न कथमित्याशङ्कायामाह वुद्धिस्थवाचकादिति । बुद्धि-प्रकारेषु एकशतेरित्यर्थः । व्युत्पत्तिविरोधं दृष्टान्तेन द्रढयति यथेति ॥

Colophon : इत्यवयवदीधितिगादाधरी टीका सम्पूर्णा ॥

विवरणम् : अयं प्रारम्भरहितो मध्ये च खण्डितः । १-१४, १६-४२, ४४-४७ पत्राणि न वर्तन्ते । अस्यान्तिमेषु पत्रेषु पत्राङ्का नोपलभ्यन्ते । ६४२ सूची द्रष्टव्या ।

For description of contents see cat no. 642.

648

1497 अवयव-गादाधरीटीका ।

Avayavagādādharīṭīkā.

By Gadādhara Bhaṭṭācārya.

Substance : Country-made yellow paper. Size 17¼ × 4½ inches. Folia 20(1a-20b). Neatly written in Bengali character. 7-11 lines in a page. Extent about 750 ślokas. Appearance old and worn out. Prose. Generally correct. Incomplete at the end. Condition bad.

There is a square blank space in the middle of each page. Date not mentioned. Published.

This is another copy of our previous Cat No 642 already noticed.

Beginning : ॐ दुर्गायै नमः । अनुमानं निरूप्य न्यायतदवयवनिरूपणं प्रति-जानीते मूले तच्चेति ।

End : निगमने च पञ्चवाचकपदमनुषज्यते इति तद्वारणमनतिरिक्तप्रयोजनमिमत(?) मनुसृत्य लघुशरीरमनतिरिक्तविषयकत्वं निर्वक्ति प्रकृतेति प्रकृतहेतुरूप्रकृतसाध्यसिद्धयौपयिकी व्याप्तिः तदविषयक...[२०(ख) पृः]

विवरणम् : समाप्तिरहितोऽयं ग्रन्थः । अत्रावयवप्रकरणीय दीधितेः प्रथमतः किञ्चिदूनहेतुरूपावयवनिर्वचनपर्यन्तग्रन्थस्य व्याख्यानमात्रमवतिष्ठते । अयं प्राचीनोजीर्णश्च । अस्य प्रायः प्रतिपत्रमेवमसीलोपोपक्रमः संवृत्तः । ६४२ सूची द्रष्टव्या ।

For description of contents see cat no 642.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

649

71 अवयवगादाधरीटीका ।

Avayavagādādharīṭīkā.

By Gadādhara Bhaṭṭācārya.

Substance : Country-made yellow paper. Size $18\frac{3}{4} \times 3\frac{1}{2}$ inches. Folia 39(20a-58a). Neatly written in Bengali character. 7-8 lines in a page. Extent about 1176 ślokas. Appearance old. Prose. Generally correct. Incomplete at the beginning. Date n. d. Printed.

There is a square blank space in the middle of each page.

A commentary on the Cintāmaṇi dīdhiti of Raghunātha by Gadādhara Bhaṭṭācārya.

Beginning : (२० क पृः) कत्वांशवैयर्थ्यापत्तेः नहि साध्यतावच्छेदकावच्छिन्नसाध्यविशिष्टप्रकृतपक्षतावच्छेदकावच्छिन्नविषयतावहिर्भूतविषयता अनुमितिनिरूपिता इति समूहालम्बनानुमितिनिरूपितविषयतात्वमादाय नातिप्रसङ्गावकाशः । प्रकृतपरामर्शजन्यतावच्छेदकविषयतात्वस्यैव निवेशनीयत्वात् ।

End व्युत्पत्तिविरोध एव न कथमित्याकाङ्क्षायामाह बुद्धिस्थवाचकत्वादिति (१) बुद्धिप्रकारकवत्सु सर्वेषु ऐकशक्तेरित्यर्थः(१) व्युत्पत्तिविरोधं दृष्टान्तेन द्रढयति यथेति ।

Colophon : इतिमहामहोपाध्याय श्रीगदाधरभट्टाचार्य्यविरचितावयवटिप्पना सम्पूर्णा ।

विवरणम् : निबन्धोऽयं प्राचीनः प्रारम्भविहीनश्च । एतदीय पत्रप्रान्तभागाः प्रायेणैव सलिलसंश्लेषजचिह्नान्विताः परिदृश्यन्ते । अस्य क्रोडेऽवयवगादाधर्य्याष्टीकायाः क्रोडपत्रमेकमवतिष्ठते । ६४२ सूची द्रष्टव्या ।

650

559 अवयवगादाधरीपत्रिका ।

Avayavagādādharīpatrikā.

By Unknown author.

Substance : Country-made yellow paper. Size $19\frac{3}{4} \times 3\frac{3}{4}$ inches. Folia 6(1a-6b). Neatly written in Bengali character. 8-9 lines in

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

a page. Extent about 317 ślokas. Appearance old. Prose. Generally correct. Incomplete at the end. Date n. d. Not printed.

Beginning : वस्तुतो लिङ्गं लिङ्गत्वं तथा च प्रकृतहेतुतावच्छेदकावच्छिन्नस्य प्रकृतसाध्यावच्छिन्नतावच्छेदकगमकतौपयिकं यद् व्याप्तिविषयत्वं तत् शून्यत्वमर्थ इति दीधितिकृत् (?) ग्रन्थः। अथ किमिदं तादृशगमकतौपयिकत्वं इत्याशङ्क्य प्रकृतपक्षतावच्छेदकावच्छिन्नमुख्यविशेष्यतानिरूपितविषयतानिरूपिता या विषयता तन्निरूपिता या विषयता तन्निरूपितविषयतायां विशेषणविषया प्रकृतानुमितिजनकतावच्छेदकतावच्छेदकतापर्य्याप्त्यधिकरणे यो धर्मस्तद्धर्मावच्छिन्नविशेष्यत्वावच्छिन्नप्रतिबन्धकतावच्छेदकविषयतात्वेनैवोदाहरणजन्यबोधीयहेतुव्यापकसाध्यादिविषयतायाः संग्रहो बोध्यः इति भट्टाचार्य्येणोक्तं।

End : न चैतन्मते उदाहरणजन्यबोधे व्यापकत्वभानाप्रसक्त्या उदाहरणजन्यबोधे व्यापकत्वं न भासते इत्याद्यभिधानमसङ्गतमिति वाच्यं तदभिधानस्य एतन्मतमाश्रित्यैव दीधितिकारेण उदाहर......

विवरणम् : अवयवगादाधारीटीकामधिकृत्य अज्ञातनामधेयेन केनचिन्नैयायिकेन विनिर्मितोऽयं पत्रिकात्मकोनिबन्धः। (नायं कालीशङ्करसिद्धान्तवागीशरचितावयवगादाधरी पत्रिकापरग्रन्थान्तर्गतः।) अत्रत्य विचाररीतयस्तावन्नैयायिकानां सान्द्रानन्दविधायिन्यः। पत्राणामस्य चतुष्पार्श्वेषु वर्तन्ते सलिलसंश्लेषजचिह्नानि। अयं खलु पराचीनः, समाप्तिरहितोऽमुद्रितश्च।

651

552 अवयवगादाधरीपत्रिका।

Avayavagādādharīpatrikā.

By Unknown outhor.

Substance : Country-made yellow paper. Size $19\frac{3}{4} \times 3\frac{3}{4}$ inches. Folio 1. Neatly written in Bengali character. 7-9 lines in a page. Extent about 48 ślokas. Appearance old. Prose. Generally correct. Complete. Date n. d. Not printed.

Beginning : अथान्यूनानतिरिक्तविषयकबोधजनकत्वघटितप्रतिज्ञालक्षणे धूमादालोकवान् पर्वतोवह्निमानित्यादिस्थलीयहेतुवारणार्थमन्यूनविषयकत्वं अनुषङ्गपक्षे निगमनवारणाया-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नतिरिक्तविषयकत्वं उक्तं अनन्तुषङ्गपक्षे सत्यन्तस्यावयवाघटकन्यायान्तर्गतत्वपरतया हेत्वन्तस्यायमादिनिगममान्तस्य च वारणाय तदिति दीधितिकारेणोक्तं ।

End : न च दोषतावच्छेदकावच्छिन्नविषयिताशून्यभ्रमात्मकज्ञाने प्रतिबन्धकत्वस्य वृत्तेरसम्भव इति वाच्यं तादृशभ्रमान्यज्ञानावृत्तित्वस्य प्रतिबन्धकतायां विशेषणीयत्वात् एतेन प्रथमलक्षणे यथार्थपदवैयर्थ(?)रूपदूषणस्यापि नावकाश इति ।

विवरणम् : मूलावयवप्रकरणीयदीधित्यभिधव्याख्यानांशविशेषस्योपरि विरचितोऽयं पत्रिकापरोनिबन्धोऽज्ञातनामधेयेन केनचिन्नयायविदा । अस्यान्तिमांशस्तु सामान्यनिरुक्तिगादाधर्याः टीकाया अंशविशेषमधिकृत्य विनिर्मितोऽमुनैव जनेन । पत्रप्रान्ते "अवभप" इत्यङ्कितमास्ते । तदनुसारेणैवास्य अवयवगादाधरी-पत्रिकेति नाम कृतम् । वस्तुतस्तु नायमवयवगादाधरी-पत्रिकात्मकः, अपितु अवयवदीधिति-सामान्यनिरुक्तिगादाधर्यंशविशेषपत्रिकात्मक एवावगन्तव्यः । पराचीनोऽयममुद्रितश्च ।

652

1632 अवयवगादाधरीपत्रिका ।

Avayavagādādharīpatrikā.

By Unknown author.

Substance: Country-made yellow paper. Size 20 × $3\frac{3}{4}$ inches. Folia 2 (by counting). Neatly written in Bengali character. 8-9 lines in a page. Extent 72 ślokas. Appearance old. Prose. Generally correct. Incomplete towards the beginning. Condition not good.

Date not mentioned. Unpublished.

Beginning : [७ (क) पृः] ...णातिव्याप्तिरुक्ता(?) न तु व्यापकसामानाधिकरण्यरूपव्याप्तिविशिष्ट हेतुमत्त्वबोधकोपनयस्वीकर्तृमते इत्यावेदयितुं तथाविधानसङ्गतेः ।

End : परन्तु एवाव्यहि(?)तोत्तरत्वस्यावश्यकत्वे विषयविषयित्वस्य कार्य्यतावच्छेदकप्रवेशोनिष्प्रयोजनक इति कथं तादृशविषयताघटितशाब्दत्वे पर्य्याप्तिः सम्भवतीति विचारणीयं ॥०॥

विवरणम् : अनुमानचिन्तामण्यन्तर्गतावयवप्रकरणीयाया दीधितेष्टीकाया गादाधर्याः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्थलद्वयमाहृत्य तदुपरि फक्किकापरं निबन्धमिमं प्रणिनाय कश्चनाज्ञातनामधेयो नैयायिकः। प्रारम्भरहितोऽयं निबन्धः। प्राचीनस्यास्य पत्रप्रान्तभागाः सलिलसम्पर्कजचिह्नसम्पृक्ताः। अन्तिमपत्रं पत्राङ्कवर्जितमुपलभ्यते। प्रथमपत्रेण द्वितीयपत्रस्य काऽपि सङ्गतिर्न परिलक्ष्यते। मुद्रणमस्य न जातम्।

653

524 अवयवगादाधरी-पत्रिका।

Avayavagādādharī-patrikā.

By Unknown author.

Substance: Country-made yellow and raddish paper. Size 19 × 3½ inches. Folia 5 (1a-5b). 7-9 lines in a page. Extent about 210 ślokas. Character Bengali. Appeaance old. Prose. Generally correct. Incomplete at the beginning and at the end. Date n. d.

Beginning: ......ञ्चित्ज्ञानीयविषयताश्रयवर्णत्वव्यापकसमुदायत्वं न्यायत्वमिति भट्टाचार्येण लिखितं। तत्र पर्वतोवह्निमानित्याद्येकविधशाब्दबोधे पर्वतोवह्निमान् पर्वतो-दहनवानित्यादिनानाविधानुपूर्वीप्रकारकवाक्यज्ञानानामेव हेतुताया(?) तावत् कारणताव-च्छेदककोटिप्रविष्टयत्किञ्चित् ज्ञानीयविषयताश्रयवर्णत्वं नैकानुपूर्वीवाक्यसमुदाय इति प्रथमं यत्किञ्चिदिति।

End: एवं सति पक्षतावच्छेदकावच्छिन्नमुख्यविशेष्यतानिवेशेऽपि गोत्वाभाववत्व-प्रमेयव्यापकवाच्यत्ववत्(?) साध्याभाववान(?) गोत्वाभावादित्यादिस्थलीयप्रतिज्ञायामव्याप्ते-र्दुर्वारत्वात् तादृशस्थलीयान्वयपरामर्शीयप्रमेयत्वव्यापकवाच्यत्वप्रकारतानिरूपितसाध्याभाव-निरूपितविशेष्यता अपि निरुक्तरूपवद्विषयतया(?) तादृशरूपवद्विषयतया तादृशाप्रति-ज्ञायाः साध्या···

विवरणम्: अज्ञातकर्तृकोऽयं ग्रन्थोऽवयवगादाधर्याष्टीकायाः क्रोड़पत्रात्मकः। अयं नाम प्रारम्भसमाप्तिविहीनः। अत्रत्यं पत्रत्रयं पीताभं पत्रद्वयञ्च रक्ताभम्। एतदीया प्रतिलिपिस्तावद् व्यक्तिद्वयेन विनिर्मिता। अस्य प्रत्रप्रान्ते "अवयवभटी" इत्यङ्कितमस्ति। वस्तुतस्तु नायं ह्यवयवटीकात्मकः; अपित्ववयवभटीकायाः क्रोड़पत्रपर इत्यवगन्तव्यम्। क्वचित् पत्रपार्श्वे टिप्पनी वर्तते। पराचीनोऽयममुद्रितश्च।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

654

1656 अवयव-गादाधरीपत्रिका।

Avayava-gādādharī-patrikā.

By Unknown author.

Substance : Country-made yellow paper. Size $18\frac{1}{4} \times 3\frac{1}{2}$ inches. Folia 4 (1a-4b) Neatly written in Bengali characrer. 7-8 lines in a page. Extent 170 ślokas. Appearance old and wornout. Prose. Generally correct. Incomplete at the end. Condition not good. Date n. d. Unpublished.

Beginning : ओं नमः। अत्र लक्षणे उदाहरणैकदेशेऽतिव्याप्तिस्थिता(?) तदुपरि नच जनकतैवान्यतमत्वेन निवेशनीया तच्छरीरे उदाहरणीयजनकता...।

End : प्रत्यक्षं प्रति भिन्नविषयकानुमितिसामग्रयाः पक्षताविशिष्टपरामर्शत्वेन प्रतिबन्धकतया एतादृशप्रति... [४(ख) पृः]

विवरणम् : अनुमानचिन्तामणयन्तर्गतावयवप्रकरणस्य गादाधर्याः टीकायाः कतिपयस्थलान्याहृत्य तेषामुपरि क्रोड़परं पत्रिकानामधेयं निवन्धमिमं रचयाञ्चकार कश्चन नैयायिकः। अस्य विचारशैली न प्रौढ़नैयायिकमनोमोदजननी। अयं समाप्तिरहितः प्राचीनश्च। अन्तिमपत्रस्य (ख) पृष्ठायामपश्चियमाणा मसी समुपलभ्यते। द्वितीयपत्रस्य दक्षिणप्रान्तभागः किञ्चिच्छिन्नोवर्तते। प्रकाशनमस्य न जातम्।

655

336 अवयव-गादाधरी वादार्थः।

Avayava-gādādharī vādārthaḥ.

By Unknown author.

Substance : Country-made yellow and reddish paperr. Size $19 \times 3\frac{1}{2}$ inches. Folia 4 (4a-7b). 8-10 lines in a page. Extent 240 ślokas. Neatly written in Bengali character. Appearance fresh. Prose. Generally correct. Incomplete at the beginning and the end. Date n. d. Not printed.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Beginning : छिन्नगमकतौपयिकं यद्व्याप्तिविषयित्वं तच्छून्यत्वमर्थः इति कतोग्रन्थः(?)। अथ किमिदं गमकतौपयिकत्वमित्याशङ्क्य प्रकृतपक्षताबच्छेदकावच्छिन्नमुख्य-विशेष्यतानिरूपितविषयतानिरूपिता या विषयता तन्निरूपितविषयतानिरूपितविषयतायां विशेषणविधया प्रकृतानुमितिजनकतावच्छेदकतापर्याप्त्यधिकरणो यो धर्मस्तदवच्छिन्नविषयत्वा-वच्छिन्नप्रतिबन्धकतावच्छेदकविषयतात्वेनोदाहरणजन्यबोधीय हेतुव्यापकसाध्यादिविषतायाः संग्रहोबोध्य इति भट्टाचार्येणोक्तः(?)।

End : प्रतिज्ञात्वाद्यवच्छिन्नानुयोगिताकभेदप्रतियोगितावच्छेदकत्वे सति प्रतिज्ञात्वाद्य-वच्छिन्नप्रतियोगिताकभेदपञ्चकानुयोगितावच्छेदकं यद् यद् वर्णत्वावच्छिन्नतानुयोगिताकभेद-प्रतियोगितावच्छेदकं यद्यत्तत्तद्धर्मावच्छिन्नप्रतियोगिताकभेदानुयोगितावच्छेदकं तत्समुदायत्वं तद्वत्त्वं ऽतिज्ञाद्यन्य…(७ पृः)

विवरणम् : अज्ञातकर्तृकेयं पुस्तिकाऽवयवगादाधर्यांष्टीकाया उपरि फक्किकात्मिका। प्रारम्भसमाप्तिरहिता। पत्रचतुष्टयमात्रमत्रवर्तते। तत्र पत्रत्रयं पीतमवशिष्टन्त्वीषद्-रक्ताभम्। अमुद्रितेयम्।

656

1699 अवयवगादाधरीवादार्थः।

Avayavagādādharīvādārthaḥ.

By Unknown author.

Substance : Country-made yellow paper. Size 18¼ × 3½ inches. Folia 19(1a-19b). Neatly written in Bengali character. 7-10 lines in a page. Extent about 550 ślokas. Appearance old. Prose. Generally correct. Complete. Condition good. Date n. d. Unpublished.

Beginning : श्रीकाली जयति। अथ यत्किञ्चित्तादृशशाब्दबोधनिरूपिता या या कारणता तदवच्छेदककोटिप्रविष्टयत्किञ्चिज्ज्ञानीयविषयताश्रयवर्णत्वव्यापकसमुदायत्वमिति।

End : नञ्समभिव्याहारस्थले तादृशोद्देश्यताया भ्रमान्यज्ञानजन्यतावच्छेदकत्वा-भावो नञा बोध्यते ॥०॥

Colophon : इत्यवयवभट्टाचार्य्यवादार्थः समाप्तः ॥०॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विवरणम् : अनुमानचिन्तामरयन्तर्गतन्यायावयवप्रकरणस्य गादाधर्य्याष्टीकाया उपरि विनिर्मितोऽयं क्रोडपत्रात्मकोवादार्थः केन चनाज्ञाननाम्ना नैयायिकेन । अस्य रचनाशैली चमत्कारपदवीमधिरोढुमर्हति । विचारभङ्गी कालीशङ्करीयविचारभङ्गीमनुकरोति । अयं प्राचीनः । प्रतिपत्रमेवापस्त्रियमाणा मसी समुपलभ्यते । केषाञ्चित् पत्राणां प्रान्तभागाः सलिलसमासङ्गजचिह्नसम्पृक्ताः । प्रकाशनमस्य न जातम् ।

657

951 अवयवजागदीशीटीका ।

Avayavajāgadīśīṭikā.

By Jagadīśa Tarkālaṁkāra.

Substance : Country-made yellow paper. Size 18 × 3½ inches. Folia 38(1a-38b). Neatly written in Bengali character. 5-8 lines on a page. Extent about 1088 ślokas. Appearance old and worn out. Prose. Generally correct. Complete. Date n. d. Published.

There is a square blank space in the middle of each page.

Beginning : श्रीदुर्गायै नमः । मूलोक्तन्यायलक्षणस्याग्रे दुष्यतया स्वयं न्याय-लक्षणमाह उचितेति (१)

End : पञ्चम्यर्थान्वितोन प्रतिज्ञार्थः(?) किन्तु तदेशार्थ(?) इत्येव प्रागुक्तं न तु हेत्वर्थान्वितो न प्रतिज्ञार्थ इत्युक्तमित्याशयेनाह प्रायमिति ।

Colophon : इत्यवयवलक्षणटीप्पणी संपूर्णा ॥

Post-Colophon : नवद्वीपपुरे स्थित्वा पठितुं स्वेन पाणिना ।
पुस्तीं श्रीवनाथोमूमलिखद्यत्नतः स्वयं ॥

विवरणम् : अनुमानचिन्तामरयन्तर्गतावयवप्रकरणीयदीधितिमुपजीव्य श्रीजगदीश-भट्टाचार्यः प्रणिनायेमं टीकापरं निबन्धम् । अवयवत्वं नाम न्यायावयवत्वम् । तच्च "अनुमितिचरमकारणलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकशाब्दज्ञानजनकवाक्यत्वम् ।" विषयेऽस्मिन् सुविस्तृता समालोचनाऽत्र वर्त्तते । पत्रपार्श्वभागेषु क्षुद्राष्टिप्पन्य एव विद्यन्ते । क्वचित् क्वचिदपश्रियमाणा मसी परिलक्ष्यते । पराचीनत्वेन जीर्णत्वमुपागतोऽयम् । मुद्रणमस्य वारद्वयं समजनि ।

Jagadīśa's commentary on Avayavadīdhiti.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

658

960 अवयव-जागदीशी टीका ।

Avayava-Jāgadīśī ṭikā.

By Jagadīśa Tarkālaṁkāra.

Substance: Country-made yellow and reddish paper. Size 19½ × 3½ inches. Folia 35 (1a-35b). Neatly written in Bengali character. 8 lines in a page. Extent about 1352 ślokas. Appearance old. Prose. Generally correct. Complete. Date nd. Published.

There is a square blank space in the middle of each page.

Beginning: ॐ नमोदुर्गायै । मूलोक्तन्यायलक्षणस्याग्रे दुष्यतया स्वयं न्याय-लक्षणमाह उचितेति ।

End: उक्तप्रायमिति पञ्चम्यर्थान्वितो न प्रतिज्ञार्थः । किन्तु देशार्थ इत्येव प्रागुक्तं न तु हेत्वर्थान्वितो न प्रतिज्ञार्थ इत्युक्तमित्याशयेनाह प्रायमिति ॥

Colophon: इत्यवयवलक्षणटीप्पनी सम्पूर्णा ॥

विवरणम्: अनुमानचिन्तामणिमध्यवर्त्यवयवप्रकरणीय दीधितेर्व्याख्यापरोग्रन्थोऽयं व्यरचि श्रीमता जगदीशतर्कालङ्कारेण । अवयवो नाम न्यायावयवः । स च प्रतिज्ञा-हेतूदाहरणोपनयनिगमनभेदात् पञ्चविधः । अस्य लक्षणं तावत् "प्रतिज्ञाद्यघटकत्वे सति उभयघटकभागद्वयाघटितत्वम् । विषयेऽस्मिन् सूक्ष्मा सुविशदा च समालोचनाऽत्रव-तिष्ठते । क्वचित् क्वचिन्मसीलोपोपक्रमः संवृत्तः । प्राचीनतां समुपागतोऽयम् । व्यक्ति-द्वयेनास्य लिपिर्विनिर्मिता । चौखाम्बामुद्रणयन्त्रालयादस्य प्रकाशनं सकृदेव समजनि ।

659

408 अवयव-जागदीशी टीका ।

Avayava-Jāgadīśī ṭikā.

By Jagadīśa Tarkālaṁkāra.

Substance: Country-made yellow paper. Size 19½×3½ inches. Folia 5 (1a-5b). Neatly written in Bengali character. 8 lines in a

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

page. Extent about 237 ślokas. Appearance old and torn. Prose. Generally correct. Incomplete at the end. Date n d. Printed.

There is a square blank space in the middle of each page.

Beginning : ॐ नमोगणेशाय। मूलोक्तन्यायलक्षणस्यादूष्यतया स्वयं न्यायलक्षणमाह उचितेति।

End : विषयत्वत्वावच्छिन्नपक्षकप्रकृतसाध्यकानुमित्यन्यूनानतिरिक्तविषयकशाब्दधी··· त्वादित्याहुस्तच्चिन्त्य' (।) हेतोरिति (।) न च उक्तस्थलेऽनुमितावालकनिष्ठमेव धूमज्ञानज्ञाप्यत्वं विषयो हेत्ववयवजन्ये तु बोधे वह्निनिष्ठमपि धूमज्ञानज्ञाप्यत्वं भाषत(?) इत्यतिरिक्तविषयकत्वादेव उक्त हेतावतिव्याप्त्यसम्भवः इतिवाच्यं एतदस्वरसेनैव...[५ (ख) पृः]।

विवरणम् : द्वितीयचिन्तामण्यन्तर्गतस्यावयवप्रकरणस्य दीधित्यभिधव्याख्यानमाश्रित्य रचितोऽयं टीकारूपोग्रन्थः। रचयिताऽस्य जगदीशभट्टाचार्यः। अवयवत्वं नाम न्यायावयवत्वम्। तच्च अनुमितिचरमकारणलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकशाब्दज्ञानजनकवाक्यत्वम्। अवयवास्तावत् प्रतिज्ञाहेतूदाहरणोपनयनिगमनभेदात् पञ्चविधाः। सूक्ष्मविचारमुखेनावयवानां पञ्चविधत्वमत्र प्रतिपादितं ग्रन्थकृता। अयं खलु पराचीनत्वाज्जीर्णत्वं छिन्नत्वञ्च समुपागतः। अस्य समाप्तिर्न वर्तते मुद्रणमपि सकृदेव समजनि वाराणसीस्थचौखाम्बाख्यमुद्रणयन्त्रालयतः।

660

36 अवयव-जागदीशी टीका।

Avayava-Jāgadīśī ṭīkā.

By Jagadīśa Tarkālaṁkāra.

Substance : Country-made yellow paper. Size $18\frac{1}{3} \times 4$ inches. Folia 5 (1a-5b). Neatly written in Bengali character. 9-10 lines in a page. Extent about 270 ślokas. Appearance old. Prose. Generally correct. Incomplete at the end. Date n d. Printed. It is published by the Chowkhamba Sanskrit Series office.

There is a square blank space in the middle of each page.

Beginning : ॐ नमो गणेशाय। मूलोक्तन्यायलक्षणस्याग्रे स्वयं दूष्यतया स्वयं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न्यायलक्षणमाह उचितेति, व्युत्क्रमप्रयुक्तप्रतिज्ञातिव्याप्तिवारणार्थमानुपूर्विकान्तं व्युत्क्रम-प्रयुक्तप्रतिज्ञादिभिन्नार्थकं तेन क्रमोत्पन्नप्रतिज्ञा-हेतूदाहरण(?) उपनयनिगमनानां लाभः।

End : तादृशबोधेति, अनुमित्यन्यू विषयकेत्यर्थः, अतिप्रसक्तत्वादवयवान्तरेहाप (?) सत्त्वात् अ……

विवरणम् : तत्त्वचिन्तामण्यनुमानखण्डीयावयवप्रकरणस्य दीधित्याख्यव्याख्यान-मुपजीव्य जगदीशतर्कालङ्कारेण विनिर्मितोऽयं टीकापरोग्रन्थः। अवयवा नाम न्यायावयवाः प्रतिज्ञा-हेतूदाहरणोपनय-निगमनरूपा इति यावत्। अत्रावयवानां सामान्यलक्षण-विशेष-लक्षणानि च सूक्ष्मविचारमुखेन व्याख्यातानि ग्रन्थकृता। अयं खलु समाप्तिरहितः। मुद्रणमस्य समजनि वाराणसीस्थ चौखाम्बाख्यमुद्रणयन्त्रालये।

661

531 अवयवजागदीशीटीका।

Avayavajāgadīśī ṭikā.

By Jagadīśa Tarkālaṁkāra.

Substance: machine-made yellow and reddish paper. Size $17\frac{3}{4} \times 3\frac{1}{2}$ inches. Folia 2. (6a-7b). 7-8 lines in a page. Extent about 93 ślokas. Character Bengali. Appearance old. Prose. Generally correct. Incomplete at the beginning and at the end. Printed and published by the Chowkhamba Sanskrit series office.

Beginning : ...थमं प्रकृतपदं। द्वितीयन्तु तस्यैव लक्षणस्य वह्निव्याप्यसाध्य-कोपनये अतिव्याप्तिवारणार्थं तादृशोपनयस्यापि यत्किञ्चिदनुमितिसमानविषयवत्त्वात्।

End : तथा च पर्व्वतोवह्निमान् यथा पर्व्वत इत्यादिस्थलीय उदाहरणस्य पर्वतो-वह्निमान् वह्ने रित्यादिस्थलीयस्य वह्निव्याप्यवह्निमांश्चायमित्युपनयस्य च वारणार्थमनतिरिक्त-पदं तत्रापि यद्रूपेण पक्षत्वं तदन्यरूपेणैव दृष्टान्त

विवरणम् : तत्त्वचिन्तामण्यनुमानखण्डीयावयवप्रकरणस्य दीधित्याख्यव्याख्यान-माश्रित्य जगदीशतर्कालङ्कारेण विनिर्मितोऽयं निबन्धः। आद्यन्तविहीनोऽयम्। पत्रद्वय-मात्रमत्रावतिष्ठते। पत्रयोरनयोरेकं पीताभम् अपरञ्चेषद्रक्ताभम्। पत्रप्रान्तेषु टिप्पन्यो वर्तन्ते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

662

1686 अवयव-जागदीशी-पत्रिका।

Avayava-jāgadīśī patrikā.

By Unknown author.

Substance: Country-made reddish and yellow paper. Size 13¼ × 3¼ inches. Folia 7 (1a–7b). Neatly written in Bengali character. 7-9 lines in a page. Extent about 216 ślokas. Appearance fresh. Prose. Generally correct. Incomplete at the end. Condition good. Date n d. Unpublished.

Beginning : श्रीदुर्गा। समुदायपदन्तु तादृशपञ्चत्वस्य पर्य्याप्तिसम्बन्धेन यदधिकरणं तस्य क्रमिकत्वलाभार्थं तेन क्रमिकप्रतिज्ञाहेत्वादिमात्रेणातिव्याप्तितादवस्थ्यमिति जगदीशः। अत्रेयमनुपपत्तिः—

End : अत्रेयमाशङ्का ननु यत्र तादात्म्येन नीलादेर्हेतुत्वं तत्र गुणशक्तनीलादि-पदस्य गुणिपरत्वे लक्षणया पञ्चम्यन्तलाक्षणिकनीलादिपदवत्त्वादेव लक्षणगमन-सम्भवादेव असम्भवाभिधानमसङ्गतमिति चेन्न। [१ (ख) पृः]

विवरणम् : अनुमानचिन्तामण्यन्तर्गतावयवप्रकरणीय दीधितेर्जागदीश्या टीकाया उपरि रचितोऽयं पत्रिकापरोनिबन्धः। रचयितुर्नामात्र नोपलभ्यते। अयं प्राचीनोऽपि नवीन इव प्रतिभाति। व्यक्तिद्वयेनास्य लिपिर्विनिर्मिता। एतदीयपञ्चमपत्रं व्युत्क्रमेण लिखितमस्ति। निबन्धकर्तुर्विचारपाटवं प्रशंसनीयम्। अत्र नास्ति ग्रन्थपरिसमाप्तिः। प्रकाशनमस्य न जातम्।

663

1700 अवयवटिप्पनी।

Avayavaṭippanī.

By Kaṇāda Tarkavāgīśa.

Substance: Country-made white, and yellow paper. Size 19 × 4¼ inches. Folia 14 (1a–14b). Neatly written in Bengali character. 9 lines in a page. Extent about 791 ślokas. Appearance old. Prose. Generally correct. Complete. Condition good.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

There is a square blank space in the middle of each page. Date n d. Unpublished.

A commentary on the Avayava of Gaṅgeśa by Kaṇāda Tarkavāgīśa.

Beginning : ॐ नमः परदेवतायै। परार्थानुमानप्रयोजकत्वेन स्मृतस्य न्यायादेरुपेक्षानर्हणीयतया प्रसङ्गसंगत्या तन्निरूपयितुमाह तच्चेत्यादि।

End : कराटकोद्धारस्येति, को वह्निमान् पर्वतोवह्निमान् कुतोधूमात् कथमस्य गमकत्वमित्यादिप्रश्नव्यञ्जककिंपदस्तोमस्येत्यर्थः ॥

Colophon : इतिमहामहोपाध्यायश्रीकणादतर्कवागीशकृताऽवयवमूलटिप्पनी समाप्ता ॥

विवरणम् : अनुमानचिन्तामणयन्तर्गतस्यावयवप्रकरणस्य टीकापरोऽयं ग्रन्थः। अस्य खलु रचयिता श्रीकणादतर्कवागीशः। अवयवत्वं नामानुमितिचरमकारणलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकवाक्यत्वम्। विषयेऽस्मिन्ननतिविस्तृता समालोचनाऽत्र वर्तते। रचनाभङ्गी नैयायिकमनोमोदमुत्पादयितुमीष्टे। प्राचीनोऽपि नवीन इव प्रतिभात्ययं ग्रन्थः। प्रकाशनमस्याद्यापि न जातम्।

664

705 अवयवदीधितिः।

Avayavadīdhiti.

By Raghunātha Śiromaṇi.

Substance: Country-made yellow paper. Size $15\frac{1}{4} \times 3$ inches. Folio 1. Neatly written in Bengali character. 6 lines in a page. Extent about 26 ślokas. Appearance old. Prose. Generally correct. Incomplete at the end. Date n d. Printed,

Beginning : उचितानुपूर्वीकप्रतिज्ञादिपञ्चसमुदायत्वं न्यायत्वं (१) प्रतिज्ञात्वादिकं पुनरुदासीनवाक्यवारकन्यायान्तर्गतत्वशून्यमेव उपादेयमिति नान्योन्याश्रयः।

End : किन्त्वित्यादि (१) प्रकृतन्यायवहिर्भूतवाक्यस्य वारणाय सत्यन्तं प्रकृतन्यायावयवत्वपर्य्यवसितार्थकं (१) उद्देश्येति (१)

विवरणम् : तत्त्वचिन्तामणयनुमानखण्डीयावयवप्रकरणस्य दीधित्यभिधव्याख्यान-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परोऽयं निबन्धोरचितोरघुनाथशिरोमणिना। निबन्धस्योपक्रमतः कियदंशमात्रमत्र वर्तते। अत्रत्य पत्रीयपार्श्वैकदेशे समस्ति जलसंश्लेषजं चिह्नम् मुद्रितोऽयमनेकत्र।

665

1685 अवयवदीधितिः।

Avayavadīdhiti.

By Raghunātha Śiromaṇi.

Substance: Country-made yellow paper. Size 24 × 3¼ inches. Folia 8(1a-8b). Neatly written in Bengali character. 6-7 lines in a page. Extent about 144 ślokas. Appearance old. Prose. Generally correct. Incomplete at the end. Condition good.

There is a square blank space in the middle of each page. Date n d. Published.

Beginning: उचितानुपूर्वीकप्रतिज्ञादिपञ्चकसमुदायत्वं न्यायत्वं।

End: केचित्तु पञ्चम्यन्तलाक्षणिकपदवत्त्वनियतावयवतावच्छेदकरूपवत्त्वं तादृश-पदवत्त्वव्यभिचार्य्यवयवतावच्छेदक... [८ (क) पृः]

विवरणम्: अनुमानचिन्तामण्यन्तःपातिनोऽवयवप्रकरणस्य टीकापरोऽयं ग्रन्थः। रचयिताऽस्य तार्किकशिरोमणीरघुनाथः। विषयस्तावदस्य सुप्रसिद्ध एव न्यायवित्समाजे। अत्रावयवदीधितेः प्रथमत आरभ्य हेतुनिरूपणपर्यन्तोग्रन्थोऽवतिष्ठते। प्राचीनतामुपागतोऽयम्। मुद्रणमस्य बहुशः समजनिष्ट।

666

1321 अवयवमूलम्।

Avayavamūlam.

By Gaṅgeśopādhyāya.

Substance: Country-made yellow paper. Size 14½ × 3¼ inches. Folia 4 (35a-38b). Neatly written in Bengali character. 5 lines in

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

a page. Extent 68 ślokas. Appearance old. Prose. Generally correct. Incomplete towards the beginning. Condition good.

There is a square blank space in the middle of each page. Date n d. Published.

Beginning : [३५ (क) पृः] तुत्वेन हेतुविभक्त्यर्थानन्वयात तथैवाकाङ्क्षा-निवृत्तेरनुमितिहेतुज्ञानकारणधूमवत्त्वादिति शब्दजन्यज्ञानवृत्तिप्रतिज्ञादिजन्यज्ञानादिवृत्तिजाति-मज्ज्ञानजनकवाक्यत्वं हेतुत्वमित्यन्ये ।

End : कण्टकोद्धारस्य नाधिक्यं समयविशेषोपयोगित्वादिति ॥

विवरणम् : अनुमानचिन्तामण्यन्तर्गतावयवप्रकरणात्मकोऽयं निबन्धः । रचयिता खल्वस्य गङ्गेशोपाध्यायः । अवयवो नाम 'अनुमितिचरमकारणलिङ्गपरामर्शप्रयोजक-शाब्दज्ञानजनकशाब्दज्ञानजनकवाक्यम् ।' अनुमितेश्चरमकारणं यः परामर्शः तस्य प्रयोजकं शाब्दज्ञानं (प्रतिज्ञादिपञ्चवाक्यजन्यं तावदर्थविषयकं विशिष्टवैशिष्ट्यावगाहि-ज्ञानम्) तस्य जनकं शाब्दज्ञानं (प्रत्येकावयवजन्यज्ञानम्) तस्य जनकं वाक्यमित्यर्थः । स च प्रतिज्ञा-हेतूदाहरणोपनय-निगमनभेदात् पञ्चविधः । निबन्धस्यास्य प्रारम्भोन वर्तते । अन्तिमपत्रस्य (ख) पृष्ठायां प्रकृतग्रन्थसमाप्त्यनन्तरं सामान्यनिरुक्तिमूलस्य प्रारम्भमात्रं लिखितमास्ते । प्रकाशनमस्य चौखाम्बामुद्रणालयात् द्विः समजनि । प्राचीनतामुपा-गतोऽयम् ।

667

1502 अवयवमूल-जागदीशी-टीका ।

Avayavamūla-jāgadīśī-ṭikā.

By Jagadīśa Tarkālaṁkāra.

Substance: Country-made yellow paper. Size 17 × 3½ inches. Folia 4 (by counting) Written in Bengali character. 7–8 lines in a page. Extent 137 ślokas. Appearance old and worn out. Prose. Generally correct. Incomplete at the end. Condition very bad.

There is a square blank space in the middle of each page. Date n d. Unpublished.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

A commentary on the Cintāmaṇi of Gaṅgeśa by Jagadīśa.

Beginning : प्रसङ्गादाह तच्चेति तद् ... विधमप्यनुमानं परार्थं परस्य वादिनोऽर्थः साध्यायश्चयः तत्च्छङ्कानिवृत्तिर्वा यस्मात् तादृशं न्यायप्रयोज्यमित्यर्थः ।

End : न्यायप्रयोक्तुश्चैत्रादेः शरीरविशेषप्रयोज्यायाः शब्दोनित्य इत्युदासीनवाक्य-जन्यधीनिष्ठशाब्दत्वावान्तरजातेः प्राचोनसम्मतत्वेन तद्वारणाय अवयवेति सत्ताशाब्दत्वा-देरवयवसामान्यप्रयोज्यजातेश्च वारणार्थं···प्रकृतक (?)···

विवरणम् : अनुमानचिन्तामण्यन्तर्गतस्यावयवप्रकरणस्य टीकापरोऽयं ग्रन्थः । अस्य खलु रचयिता तर्कालङ्कारविरुदसमलङ्कृतः श्रीमान् जगदीशः । अवयवत्वं नाम

"अनुमितिचरमकारणलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकशाब्दज्ञानजनकवाक्यत्वम् ।"

अस्यार्थः—अनुमितिचरमकारणं योलिङ्गपरामर्शः, तत्प्रयोजकं न्यायात्मकप्रतिज्ञादिपञ्चवाक्य-जन्यं तावदर्थविषयकं विशिष्टवैशिष्ट्यावगाहिशाब्दज्ञानं तज्जनकं प्रत्येकावयवजन्यशाब्दज्ञानं तज्जनकं वाक्यं तत्त्वमिति : संक्षेपेणोहापोहप्रदर्शन-पुरःसरं व्याख्यानमिदं नहि सुखबोध-जनकतामतिवर्तते । पराचीनोऽयमत्यन्तजीर्णतामुपागतः । प्रायः प्रतिपत्रमेव मसी-लोपोक्रमः संवृत्तः ।

"तच्चानुमानं परार्थं न्यायसाध्यमितीत्यादि—देवदत्तप्रभवत्वादिना जातिसङ्करप्रसङ्गा"-दित्यन्तस्यैवावयवमूलग्रन्थस्य व्याख्यानमात्रमत्रावतिष्ठते । प्रकाशनमस्य न समजनि ।

668

अवयव-मूल-टीका ।

Avayavamūla-ṭīkā.

By Kaṇāda Tarkavāgīśa.

Substance : Country-made yellow paper. Size $18\frac{1}{2} \times 8\frac{1}{4}$ inches. Folia 4 (15a-18b). Neatly written in Bengali character. 7 lines in a page. Extent 85 ślokas. Appearance old, torn and worn out. Prose. Incorrect. Incomplete at the end. Date n d. Unpublished.

The text of the Avayava a part of Anumānacintāmaṇi with the commentary of Kaṇāda.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Beginning : अथेति (१) अभिधानपदं प्रतीते (?) परं व्याप्तिपक्षधर्मता-विशिष्टलिङ्गानुभवइति यावत् (।) अभिधेयं तथाभूतलिङ्गं निराकाङ्क्षानुमितेस्तथाच चतूर्णामवयवानां व्याप्तिपक्षधर्मताप्रतिपादनेन पर्य्यवसानेन निगमाकाङ्क्षा तेषां नास्तीत्यर्थः ।

End : अत्र प्रतिपक्षे हेतूदाहरणमात्रकोन्याय इति इति मीमांसका... । उदाहरण... उपनयमात्रमिति नैयायिकैकदेशिनः । असाधकतानुमाने प्रतिज्ञाहेतुमाने प्रतिज्ञाहेतुमात्रमिति केचित्तु...दोषोपनयमित्याचार्य्या वदन्तीति शेषः ।

Colophon : इत्यवयव-कणादटिप्पनी समाप्ता ।

विवरणम् : अनुमानचिन्तामणयवयवप्रकरणस्य व्याख्यानात्मकोऽयं निबन्धः । रचयिता खल्वस्य तर्कवागीशोपनामकोमहामहोपाध्यायः कणादः । अत्र पञ्चानामवयवानामन्य-तमस्य निगमनाख्यावयवस्य व्याख्यानमात्रमवतिष्ठते । भ्रमप्रमादसङ्कुलोऽयं मुद्रण-मस्याद्यापि न जातम् ।

669

28 अवयव-मूल-जागदीशी टीका ।

Avayava-mūla-Jāgadīśīṭikā.

By Jagadīśa Tarkālaṃkāra.

Substance : Country-made yellow paper. Size $17\frac{1}{2} \times 3\frac{1}{2}$ inches. Folia 15 (1a-15b). Neatly written in Bengali character. 8 lines on a page. Extent about 650 ślokas. Appearance old. Indistinet at the beginning. Prose. Generally correct. Incomplete at the end. Date n. d. Unpublished.

A commentary on the Avayava of Gangeśa entitled Mayūkha by Jagadiśa.

Beginning : प्रसङ्गादाह तच्चेति, तत् त्रिविधमप्यनुमानं परार्थं परस्य वादिनोऽर्थः साध्यनिश्चयः तत्शङ्कानिवृत्तिर्वा यस्मात् तादृशं न्यायसाध्यं न्यायप्रयोज्यमित्यर्थः । अतिप्राच्यै-रुपनयमात्रस्य, सौगतैरुदाहरणादित्रिकस्य, मीमांसकैः प्रतिज्ञात्रिकस्य जरन्नैयायिकैर्विप्रतिपत्ति-समयबन्धजिज्ञासावाक्यकण्टकोद्धार-दृष्टान्तक्रमेण ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

End : यद्यपि पूर्व्वोपस्थितसाध्यमेव विशेषः तथाशब्देन परामृश्यमित्युक्तौ न कश्चित्तथापि सादृश्येत्यादिश…

विवरणम् : अवयवमूलस्य व्याख्यानपरोऽयं निबन्धः श्रीमता जगदीशतर्कालङ्कारेण विनिर्मितः। जगदीशतर्कालङ्कारः समग्रतत्त्वचिन्तामण्युपर्यपि मयूखाभिधां महतीं टीकां विरचितवानिति प्रसिद्धोऽस्ति गुरुपरम्परागतो जनप्रवादः। इदानीमसौ जगदीशकृतिर्न लोकलोचनगोचरतामाप्नोति। "व्याप्टिष्टमिशन प्रेसा"ख्यभवनतः प्रकाशितस्य सरहस्यतत्त्वचिन्तामणिग्रन्थस्य (६८६-६६४ पृः) पादटीकायामवयवमूलस्य जगदीशतर्कालङ्काररचितव्याख्यानस्य प्रथमतः कियदंश उद्धृतस्तदीयप्रकाशकेन। किन्त्ववयवमूलस्य सम्पूर्णं जागदीशं व्याख्यानमद्यापि कुतश्चापि न प्रकाशितम्। माद्राजप्रदेशीयविख्यातप्राचीनग्रन्थशालायां तत्त्वचिन्तामण्यनुमानोपरि सम्पूर्णाया जागदीश्याष्टीकायाः प्रतिलिपिरेका वर्त्तते इति (Tanjore Cat PP. 4607-8, पत्रसंख्याः ६१)।

See car no. 278.

670

1574 अवयवमूल-माथुरीटीका।

Avayavamūla-māthurīṭikā.

By Mathurānātha Tarkavāgīśa.

Substance : Country-made yellow paper. Size 19 × 3½ inches. Folia 20(1a-20b). Neatly written in Bengali character. 7-8 lines in a page. Extent about 665 ślokas. Appearance old. Prose. Generally correct. Complete. Condition not good. Date not mentioned. Published.

There is a square blank space in the middle of each page.

A commentary on the Avayava of Gangeśa by Mathurānātha.

This is another copy of our previous cat no. 280 already noticed.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Beginning : ॐनमोभगवते वासुदेवाय । परार्थानुमानप्रयोजकत्वेन स्मृतस्य न्यायादे- रुपेक्षानर्हतया प्रसङ्गसङ्गत्या तन्निरूपयितुमाह तच्चेति ।

End : कराटकोद्धारस्येति कोवह्निमान् कुतोधूमात् कथमस्य गमकत्वमित्यादिप्रश्न- व्यञ्जककिंपदस्तोमस्येत्यर्थः ।

Colophon : इति अवयवस्य टीप्पनी(?) सम्पूर्णा ।

Post colophon : श्रीभगवते वासुदेवाय गोविन्दाय नमोनमः ।

विवरणम् : अयं प्राचीनः । अस्य सर्वेषामेव पत्राणां पार्श्वभागाः सलिलसम्पर्कज- चिह्नसम्पृक्ताः । ८८० सूचीग्रष्टव्या ।

For the contents see cat no. 280,

671

1027 अवयव-शिरोमणिः ।

Avayava-śiromaṇiḥ.

By Raghunātha Śiromaṇiḥ.

Substance : Country-made yellow paper. Size $13\frac{1}{2} \times 3$ inches. Folia 5(1-4 and 6). Neatly written in Bengali character. 5-7 lines on a page. Extent about 98 ślokas. Appearance old. Prose. Generally correct. Incomplete at the end. Date n. d. Available in print.

Beginning : ॐ नमः । उचितानुपूर्वीकप्रतिज्ञादिपञ्चकसमुदायत्वं न्यायत्वम् ।

End : [१(क)६ पं] अन्यूनानतिरिक्तपदमिति च मूलमुद्दिश्यानुमित्यन्यूनानतिरिक्त- विषयभागपरं हेतुत्वमभिधेयं प्रमेयत्वादित्यादौ पञ्चम्यर्थपक्षक हेतु वा...[६ (ख) पृः]

विवरणम्—अनुमानचिन्तामरायन्तर्गतस्यावयवप्रकरणस्य टीकापरोऽयं निबन्धः । अस्य खलु रचयिता तार्किकशिरोमणीरघुनाथः । एतदीय प्रथमपत्रस्य (क) पृष्ठायां प्रकृतग्रन्थस्य प्रारम्भः षष्ठपङ्क्तितोवर्त्तते । ततः प्रागास्ते तावद्व्याप्त्यनुगमशिरोमणेरन्तिमांशः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रणष्टमस्य पञ्चमं पत्रम् । प्रथमपत्रे मसीलेपोपक्रमः संवृत्तः । व्यक्तिद्वयेनास्य लिपि-विंनिर्मिता । मुद्रणमस्य बहुशोजातम् ।

672

1529 अवयव-शिरोमणिः ।

Avayava-śiromaṇiḥ.

By Raghunātha Śiromaṇi.

Substance : Country-made yellow paper. Size $14 \times 3\frac{1}{4}$ inches. Folia 3(4a-6b). Neatly written in Bengali character. 5-6 lines in a page. Extent about 80 ślokas. Appearance old and worn out. Prose. Generally correct. Incomplete towards the beginning and at the end. Condition not good. Date n. d. Published.

There is a square blank space in the middle of each page.

Beginning : [४ (क) पृः] मत्वबोधकस्य उपनयस्य यत्र च पक्षसाध्ययोस्ताद्-रूप्येण दृष्टान्तत्वहेतुत्वाभ्यामुपन्यासस्तादृशसिषाधयिषा च न्यायप्रयोगस्तत्र तदोदाहरणउप-नययोः...

End : अन्यूनेत्यादि तथा च उद्देश्यानुमितिसमानविषयकलिङ्गाविष...[६ (ख) पृः]

विवरणम् : अनुमानचिन्तामणयन्तःपातिनोऽवयवग्रन्थस्य टीकापरोऽयं निबन्धः । रचयिताऽस्य तार्किकशिरोमणोरघुनाथः । प्रारम्भ-समाप्तिरहितोऽयं प्राचीनतां कीटदष्टतां जीर्णताञ्च समुपागतः । प्रकाशनमस्य बहुशः समजनि ।

673

1612 अवयव-हेत्वाभासमूल-टीका ।

Avayava-Hetvābhāsamūla-ṭīkā.

By Mathurānātha Tarkavāgīśa.

Substance : Country-made yellow paper. Size $19\frac{1}{2} \times 3\frac{1}{2}$ inches. Folia 61 (10032a-10044b, 10045a-10093a). Neatly written in

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Bengali character. 7-9 lines in a page. Extent about 2,740 ślokas. Appeareance old. Prose. Generally correct. Complete. Condition not good. Date Śaka 1626. Published. It is with marginal notes.

There is a square blank space in the middle of each page.

Beginning : [१००३२ (क) पृः] ॐ नमोदुर्गायै। परार्थानुमानप्रयोजकत्वेन स्मृतस्य न्यायादेरुपेक्षानर्हतया प्रसङ्गसङ्गत्या तन्निरूपयितुमाह तच्चेति।

End : घटो व्यापक इत्यादावप्यतथात्वात् तथाप्युद्भावने कथकसम्प्रदायसिद्धप्रकार-भेदोऽनेन दर्शित इति न काप्यनुपपत्तिरिति संक्षेपः ॥

Colophon : अनुमानपरिच्छेदरहस्ये हेत्वाभासरहस्यं ॥ इति महामहोपाध्याय श्रीमथुरानाथतर्कवागी ...(?) भट्टाचार्य्यविरचितानुमानटिप्पनी समाप्ता ॥

Post-Colophon : श्रीरामनाथशर्मणः स्वाक्षरमिदं ॥ शुभमस्तु लेखके मयि। तारीख १२ फाल्गुनस्य शकाब्दाः १६२६।

विवरणम् : अनुमानचिन्तामण्यन्तःपात्यवयवादि-हेत्वाभासान्तमूलग्रन्थस्य व्याख्या-नात्मकोऽयं निबन्धः। रचयिताऽस्य मथुरानाथतर्कवागीशः। यद्यप्यत्रत्यायाः अवयव मूलटीकायाः पुष्पिकायां "इति जागदीशीयावयवव्याख्या समाप्ता" इति लिखितमस्ति तथापीयं व्याख्या न जागदीशी अवयवमूलस्य जागदीश्या व्याख्यया सममस्याः केनाप्यंशेन मिलनाभावात्। अपि तु अवयवमूलस्य माथुर्या टीकयाऽस्याः सर्वांशेनैवानुपूर्वीतो मिलन-सत्तान्माथुरीयं व्याख्येति ज्ञेयम्। लिपिकारेण प्रमादत एवोक्तरूपा पुष्पिकाऽत्र विन्यस्तेति नूनमवगन्तव्यम्। अयं प्राचीनः। प्रतिपत्रं प्रान्तभागाः सलिलसम्पर्कजचिह्नसम्पृक्ताः। क्वचित् क्वचित्क्षुद्राः टिप्पन्यो वर्तन्ते। प्रथमतः कतिपयपत्रेष्वपक्षियमाणामसो समुपलभ्यते। मुद्रणमस्य वारमेकं समजनिष्ट।

This book, which contains works from Avayava to Hetvābhāsa, is not the work of Jagadiśa, as stated in the colophon. It has no resemblance with Jagadiśa's work. The book appears to be a work of Mathurānātha.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

674

936 असाधारण-गादाधरीटीका।

Asādhāraṇa-Gādādharīṭīkā.

By Gadādhara Bhaṭṭācarya.

Substance : Country-made yellow paper. Size $18\frac{1}{3} \times 4\frac{1}{3}$ inches. Folia 8(1a-8b). Neatly written in Bengali Character. 7-9 lines on a page. Extent about 362 ślokas. Notes on the margin. Appearance old. Prose. Generally correct. Complete. Date n. d. Published.

There is a square blank space in the middle of each page.

Beginning : ननु चिन्तामणिकारमते सत्प्रतिपक्षोन्नायकतया असाधारणस्य दूषकत्वात् साध्यव्यापकीभूताभावप्रतियोगित्वमेवासाधारण्यमिति न सर्वेत्यादिग्रन्थासङ्गतिरित्यत आह प्राचामिति (।)

End : अप्रामाण्यज्ञाने अव्याप्यत्वादेर्धर्मितावच्छेदकानवच्छिन्न एव हेतौ-भानात्तस्य व्याप्त्यादिनिश्चयाप्रतिवध्यतया विरोधिनिश्चयोत्तेजकीभूततत्समवधाने प्रकृतसाध्यानुमिति... सम्भवति ॥

विवरणम् : अनुमानचिन्तामण्यन्तर्गत-हेत्वाभासप्रकरणीयासाधारणस्य दीधितिमधिकृत्य टीकापरं निबन्धमिमं रचयाञ्चकार श्रीगदाधरभट्टाचार्यः। असाधारणोनाम सव्यभिचारस्य प्रकारभेदः। ज्ञाननिष्ठप्रकृतसाध्यविरोध्युन्नायकतानतिरिक्तवृत्तिः प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितप्रकृतहेतुतावच्छेदकावच्छिन्नप्रकारतानिरूपितयादृशविशिष्ट - विषयता तादृशविशिष्टवत् प्रकृतहेतुत्वमस्य लक्षणम्। विषयमिमं समाश्रित्य सुविस्तृतं समालोचनं कृतवानत्र निबन्धकारः। अपि च प्राचीनमतनिराकरणं मिश्रमतोपवर्णनञ्च वैशद्येनात्रावतिष्ठेते। पत्रपार्श्वभागेषु क्षुद्राष्टिप्पन्योवर्तन्ते। क्वचित् क्वचिदपस्रियमाणा मसी समुपलभ्यते। प्राचीनतामुपागतोऽयम्। सकृदेवास्य प्रकाशनं जातं चौखाम्बा-मुद्रणयन्त्रालयतः।

The book contains the defination of Asādhārana, a kind of Savyabhicāra.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

675

1747 असाधारण-गादाधरी ।

Asādhāraṇa-gādādharī.

By Gadādhara Bhaṭṭācārya.

Substance: Country-made reddish and yellow paper. Size $17 \times 3\frac{1}{2}$ inches. Folia 7(1a-7b). Neatly written in Bengali character. 7-8 lines in a page. Extent about 313 ślokas, Appearance old. Prose. Generally correct. Complete. Condition good. Printed.

There is a square blank space in the middle of each page. Date n. d.

Beginning : ॐ नमः । ननु चिन्तामणिकारमते सत्प्रतिपक्षोत्थापकतयाऽसाधारण्यस्य दूषकत्वात् साध्यव्यापकीभूताभावप्रतियोगित्वमेवासाधारण्यमिति न सर्वेत्यादिग्रन्थासंगतिरित्यत आह प्राचामिति ।

End : अप्रामाण्यज्ञानेऽव्याप्यत्वादेर्धर्मितावच्छेदकानवच्छिन्नत्वहेतौ भानात् तस्य व्याप्त्यादिनिश्चयाप्रतिबन्धकतया विरोधिनिश्चयोत्तेजकीभूततत्समवधाने प्रकृतसाध्यानुमिति-सम्भवात् ॥

Colophon : इत्यसाधारणटिप्पनी समाप्ता ॥ ॐ ॥

विवरणम् : ६३६ सूची द्रष्टव्या ।

For description of contents see cat no. 674.

676

1614 असाधारणमूल-टीका ।

Asādhāraṇamūla-ṭikā.

By Mathurānātha Tarkavāgīśa.

Substance : Country-made yellow paper. Size $16\frac{1}{4} \times 3\frac{3}{4}$ inches. Folia 4(1a-4a). Neatly written in Bengali character. 5-8 lines in a

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

page. Extent 129 ślokas. Appearance old. Prose. Generally correct. Incomplete at the end. Condition good.

There is a square blank space in the middle of each page. Date not mentioned.

The text of the Asādhārana a part of Anumānacintāmani with the commentary of Mathurānātha.

Beginning : ॐ नमः परमदेवतायै । सर्वसपक्षेति, सर्वसपक्षव्यावृत्तत्वे सति सर्वविपक्षव्यावृत्तत्वमित्यर्थः । सद्धेतावतिव्याप्तिवारणाय सत्यन्तं । धूमादेरपि अयःपिण्डादि-रूपयत्किञ्चित् सपक्षव्यावृत्तत्वात् तद्दोषतादवस्थ्यवारणाय सर्वत्वं ।

End : नन्वेवं विरुद्धेऽतिव्याप्तिरश्वत्वादेरपि गोत्वव्यापकीभूताभावप्रतियोगित्वादित्यत आह विरुद्धमाति, अनेन सर्वसपक्षव्यावृत्तत्वेनासाधारणमपीति । तथाच तस्य लक्ष्यत्वान्नाति--व्याप्तिः । [४ (क) पृः]

विवरणम् : अनुमानचिन्तामरयन्तःपातिहेत्वाभासीयासाधारणस्य व्याख्यापरोऽयं निबन्धः । रचयिताऽस्य तर्कवागीशोपनामकः श्रीमान् मथुरानाथः । असाधारणमूल-स्यान्तिमपङ्क्तिमन्तरेण सर्वस्यैव तस्य व्याख्यानमत्रावतिष्ठते । मुद्रितमाथुरीटीकया सममस्या व्याख्याया न खल्वमपि मिलनं परिलक्ष्यते । प्रतिपत्रमस्य वामप्रान्तभागेषु "असाधारण मू-माटो" इति लिखनस्य विद्यमानत्वेऽपि व्याख्येयं माथुरी तदन्यदीया वेति विपश्चिद्भिर्विभाव्यम् ।

असाधारणत्वं नाम हेतुदोषः । तच्च सर्वसपक्षव्यावृत्तत्वे सति सर्वविपक्षव्यावृत्तत्वम् । शब्दोनित्यः शब्दत्वादित्यादौ शब्दत्वादेरसाधारणत्वम् प्राचीनत्वेऽप्यस्य नाविन्यमक्षुण्ण-मिव प्रतिभाति । एतदीयानुपूर्वीविशिष्टाया असाधारणमूल-टीकाया अद्यापि प्रकाशनं न जातम् ।

677

69 असाधारणमूल-टीका ।

Asādhāraṇamūla-ṭikā.

By Unknown author.

Substance : Country-made yellow paper Size $18\frac{1}{2} \times 3\frac{1}{2}$ inches. Folia 4 (1a-4b). Neatly written in Bengali character. 7 lines on a

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

page. Extent about 133 ślokas. Appearance very old, torn and worn out. Prose. Generally correct. Incomplete at the end. Date n. d. Printed.

There is a square blank space in the middle of each page.

A commentary on Cintāmaṇi (Asādhāraṇa) of Gaṅgeśa by unknown author.

Beginning : सर्वसपक्षेति (।) सर्वसपक्षव्यावृत्तत्वेसति सर्वविपक्षव्यावृत्तत्वमित्यर्थः । सद्धेतावतिव्याप्तिवारणाय सत्यन्तं धूमादेरपि अयःपिण्डादिरूपयत्किञ्चित् सपक्षव्यावृत्तत्वात् तद्दोषतादवस्थ्यवारणाय सर्वत्वं सपक्षविशेषणं ।

End : नन्वेवं विरुद्धेऽतिव्याप्तिः अश्वत्वादेरपि गोत्वव्यापकीभूताभावप्रतियोगित्वादित्यत आह विरुद्धमपीति (।) अनेन सर्वसपक्षव्यावृत्तत्वेन असाधारणमपीति तथाचास्यलक्ष्यत्वान्नातिव्याप्ति......

विवरणम् : तत्त्वचिन्तामण्यनुमानखण्डीयहेत्वाभासान्तर्गतस्यासाधारणप्रकरणस्य व्याख्यानात्मकोऽयं ग्रन्थः । अज्ञातनाम्नोऽस्य ग्रन्थकर्त्तुर्व्याख्यानकौशलं मनोमोदजनकम् । अयं खल्वतीवप्राचीनत्वाच्छिन्नत्वं जीर्णत्वञ्चगतः । अद्याप्यस्य मुद्रणं न समजनि ।

678

1648 असिद्धिमूल टीका ।

Asidhimūla-ṭīkā.

By Mathurānātha Tarkavāgīśa.

Substance: Country-made yellow paper. Size $16\frac{3}{4} \times 4$ inches. Folia 7 (1a-7a). Neatly written in Bengali character. 10-13 lines in a page. Extent about 428 ślokas. Appearance old, torn and worn out. Prose. Generally correct. Incomplete at the end. Condition bad. Date not mentioned. Published.

There is a square blank space in the middle of each page.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Beginning : ॐ नमो दुर्गायै । व्याप्तीति, तथाच व्याप्तिपक्षधर्मत्वाभाववान् हेतुरसिद्ध इति भावः ।

End : पर्वतान्यः पर्वत इत्यादौ आहार्य्यरूप एव तादृश परामर्शः प्रसिद्धः परामर्श प्रतिबन्धकत्वस्य लक्षणेऽप्रवेशात् तस्याप्रतिबन्धकत्वेऽपि न क्षति [७ (क) पृः]

विवरणम् : अनुमानचिन्तामण्यन्तर्गतहेत्वाभासीयासिद्धिप्रकरणस्य टीकापरोऽयं ग्रन्थः । रचयिताऽस्य श्रीमान् मथुरानाथतर्कवागीशः । असिद्धिर्नाम "साधारण्यासाधारण्यानुपसंहारित्वभिन्नं ज्ञानस्य विषयतया परामर्शविरोधितावच्छेदकं रूपम् ।" सा चाश्रयासिद्धिस्वरूपासिद्धिव्याप्यतासिद्धिभेदात् त्रिविधा । यथा :—काञ्चनमयहृदः काञ्चनमयवह्निमान् काञ्चनमयधूमादित्यादौ काञ्चनमयत्वाभाववद्हृदादिः । विषयेऽस्मिन् सूक्ष्मं विचारपूर्णं सुविशदं समालोचनमत्रास्ते । अयं प्राचीनश्छिन्नोजीर्णश्च संवृत्तः । असिद्धिपूर्वपक्षग्रन्थस्य प्रथमतः कियदंशस्य व्याख्यानमात्रमत्रावतिष्ठते ।

679

1082 असिद्धि-बाध-चिन्तामणिः ।

Asiddhi-Bādha-Cintāmaṇiḥ.

By Gaṅgeśopādhyāya.

Substance : Country-made yellow paper. Size $13\frac{1}{2} \times 2\frac{1}{2}$ inches Folia 5 (9a-33b). Neatly written in Bengali Character. 5-6 lines on a page. Extent 75 ślokas. Character Bengali. Appearance old. Generally correct. Incomplete at the beginning and at the end. Prose. Date n. d. Printed.

Beginning : अन्यथा शास्त्रे परिभाषोच्छेदापत्तिः सव्यभिचारादेरेवैवंरूपसत्त्वेऽप्युपजीव्यत्वेन पृथक्त्वं उपधेयसङ्करेऽप्युपाधेरसङ्करात् ।

End : अथ पक्षे साध्याभावप्रमैव साध्याभावहेतुविषयाव्यभिचारज्ञानत्वेन दोषः । न तु तस्याः प्रमात्वज्ञानमपीति चेन्न । तर्हि प्रमाया अप्रमात्वेज्ञ...

विवरणम् : गङ्गेशोपाध्यायविरचितासिद्धि-बाधनिरूपणपरोऽयं निबन्धः । तत्रासिद्धि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रकरणस्य प्रारम्भोबाधप्रकरणस्य समाप्तिश्च न वर्त्तेते। अयं तावत् प्राचीनः प्रायशः एव शुद्धश्च। मुद्रितोऽयं बहुत्र।

680

1633 आकाङ्क्षाऽऽलोकरहस्यम्।

Ākāṁkṣālokarahasyaṃ.

By Mathurānātha Tarkavāgīśa.

Substance : Country-made yellow paper. Size 16 × 3½ inches. Folia 11 (3a-13b). Neatly written in Bengali character. 8-9 lines in a page. Extent about 451 ślokas. Appearance old and worn out. Prose. Generally correct. Incomplete towards the beginning and at the end. Condition bad. Date not mentioned. Unpublished.

There is a square blank space in the middle of each page.

A commentary of Akāṁkṣāloka of Jayadeva Miśra by Mathurānātha Tarkavāgīśa.

Beginning : [३ (क) पृः] शब्दोचारणविशेषस्यैवाकाङ्क्षात्वात् तस्य शाब्दमात्र प्रत्येवाहेतुत्वेन एतद्दोषासङ्गतेः। एवमग्रे पीतिस्मर्त्तव्यं। असाधारणयं असाधारणकारणत्व-प्रवादः।

End : द्वारमितीति। एवं चाध्याहारं विनेतस्य विशेषत आनयतीत्याद्यानुपूर्वी-विशेषविशिष्टत्वेन पदाध्याहारं विनेत्यर्थः। प्रतियोग्यलाभादितिकारणीभूतान्वयप्रतियोग्यु··· [१३ (ख) पृः]

विवरणम् : शब्दचिन्तामण्यन्तर्गताकाङ्क्षाप्रकरणस्य जयदेवमिश्रविरचितालोकाख्य-टीकायाष्टीकापरोऽयं ग्रन्थः। अस्य खलु रचयिता श्रीमान् मथुरानाथतर्कवागीशः। अस्य तृतीयपत्रस्य (क) पृष्ठायां आकाङ्क्षापूर्वपक्षालोकस्य रहस्याख्यटीकाया अन्तिमांशमात्रमास्ते। ततस्तत् सिद्धान्तपक्षालोकस्य कथितटीकायाः प्रथमतः कियदंशमात्रमत्रावतिष्ठते। अयं प्राचीनो-जीर्णश्च संवृत्तः। प्रकाशनमस्याद्यापि न जातम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

681

1070 आकाङ्क्षाटीका।

Ākāṁkṣāṭikā.

By Mathurānātha Tarkavāgīśa.

Substance: Country-made yellow paper. Size $17\frac{1}{2} \times 4$ inches. Folia 13 (by counting). Neatly written in Bengali character. 8 lines on a page. Extent 442 ślokas. Appearance old and discoloured. Prose. Generally correct. Incomplete at the end.

The Ms. contains Mathurānātha's commentary on Ākāṁkṣā section of Tc., Part IV (Śabdakhaṇḍa printed, Bib. Ind.). The Ms. ends abruptly.

Beginning: प्रसङ्गादाकाङ्क्षां निरूपयितुं पृच्छति आकाङ्क्षेति अथकेति। आकाङ्क्षादिकं सहकारीति यदुक्तं तत्राकाङ्क्षा केत्यर्थः। अविनाभाव इति। तत्पदार्थेन विना यो भावः सत्त्वं तदभाव इत्यर्थः (Bib. Ind. p. 185).

End: ननु कर्मत्वादि विशेष्यकाधेयतत्वादिभेदसंसर्गकघटादिप्रकारकान्वयबुद्धिं प्रत्येव घटमि (Bib. Ind. pp. 231-32)

विवरणम्: पुस्तकेऽस्मिन् तत्त्वचिन्तामण्यन्तर्गताकाङ्क्षाप्रकरणस्य मथुरानाथकृता-टीका अन्ते खण्डिता मुद्रिता चोपलभ्यते। तत्र केयमाकाङ्क्षा न तावदविनाभावः, नीलं सरोजमित्यादावभावात्, विमलं जलं नद्याः कच्छे महिष इत्यत्र जलान्वितनद्या अविनाभावात् कच्छे आकाङ्क्षतापत्तेः इति पूर्वपक्षे उच्यते अभिधानापर्यवसानमाकाङ्क्षा।

682

1033 १। आकाङ्क्षापत्रिका।

Ākāṁkṣāpatrikā.

२। योग्यतापत्रिका।

Yogyatāpatrika.

By Unknown author.

Substance: Country-made yellow paper. Size $17\frac{3}{4} \times 3\frac{1}{2}$ inches. Folia 1. Neatly written in Bengali character. 9-10 lines in a page.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Extent 40 ślokas. Appearance old. Prose. Incorrect. Complete. Date n. d. Unpublished.

Beginning of the Ākāṁkṣā patrikā: सुवर्थसंख्यायाः स्वसमानपदोपात्तेतर-सम्बन्धेन स्वसमानपदोपात्तेतरविशेषणं यत्तदान्वितत्वनियमः ।

End of the Ākāṁkṣā-patrikā: अत्र केचित् संख्यास्थले स्वेतरसम्बन्धेन इत्यादिनियमो न सम्भवति कर्मतास्थले तादृशलघुप्रकारकसम्भव इतिद्वयमपास्तमिति ॥१॥

Beginning of the Yogyatā: योग्यताज्ञानस्य शाब्दबोधहेतुत्वं बाधनिश्चयकाले शाब्दबोधवारणाय ।

End of the Yogyatā: चिन्ताबीजं बाधकालीन इच्छासत्त्वे एतन्मते कदापि अनाहार्यज्ञानं न जन्यते इत्यस्मद्गुरुचरणाः ॥१॥

विवरणम्: ग्रन्थकर्त्तुर्नामात्र नोपलभ्यते। ग्रन्थस्य १ (क) पृष्ठाया दक्षिणप्रान्ते आकांक्षापा, तदीय (ख) पृष्ठाया दक्षप्रान्ते च योग्यतापां इति लिखितमस्ति। किन्तूभय-त्रैवाकाङ्क्षा-योग्यताज्ञानयोर्हेतुत्वस्य निर्वचनं निर्व्यूढं रचयाञ्चकार कश्चन नैयायिकप्रकाण्डः। आकांक्षा पाः योग्यता पाः इत्याकारलिखनं खलु लिपिकारप्रमादजम्। अयं पराचीनः। मुद्रणमस्य न जातम्।

683

72 आकाङ्क्षा-माथुरीटीका।

Ākāṁkṣā-māthūrīṭīkā.

By Mathurānātha Tarkavagīśa.

Substance: Country-made yellow and reddish paper. Size 18×4 inches. Folia 13 (1a-13b). Neatly written in Bengali character. 8 lines on a page. Extent about 489 ślokas. Appearance old and worn out. Prose. Generally correct. Incomplete at the end. Date n. d. Printed.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

There is a square blank space in the middle of each page.

A commentary on the Ākāṁkṣā (a part of the Savdacintāmaṇi) of Gangeśa by Mathurānātha.

Beginninng : ॐनमो गणेशाय। प्रसङ्गादाकाङ्क्षादिकं निरूपयितुं पृच्छति अथ केयमिति आकांक्षादिकं सहकारीति यदुक्तं तत्र चाकांक्षा केत्यर्थः। अविनाभाव इति, अविना तत्पदार्थेन विना योभावः सत्वं तदभाव इत्यर्थः।

End : अतः कर्म्मत्वादिविशेष्यकघटादिप्रकारकभेदान्वयबोधेऽव्यवहितपूर्ववर्त्तितासम्बन्धेन घटादिपदेऽनुस्वारादिपदवत्त्वं अव्यवहितोत्तरवर्त्तितासम्बन्धेनानुस्वारादिपदे घटादिपदवत्त्व-माकांक्षा कृत्यादिविशेष्यनयादिप्रकारकभेदान्वयबोधेऽव्यवहितपूर्ववर्त्तितासम्बन्धेनानयादिपदे-त्वादिपदवत्त्वं अव्यवहितोत्तरवर्त्तितासम्बन्धेनत्वादिपदे आनयादिपदवत्त्वमाकांक्षा आनयादि-विशेष्यक घटकर्मत्वादिप्रकारकभेदान्वयबोधे घटादिपदाव्यवहितोत्तरवर्त्यनुस्वारादिपदे-ऽव्यवहि...

विवरणम् : निबन्धोऽयं प्राचीनो जीर्णश्च संवृत्तः। प्रायः प्रतिपत्रमेव सलिलसमाश्लेषजचिह्नान्वितं वर्त्तते। समाप्तिरहितस्यास्योत्सङ्गे आकांक्षामूलाङ्कितं पत्रमेकमव-तिष्ठते।

For description of contents see cat no. 68.

684

824 आकाङ्क्षा-माथुरीटीका।

Ākāṁkṣā Mathurīṭīkā.

By Mathurānāthā Tarkavāgīśa.

Substance : Country-made yellow paper. Size $19 \times 3\frac{1}{3}$ inches. Folia 18(1a-18b). Neatly written in Bengali character. 7-8 lines on a page. Extent about 677 ślokas. Appearance old. Prose. Generally correct. Complete. Date n. d. Published.

There is a square blank space in the middle of each page.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

A commentary on the Ākāṁkṣā (a part of the Śavdacintāmaṇi) of Gangeśa by Mathurānātha.

Beginning : ॐनमो गणेशाय। प्रसङ्गादाकाङ्क्षां निरुपयितुं पृच्छति अथेति (।) आकाङ्क्षादिकं सहकारीति यदुक्तं तत्राकाङ्क्षा केत्यर्थः (।) अविनाभाव इति तं पदार्थेन विना योभावःसत्वं तदभाव इत्यर्थः।

End : अत्र नव्या इत्यस्वरसोद्भावनं तद्वीजन्तु भेदकूटानां विशेषणविशेष्यभावे विनिगमकाभावाद्गुरुतरानन्तकार्य्यकारणभावप्रसङ्गः अन्यथा घटपदानुस्वारपदादिनिश्चयरहितं यत्तदन्यान्यत्वेनैव लाघवाद्धेतुत्वौचित्यं वृत्त्या घटकर्मत्वाद्युपस्थितेर्व्यापारत्वाच्च नातिप्रसङ्ग-शङ्कापातिदिक्

Colophon : इति शब्दपरिच्छेदरहस्ये आकाङ्क्षारहस्यं सम्पूर्णं (०)

विवरणम् : पत्राणामस्य प्रायः सर्वेषामेव प्रान्तभागा वर्त्तन्ते सलिलसमासङ्गजन्यचिह्न-सम्पृक्ताः। सम्पूर्णोऽयं निबन्धः।

For description of contents see cat no. 68.

685

1070 आकाङ्क्षा-माथुरीटीका।

Ākaṁkṣā-māthurīṭīkā.

By Mathurānātha Tarkavāgīśa.

Substance : Country-made yellow and reddish paper. Size $17\frac{1}{2}\times4$ inches. Folia 13 (by counting). Neatly written in Bengali character. 8-10 lines in a page. Extent about 582 ślokas. This is the another copy of our previous No. 73 already noticed. Appearnce old, torn, warm eaten and worn out. Prose. Generally correct. Incomplete at the end. Condition is very bad. Date n. d. Published.

There is a square blank space in the middle of each page.

Beginning : श्रीरामः। प्रसङ्गादाकाङ्क्षां निरुपयितुं पृच्छति आकाङ्क्षेति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

End : यथाशक्त्युपस्थापितप्रवाहादिविषयकानुभवाभावोगङ्गादिपदविशेष्यकसप्तम्यादि-रूपेतरपदप्रकारकपदज्ञानसम्बन्धेन व्यतिरेकप्रयुक्तस्तथा लक्षणोपस्थापिततीरादिविषयकानुभवा-भावोपोल्यर्थः । ननु कर्मत्वादिविशेष्यकाधेयतासंसर्गकघटादिप्रकारकान्वयबुद्धिं प्रत्येव घटमि···

विवरणम् : प्राचीनश्छिन्नः कोटदष्टोजीर्णश्चायं ग्रन्थः । अतत्येषु पत्रे षु पत्राङ्का यथानियमं न वर्त्तन्ते । एतदीयपञ्चमपत्रस्य-तदुत्तरपत्रे ण सह काऽपि सङ्गतिर्नोपलभ्यते । प्रथमपत्रमस्य मसीलोपात् प्रायेणैवापाठ्यत्वमुपागतः । इतरेष्वपि पत्रे ष्वपसियमाणा मसी व्यक्तमुपलभ्यते । समाप्तिरहितस्यास्य मध्यतोऽपि महान् विच्छेदः परिलक्ष्यते ।

686

2076 आकाङ्क्षा माथुरी-टीका ।

Ākāṁkṣā Māthurī-ṭīkā.

By Mathurānātha Tarkavāgīśaḥ.

Substance: Country-made white and reddish paper. Size $18\frac{1}{2} \times 3\frac{3}{4}$ inches. Folia 17. Neatly written in Bengali character. 8-9 lines in a page. 100-109 latters in a line. Extent 850 ślokas. Appearance old. Prose. Condition good. Printed. Generally correct. Complete.

There is a square blank space in the middle of each page.

It begins fol. 1b: प्रसङ्गादाकांक्षां निरूपयितुं पृच्छति अथकेयमिति । शाब्दबोधे आकांक्षादिकं सहकारीति यदुक्तं तत्राकांक्षा केत्यर्थः । अविनाभावइति 'तत् पदार्थेन विना यो भावः सत्वं तदभावइत्यर्थः ।

It ends fol. 27a: तथाच पयसा सिञ्चतीत्यादावपि यदा तादृशनिश्चयोनास्ति तदापि शाब्दबोधस्यानुभवसिद्धत्वाद्व्यभिचार इति भावः दूषण···

For description see cat no. 668.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

687

1649 आकाङ्क्षामूल-वादार्थः ।

Ākāṁkṣāmūla-vādārthaḥ.

By Unknown author.

Substance: Country-made yellow paper. Size $20\frac{1}{4} \times 3\frac{3}{4}$ inches. Folio 1. Neatly written in Bengali character. 8-11 lines in a page. Extent 64 ślokas. Appearance old. Prose. Generally correct. Incomplete towards the beginning and at the end. Condition bad. Date not mentioned. Unpublished.

Beginning: ...तो हेतुमत्ताज्ञाने सधर्मितावच्छेदकत्वविशेषणं स्यादिति विभाव्य वोध्यं ।

End: तथाचोभयत्वैवानयनस्य स्वप्रकृत्यर्थत्वाभावात् संख्याकर्मत्वयोस्तदंशेऽन्वितत्वेपि नोक्तव्यभिचारः । एतेन··· ।

विवरणम्: शब्दचिन्तामण्यन्तःपातिन आकाङ्क्षाप्रकरणात् स्थलमेकमाहृत्य तस्योपरि क्रोडपत्रात्मकोनिबन्धोऽयं विनिर्मितः केनचनाज्ञातनामधेयेन नैयायिकप्रवरेण । प्रारम्भ-समाप्तिरहितोऽयम् । पत्रप्रान्तभागाः सलिलसमाश्लेषजचिह्नसम्पृक्ताः । पत्रं पत्राङ्करहितम् । प्रकाशनमस्याद्यापि न जातम् ।

688

743 आकाङ्क्षा-योग्यता-आसत्तिटीका ।

Ākāṁkṣā-yogyatā-Āsattiṭīkā.

By Mathurānātha Tarkavāgīśa.

Substance: Country-made yellow paper. Size $17\frac{1}{2} \times 4$ inches. Folia 1-40, Neatly written in Bengali character. 9 lines in a page. Extent 1975 ślokas. Appearance old. Prose. Generally correct. Complete.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

The Ms. contains Mathurānātha's commentary on the T.C. texts of Ākāṁkṣā, Yogyatā and Āsatti, often noticed and printed, B. I. Calcutta.

Beginning : प्रसङ्गादाकांक्षां निरुपयितुं प्र(पृ)च्छति अथ केति । (1b)

End : तथा च ओदनं पचतीत्यादौ सति तात्पर्यग्रहे यथाकथञ्चिदुपस्थिताकाशकलायादेरप्यन्वय बोध (बोध B.c.) इत्यध्याहारपक्ष एव सम्यगित्यपि बोध्यं

Colophon (fol. 19a) : इति शब्दपरिच्छेदरहस्ये आकांक्षारहस्यं ।

(fol. 31b) योग्यताग्रन्थरहस्यम् ।

(fol. 49) इति महामहोपाध्याय श्रील श्रीमथुरानाथतर्कवागीशभट्टाचार्य विरचिता- आसत्तिग्रन्थरहस्यं सम्पूर्णं ।

689

1033 आकाङ्क्षा-योग्यतापत्रिका ।

Ākāṁkṣā-yogyatā patrikā.

By Unknown author.

Substance : Country-made yellow paper. Size 17½ × 3¼ inches. Folio 1. Neatly written in Bengali character. 9 lines on a page. Extent 45 ślokas. Appearance fair. Prose. Incorrect. Complete.

The Ms. contains a Patrikā on Ākāṁkṣā and Yogyatā, no where noticed and printed.

Beginning (of Ākāṁkṣā) : सुवर्थ संख्यायाः स्वपदमेकत्वादिपरं । प्रतिपादकपद प्रतिपाद्ये तरस्मिन् यदित्यर्थः ।

End : अत्र केचित्, संख्यास्थले स्वेतरसम्बन्धेन इत्यादिनियमो न सम्भवति, कर्म्मतास्थले तादृशलघुप्रकारकसम्भव इति द्वयमुपात्तमिति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Beginning (of jogyatā): योग्यताज्ञानस्य शाब्दबोधहेतुत्वं बाधनिश्चयकाले शाब्दबोधवारणाय। न च विशिष्टबुद्धिं प्रति बाधनिश्चयत्वप्रतिबन्धकतयैव न तदानीमापत्ति-सम्भव इति वाच्यं।

End : चिन्ताविजं(?) बाधकालीन इच्छा सत्त्वे एतन्मते कदापि अना···ज्ञानं मन्यते इत्यस्मद् गुरुचरणाः।

विवरणम् : अस्मिन् पुस्तके आकांक्षायाः, योग्यताया श्चोपरि काचित् नवीना पत्रिका अद्याप्य-मुद्रिता उपलभ्यते।

690

73 आकाङ्क्षा-योग्यता-माथुरीटीका।

Ākaṁkṣā-yogyatā-māthurīṭīkā.

By Mathurānātha Tarkavāgīśa.

Substance : Country-made yellow and reddish paper. Size 19 × 4¼ inches. Folia 30 (by counting). Neatly written in Bengali character. 9 lines on a page. Extent about 1457 ślokas. Appearance old. Prose. Generally correct. Incomplete at the end. Date n.d. Printed.

There is a square blank space in the middle of each page.

Beginning (of the Ākāṁkṣā): ॐ नमः परमदेवतायै। प्रसङ्गादाकांक्षां निरूपयितुं पृच्छति अथ केयमाकांक्षेति। आकांखादिकं सहकारीति यदुक्तं तत्राकांक्षा कत्यर्थः।

End of the Ākāṃksā: अन्यथा घटवदनुस्वारपदादिनिश्चयत्वरहितं यद्यत्तदन्यत्वे-नैवलाघवाद्धेतुत्वौचित्यात् वृत्त्या घटकर्मत्वाद्युपस्थितेर्व्यापारवत्त्वाच्च नातिप्रसङ्गशङ्कापीति दिक्॥

Beginning of the Yogyatā : आकांक्षां निरूप्य योग्यतां निरूपयितुं पृच्छति ननु आकांक्षादिकं सहकारीति यदुक्तं तत्रादिपदग्राह्ययोग्यता केत्यर्थः।

End of the Yogyatā : प्रत्यक्षं प्रतितु विशिष्टप्रत्यक्षत्वेनप्रतिबध्यता प्रत्यक्षेच्छा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विरहविशिष्टगृहीताप्रामाण्यकबाधनिश्चयत्वेन प्रतिबन्धकतेति प्रत्यक्षमात्रसाधारणः प्रतिबध्य-प्रतिबन्धकभावः (।) शाब्दबोधं प्रति च शाब्दत्वेन प्रतिबध्यता तत्तच्छाब्देच्छाविरह-विशिष्टागृहीताप्रामाण्यकबाधनिश्चयत्वेन प्रतिबन्धकते [१२ (ख) पृः]

विवरणम् : तुरीयचिन्तामण्यन्तर्गतस्याकाङ्क्षाप्रकरणस्य योग्यताप्रकरणस्य च विवरणा-त्मकोऽयं निबन्धः। रचयिताऽस्य-श्रीमन्मथुरानाथ तर्कवागीशः। आकांक्षा हि वाक्यार्थ-ज्ञाने सहकारिकारणम्। सा च यत्पदं विना यत्पदस्यानन्वयस्तत्पदे तत्पदवत्त्वरूपा। यथा घटमानयेत्यत्र घटपदं विना "अम्"पदस्यानन्वयादम्पदे घटपदवत्त्वमाकांक्षा। योग्यताऽपि वाक्यार्थज्ञाने सहकारिणी। सा च एकपदार्थेऽपरपदार्थसम्बन्धरूपा। तथा च वह्निना सिञ्चतीत्यादौ योग्यताभावान्नान्वयबोधः। अत्रत्या-योग्यतामाथुरी-टीका समाप्ति-रहितावतिष्ठते। मुद्रणमस्य वारमेकं समजनि कलिकातास्थ 'एशियाटिक् सोसाइटि' समाख्यभवनतः।

This book is a part of the Śabdakhaṇḍa of Tattvacintāmaṇi, which the commentary thereon by Mathurānātha. The nature and defination of Ākāṁkṣā and Yogyatā have been elaborately discussed. The book is incomplete.

691

1727 आकाङ्क्षा-योग्यता-माथुरी।

Ākāṁkṣā-yogyatā-māthurī.

By Mathurānātha Tarkavāgīśa.

Substance : Country-made yellow paper. Size 18×3½ inches. Folia 28 (1b-28a). Neatly written in Bengali character. 8 lines in a page. Extent about 1168 ślokas. Appearance old and worn out. Prose. Generally correct. Incomplete at the end. Condition good. Date not mentioned. Unpublished.

There is a square blank space in the middle of each page.

It is same as our previous cat no. 690 already noticed.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Beginning : [२ (ख) पृ] ॐ प्रसङ्गादाकांक्षां निरूपयितुं पृच्छति अथ केति ।

End : कलहादौ च मिथ्याभि...वचनाच्छाब्दबोधानुपपत्तिश्च । तत्र शाब्दबोधं विना क्रोधाद्यनुपपत्तेः । अतएव उक्तं अत्यन्तासत्यपिस्तर्थे (?) ज्ञानं शब्दं करोति हि बाधितत्वप्रमात···अतः प्रामाण्य···[२८ (क) पृः)

विवरणम् : ग्रन्थोऽयं प्राचीनोऽपि नवीन इव प्रतिभाति । अन्तराऽन्तरा अपस्रियमाणा मसी समुपलभ्यते । आकांक्षामाथुरी सम्पूर्णैवात्रावतिष्ठते । योग्यतामाथुरी तु समाप्तिरहिता वर्त्तते । विवरणमस्य ६९० सूच्यामनुसन्धेयम् ।

For the contents see cat no. 690.

692

508 आकाङ्क्षा-योग्यतामूलम् ।

Ākāṁkṣā-yogyatāmūlam.

By Gaṅgeśopādhyāya.

Substance : Country-made yellow and reddish paper. Size $15\frac{3}{8} \times 2\frac{3}{4}$ inches. Folia 5 (1b-5b). Neatly written in Bengali character. 5 lines on a page. Extent 97 ślokas. Appearance old and worn out. Prose. Generally correct. Incomplete at the end. Date n. d. Printed.

There is a square blank space in the middle of each page.

Beginning : ॐ नमो गणेशाय । अथ केयमाङ्क्षा (?) न तावदविनाभावः नीलं सरोजमित्यादावभावात् (।) विमलं जलं नद्याः कच्छ इत्यत्र जलान्वितनद्या अविनाभूतकच्छे साकांक्षतापत्तेश्च ।

End : एतेन यत्रासम्बन्धग्राहकं प्रमाणं नास्ति तद् योग्यमिति निरस्तं (।) नापि बोधनीय-संसर्गाभावप्रमाविरहः प्रतियोग्यप्रसिद्धेः बोधनीयसंसर्गस्य पूर्व्वमप्रतीतत्वात् (।) योग्यता च न स्वरूपसत्युपयुज्यते इत्युक्त (?) अयोग्य तत्सत्त्वस्या···[५(ख) पृः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विवरणम् : तुरीयचिन्तामरयन्तर्गताकांक्षा-योग्यताप्रकरणात्मकोऽयं निबन्धः। अयं तावदाकांक्षायाः प्रथमतः किञ्चिदूनयोग्यतापूर्वपक्षावसानः। आकांक्षानाम वाक्यार्थज्ञाने सहकारिकारणम्। सा हि "यत्पदं विना यत्पदस्य नान्वयस्तत्पदे तत्पदवत्त्वरूपा"। यथा दण्डमानयेत्यत्र दण्डपदं विना "अम्"पदस्यानन्वयादमूपदे दण्डपदवत्त्वमाकांक्षा। योग्यताऽपि वाक्यार्थज्ञाने सहकारिणी। सा च "एकपदार्थेऽपरपदार्थसम्बन्धरूपा"। तथाच योग्यताभावाद् वह्निना सिञ्चतीत्यादौ नान्वयबोधः। प्राचीनोऽयं जीर्णतामुपागतः। माथुरीसहयोगेनास्य वारमेकमेव मुद्रणं समजनि 'एशियाटिक् सोसाइटि'समाख्यभवनतः।

693

453 आकाङ्क्षा-रहस्यम्।

Ākāṁkṣa-Rahasyaṁ.

By Mathurānātha Tarkavāgīśa.

Substance: Country-made yellow and reddish paper. Size $17\frac{1}{4} \times 3\frac{3}{4}$ inches. Folia 21 (1a-21b). Neatly written in Bengali character. 8 lines on a page. Extent about 924 ślokas. Appearance old. Prose. Generally correct. Complete. Date n. d. Printed.

There is a square blank space in the middle of each page.

A commentary on the Ākāṁkṣā (a part of the Śavdacintāmaṇi) of Gangeśa by Mathurānātha.

Beginning: ॐ नमो गणेशाय। प्रसङ्गादाकाङ्क्षां निरूपयितुं पृच्छति अथ केयमिति (।) आकाङ्क्षादिकं सहकारोति यदुक्तं तत्राकांक्षा केत्यर्थः।

End: अन्यथा घटपदवदनुस्वारपदादिनिश्चयत्वरहितं यद्यत्तदन्यत्वेनैव लाघवाद्धेतुत्वौचित्यात् वृत्त्या घटकमनस्त्वाद्युपस्थिते व्यापारत्वाच्च नातिप्रसङ्गशङ्कापीतिदिक् ॥०॥

Colophon: इति शाब्दपरिच्छेदरहस्ये आकांक्षाग्रन्थरहस्यं समाप्तं॥ आकांक्षां निरूप्य योग्यतां निरूपयितुं पृच्छति ननु केयमिति (।) आकांक्षादिकं सहकारीति यत्पूर्वमुक्तं तत्रादिपदग्राह्ययो......

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विवरणम् : ग्रन्थस्यास्य समाप्त्यनन्तरं [२१ (ख) पृः] योग्यतारहस्यस्य प्रारम्भमात्रमवतिष्ठते। एतदीयपत्राणां प्रायः सर्वेषामेव पार्श्वैकदेशभागा जलसमाश्लेषजचिह्नान्विताः। केषुचित् पत्रपार्श्वभागेषु टिप्पन्योवर्त्तन्ते।

For description of contents see cat no. 690.

694

574 आकाङ्क्षारहस्यम्।

Ākāṁkṣā-rahasyaṁ.

By Mathurānātha Tarkavāgīśa.

Substance: Country-made yellow paper. Size $15\frac{1}{4} \times 2$ inches. Folia 15 (by counting). Neatly written in Bengali character. 6 lines on a page. Extent 630 ślokas. Appearance old. Prose. Generally correct. Incomplete both ends.

The Ms. contains Mathurānātha's commentary on Ākāṁkṣā, often noticed and printed, B.I. cat T.C. Vol. IV. pp. I. The Ms. begins and ends abruptly. The Ms. wants 5 lines at the beginning and 5 lines at the end of the printed eddition.

Beginning: बोधे तादृश शाब्दबोधाभाव आकांक्षेति फलितमिति (फलितार्थ इति)फलितार्थ इति वाच्यं। घटकर्मत्वमित्यादावतिव्याप्ते(प्ति) रित्यतः पारिभाषिकमभिधानापर्य्यवसानपदार्थमाह यस्येति। (p. 208)

End: एवं धारावाहिकसमानाकारशाब्दबुद्धावपिभवदुक्तैव गतिरिति भावः। आकांक्षायाः आकांक्षाज्ञानस्य स्वजनकोपस्थितेः शाब्दबोधजनकोपस्थितेः। अ- (p. 243)

विवरणम् : अस्मिन् पुस्तके मथुरानाथकृता तत्त्वचिन्तामरायन्तर्गताकांक्षावादटीका आद्यन्तखण्डिता दृश्यते। ग्रन्थस्तु एसियाटिक सोसाइटि समाजात् मुद्रित उपलभ्यते। अत्र विषयादिकं सर्वं विवरणं प्रागेवोक्तं तत्रैव द्रष्टव्यमिति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

695

553 आख्यातवादः ।

Ākhyātā-vādaḥ.

By Raghunātha Śiromaṇi.

Substance: Country-made yellow paper. Size 18 × 3¼ inches. Folia 2 (1a-2b). Neatly written in Bengali character, 9 lines on a page. Extent 102 ślokas. Appearance very old. Prose. Generally correct. Incomplete at the end. Date n. d. Printed.

For this work see I.O. No. 2043. Hall's Index, p. 58, No. CLXX.

Beginning: श्रीरामः सत्यं । आख्यातस्य यत्नोवाच्यः पचति पाकं करोतीति यत्नार्थककरोतिना सर्वाख्यातविवरणात् (।) व्यवहारादिव बाधकं विना विवरणादपि व्युत्पत्तेः (।)

End: अपि च धात्वर्थतावच्छेदकफलशालित्वं कर्मत्वं नतु धात्वर्थजन्यफलशालितामात्रं गमिपत्योः कर्मत्वस्य पूर्वस्मिन् देशे त्यजेश्चोत्तरस्मिन् स्पन्दस्य पूर्वापरदेशः स्वपदात् फलावच्छिन्नव्यापारबोधकत्वादेव धातूनां सकर्मकताव्यवहारो भाक्तस्तु जानात्यादेः तादृशधातुयोग एव च कर्मप्रत्ययाः ।

विवरणम्: निबन्धोऽयं व्यरचि तार्किककुलचूडामणिना रघुनाथशिरोमणिना । तत्त्वचिन्तामणिकृद्रचिताख्यातवादापेक्षयाऽप्ययं युक्तिपूर्णोऽभिनवप्रणाल्या विनिर्मितश्चेति प्रतीयते । आख्यातशक्तिवादनाम्नाऽप्ययं नैयायिकगोष्ठ्यां प्रसिद्धः । समाप्तिरहितेऽस्मिन् प्रथमतः किञ्चिदूनधात्वर्थतावच्छेदकफलशालित्वरूपकर्मत्वनिरूपणमवतिष्ठते । प्राचीनोऽयं जीर्णत्वमापन्नः । मसीलोपोपक्रमोऽस्मिन् संवृत्तः । मुद्रणमस्य वारमेकमेव समजनि "एशियाटिक सोसाइटि" समाख्यभवनतः ।

696

2410 आख्यातवादः ।

Ākhyāta-vādaḥ.

By Rāghunātha Śiromāṇī.

Substance: Country-made yellow paper. Size 17 × 2½ inches.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Folia 5 (1-5). Neatly written in Bengali character. 5 lines in a page. 95 latters in a line. Extent about 148 ślokas. Appearance old. Prose. Condition good. Generally correct. Complete. Printed.

There is a square blank space in the middle of each page.

Beginning fol. 1a: ॐ नमः सर्वभूतानि विष्टभ्य परितिष्ठते ।
अखण्डानन्द बोधाय पूर्णाय परमात्मने ॥

पचति पाकं करोति इति यत्नार्थक करोतिना सर्वाख्यातविवरणात् व्यवहारादिबाधकं विना विवरणादपि व्युत्पत्तेः ।

End fol. 5b: इति गुरुमतमपि तत्र तत्र तादृशयत्नाननुभवप्रसङ्गादनुपादेय-मिति दिक् ।

Colophon : इति महामहोपाध्याय श्रीभट्टाचार्य शिरोमणिविरचिताख्यातवादः सम्पूर्णः ।

post Colophon : श्रीरामभद्रदेवशर्म्मणः पुस्तकमिदं स्वाक्षरञ्च ।

विवरणम् : ग्रन्थोयं महामहोपाध्याय श्रीमद्रघुनाथशिरोमणिविरचितः । आख्यातस्य अर्थनिर्णयोऽत्र समाहितः । पूर्णतां गतोयं ग्रन्थः । प्राचीनोपि स्पष्टाक्षरश्चायं ।

For the description of contents see cat. No. 81 or cat. No. 695.

697

1418 आख्यातवादः ।

Ākhyātavādaḥ.

By Unknown author.

Substance: Country-made yellow paper. Size $14\frac{1}{2} \times 3\frac{1}{4}$ inches. Folia 4 (52a-55b). Neatly written in Bengali character. 6 lines in a page. Extent 93 ślokas. Appearance old. Prose. Generally correct. Incomplete at the end. Condition good, torn and worn out Date not mentioned.

There is a square blank space in the middle of each page.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Beginning : [५२ (क) पृः]···कौटिल्यमेवार्थः प्रतीयते न तु पौनःपुन्यं प्रतीयते एवकारस्वरू...दिति तन्न पौनःपुन्यं प्रतीयत एवाधिकं कौटिल्यमेवकारेण तु कौटिल्यार्थमपहायः······ ।

End : अत्र यद्यपि नामार्थ-धात्वर्थयोरभेदातिरिक्तसम्बन्धेनान्वयबोधस्याव्युत्पन्नत्वात् कथं क···[५५ (ख) पृः] ।

विवरणम् : आख्यातवादात्मकोऽयं निबन्धः । रचयितुर्नामात्र न वर्त्तते । धातुविषयिणी नातिविस्तृता मनोज्ञा समालोचनाऽत्रावतिष्ठते । प्रारम्भसमाप्ती अस्य न विद्येते । प्रकाशनमस्य न जातम् ।

698

1733 आख्यातवादः ।

Ākhyātavādaḥ.

By Unknown author.

Substance: Country-made yellow papter. Size 14×3½ inches. Folia 11 (by counting). Neatly written in Bengali character. 5-6 lines in a page. Extent about 253 ślokas. Appearance old and worn out. Prose. Generally correct. Incomplete towards the beginning. Condition very bad. Date n. d. Unpublished.

There is a square blank space in the middle of each page.

Beginning : [40 (क) पृः] कर्मतासम्बन्धावच्छिन्नाभावाप्रसिद्धिवीजञ्च त्रस्यनियामकसम्बन्धस्य प्रतियोगितानवच्छेदकत्वमिति ।

End : भोक्तुं व्रजतीत्यत्र भोजनेच्छाधीनव्रजनानुकूलकृतिमानितिधीः कर्त्तुमिच्छतीत्यादौ तुम्भेदेनान्यतरवैयर्थ्यमिति न्यायाददोषः ।

Colophon : इत्याख्यादवादः सम्पूर्णः ॥

विवरणम् : आख्यातनिरूपणात्मिकेयं पुस्तिका केनचनाज्ञातनामधेयेन नैयायिकेन विरचिता । प्रारम्भोऽस्या न वर्त्तते । अत्राख्यातस्योहापोहमुखेन सुविस्तृतसमालोचनमास्ते । प्राचीनतां जीर्णताञ्चसमुपागतेयम् । प्रकाशनमस्या अद्यापि न जातम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

699

1359 (१) आख्यातवादः।

Ākhyātavādaḥ.

By Raghunātha Śiromaṇi.

(२) आख्यातवादटीका।

Ākhyātavādaṭīkā.

By Mathurānātha Tarkavāgīśa.

Substance: Country-made yellow paper. Size 14 × 3½ inches. Folia 2-9 (by counting). Neatly written in Bengali character. 8 lines on a page. Extent 340 ślokas. Appearance old and rotten. Prose. Generally correct. Incomplete at the end.

The Ms. contains (1) Ākhyātavādaḥ by Raghunātha Śiromaṇi with (2) Mathurānātha's commentary on it, both noticed and printed in Bib. Ind., TC. pt. IV, Vol. II. The Ms. ends abruptly.

Beginning: See our previous Ms. already noticed.

End: (1) लाघवादेकवचनत्वादिना एकत्वादौ शक्तत्वाच्चेत्तदपि नास्ति। कृता संख्यानभिधानात्।

(2) एवं प्रवृत्तितापकृष्टस्याख्यातानुपस्थाप्यत्वे वर्त्तमानत्वं स्वाख्यातद…

विवरणम्: अस्मिन् पुस्तके रघुनाथशिरोमणिकृताख्यातवादोऽन्ते खण्डितः। तथा आख्यातवादटीका मथुरानाथकृता अन्ते खण्डिता "एसियाटिक सोसाइटि" समाजात् समूलं मुद्रिता उपलभ्यते।

700

1556 आख्यातविचारः।

Ākhyāta-Vicāraḥ.

By Gadādhara Bhaṭṭācārya.

Substance: Country-made white paper. Size 15 × 6 inches. Folia 35 (by counting) Neatly written in Bengali character. 6-9 lines

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

in a page. Extent about 720 ślokas. Appearance: New and worm eaten Prose. Generally correct. Complete. Condition good. Date not mentioned. Available in print Ākhyātavāda as called as Lakārārtha Vicāra by Gadādhara Bhaṭṭācārya.

Beginning : ॐ नमः शिवाय। धातुप्रकृतिकाश्च-लकारकृत्सन्यङ्निच्प्रभृतयः प्रत्ययाः केचिद्धात्वर्थान्वितमधिकमर्थं ब्रुवते।

End : तस्य विध्यर्थत्वे तात्पर्येणाधुनिकानां न भुञ्जितेत्यादिप्रयोगापत्तेरिति।

Colophon : इति महामहोपाध्याय श्रीलश्रीयुक्तगदाधरभट्टाचार्यविरचिताख्यात-विचारः सम्पूर्णः ॥

विवरणम् : तार्किकचूडामणि-गदाधरभट्टाचार्यविरचित-व्युत्पत्तिवादनामधेयग्रन्थान्तर्गतोऽयमाख्यातविचारनामकोनिबन्धः। लकारार्थविचारनाम्नाऽप्ययं विपश्चित्समाजे समधिकं प्रथते। वाक्यार्थबोधकेषु-लकारार्थविचारात्मकेषु नव्यनैयायिकनिबन्धेष्वयमेव सर्वांशेनानवद्यः सर्वत्र समादृतश्च। नूतनस्याप्यस्य प्रायः प्रतिपत्रमेव कीटदंशनजचिह्नानि व्यक्तमुपलभ्यन्ते। लिपिरेतदीया व्यक्तिद्वयेन विनिर्मिता। अस्य पत्रपार्श्वेषु पत्राङ्का न वर्तन्ते। प्रकाशनमेतदीयमनेकशः समजनि।

In the Ms. there is no page mark, and written by the two hands.

701

1005 आख्यातशक्तिवाद-विवृतिः

Ākhyātaśaktivāda-Vivṛtiḥ.

By Mathurānātha Tarkavāgīśa.

Substance: Country-made yellow paper. Size $17\frac{1}{4} \times 3\frac{1}{4}$ inches. Folia 13 (by counting). Neatly written in Bengali character. 5-9 lines on a page. Extent about 455 ślokas. Appearance old, torn and worn out. Generally correct. Prose. Incomplete at the end. Date n.d. Published.

There is a square blank space in the middle of each page.

A commentary on the Ākhyāta-śaktivāda of Raghunātha by Mathurānātha.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Beginning : ॐ नमः शिवाय । कुञ्चिताधरपुटेन पूरयन्, वंशिकां प्रचलदङ्गुलि-पंक्तिः । मोहयन्नखिलवामलोचनाः । पातु कोऽपि नवनीरदच्छविः ॥ श्रीमता मथुरानाथ-तर्कवागीशधीमता, आख्यातशक्तिवादस्य क्रियते विवृतिः शुभा ॥ आख्यातस्य शक्यं निरूपयति आख्यातस्येति ।

End : तादृशभावनाविशेषणीभूतधात्वर्थादिवारणाय विशेष्येति तथाच तादृशभावना-विशेष्यत्वेनान्वये यन्नियामकं तदेव संख्यान्वयेपि नियामकं विशेष्यत्वञ्च प्रतियोगितेतर-सम्बन्धेन बोध्यं तेन ल...चति इत्यादौ नञर्थेन संख्यान्न··· [१४(ख) पृः]

विवरणम् : तार्किकशिरोमणि - रघुनाथविरचिताख्यातशक्तिवादस्य टीकापरोऽयं निबन्धः । अस्य खलु निबन्धकारः तर्कवागीशोपनामकः श्रीमान् मथुरानाथः । आख्यातं नाम यत्तत्वावच्छिन्नशक्यताकम् । आख्यातत्वञ्च शक्तेतविशेषसम्बन्धेन आख्यातपदवत्वम् । तच्च न शक्तताबच्छेदकं परन्तु प्रत्येकं तित्वादिकमेव तत् तित्वादिना प्रकारेणाज्ञानदशायां आख्यातत्वप्रकारेण ज्ञानात् शाब्दबोधानुदयस्य सर्वसिद्धत्वात् । यत्नत्वञ्च प्रवृत्तित्वं प्रवृत्तित्वञ्च रागजन्यतावच्छेदकतया सिद्धमित्यादिरीत्या मूलग्रन्थव्याख्यानमुखेनाख्यातशक्तौ सुविस्तृता समालोचनाऽत्रावतिष्ठते, तत्त्वचिन्तामणिकृद्‌रचिताख्यातवादग्रन्थात् शिरोमणिरचिताख्यात शक्तिवादग्रन्थे युक्तिपूर्णतया अभिनवप्रणाल्या विनिर्मिततया च। 'एशियाटिक् सोसाइटि' भवनतः प्रकाशिततत्वचिन्तामणिग्रन्थशेषे मथुरानाथतर्कवागीशरचितविवृत्या सह स्वातन्त्र्येण प्रकाशितः । समाप्तिरहितोऽयम् । इममन्तरा च त्रयोदशपत्रं न वर्तते । प्रायः सर्वेष्वेव पत्रेष्वपस्रियमाणा मसी समुपलभ्यते । पराचीनतां छिन्नतां जीर्णताञ्च समुपागतोऽयम् । पत्राण्यस्य प्रायेणैव विषमाणि विद्यन्ते ।

In the Ms. some pages are almost illegible on account of the faiding away of the ink used.

702

1011 आख्यातशिरोमणि-माथुरी टीका ।

Ākhyāta-śiromaṇi—Māthurī-ṭīkā.

By Mathurānātha Tarkavāgīśa.

Substance: Country-made yellow paper. Size $16\frac{3}{4} \times 3$ inches. Folia 20 (by counting). Neatly written in Bengali character. 7 lines

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

on a page. Extent about 705 ślokas. Appearance old, torn and worn out. Prose. Incomplete towards the beginning and in the middle. Generally correct. Date n.d. Published.

There is a square blank space in the middle of each page.

A commentary on the Ākhyāta śaktivāda of Raghunātha by Mathurānātha Tarkavāgīśa.

Beginning : [२ (क) पृ:] शुक्लादिपदानां गुणिनोऽर्थः (।) ननु चैत्रोजानातीत्यादौ चैत्रे ज्ञानोदेवाश्रयत्वसम्बन्धेन ? साक्षादन्वयोऽस्तु किं लक्षणया अतएवमानाकृतोपि(?) तथैव वर्णयन्ति इत्यत आह चैत्र इत्यादि

End : इदमुपलक्षणं यत्नत्वमपेक्ष्याश्रयत्वत्वादेर्गुरुत्वादित्यपि बोध्यं इति दिक् ॥

Colophon : इतिमहामहोपाध्याय - श्रीमथुरानाथतर्कवागीशभट्टाचार्यविरचिताख्यातविवृतिः समाप्ता ॥

Post Colophon : श्रीरामः सत्य। नारायण हरे राम कृष्ण विष्णो जनार्द्दन गोविन्द माधवानन्त वासुदेव नमोस्तुते ॥

विवरणम् : रघुनाथशिरोमणिरचिताख्यातशक्तिवादस्य टीकापरोऽयं ग्रन्थः। अस्य खलु रचयिता तर्कवागीशोपनामकः श्रीमान् मथुरानाथः। आख्यातस्य यत्नत्वावच्छिन्नशक्यताकत्वमर्थः। आख्यातत्वञ्च न जातिः, तित्वादिना शाङ्कर्यात्, किन्तु शङ्केतविशेषसम्बन्धेन आख्यातपदवत्त्वम्। शक्ततावच्छेदकत्वञ्च प्रत्येकं तित्वादिकम्। यत्नत्वञ्च प्रवृत्तित्वं, प्रवृत्तित्वञ्च रागजन्यतावच्छेदकतया सिद्धम्। अहं यते अहं प्रवृत्तोऽस्मि अहं करोमीत्यनुव्यवसायसाक्षिकोनिवृत्तिजीवनयोनियत्नयोः रागजन्यत्वाभावात् तथाविधानुव्यवसायाभावाच्चेत्यादीनामाख्यातार्थानां रघुनाथरचिताख्यातशक्तिवादव्याख्यानमुखेन सुविस्तृतविवरणमत्र वर्त्तते। अस्य प्रारम्भीयं पत्रद्वयं न विद्यते। अन्तरा च (३-१५) त्रयोदशपत्राणि नावतिष्ठन्ते। व्यक्तिद्वयेन लिपिरस्य विनिर्मिता। प्रथमपत्रद्वयमस्ति विषमम्। क्वचित् क्वचिन्मसीलोपोपक्रमः संवृत्तः। पराचीनत्वेनायं छिन्नतां जीर्णताञ्च समुपागतः। मुद्रणमस्य वारमेकमेव समजनि 'एशियाटिक् सोसाइटि' भवनतः।

It is another copy of the work noticed under No. 1005 (cat no. 701)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

703

1012 आचार्यानुमान-गादाधरी-पत्रिका ।

Ācāryānumāna Gādādharī-patrikā.

By Umācarana Śarmā.

Substance: Machine made white paper. Size $16\frac{1}{2} \times 3\frac{1}{2}$ inches. Folia 2 (by counting). Neatly written in Bengali character. 10-12 lines on a page. Extent 126 Ślokas. Appearance old, torn and worn out. Prose. Generally correct. Incomplete at the end. Date n.d. Unpublished.

Beginning: ॐ नमः शिवाय । विशेषणं धर्मितावच्छेदकं विशेष्यञ्च विधेयं तथा च विधेयतावच्छेदकावच्छिन्नं यद्धर्मविशिष्टे तत्समानकालीनत्वेनावगाहते याऽशाब्दी बुद्धिः सा तद्धर्मजस्येति दीधितिः । तथाचेतीति यद्धर्मविशिष्टे यद्धर्मावच्छेदकीकृते तत्समान-कालीनत्वेन विधेयतावच्छेदकावच्छिन्नमवगाहते विधेयतावच्छेदकतापर्याप्त्यधिकरणं यद्रूपं...

End: एवं विधेयतानिरूपितविशेष्यतावच्छेदकत्वानवच्छिन्नत्वनिवेशे समानकालीनत्व-दलसार्थक्यमपि प्रागुक्तस्थले व्यभिचारवारणाय इति चेन्नैवं विधेयतानिरूपितत्वनिवेशे समुदायदलसार्थक्यसम्भवेपि गुरुतरहेतुकविशेषणजन्यत्वसिद्धिसम्भवेपि न लघुहेतुना तज्जन्यत्व-सिद्धिमाह दीधितावथवेति इति···

विवरणम्: अनुमानचिन्तामणयन्तःपाति परामर्शप्रकरणान्तर्गत-उदयनाचार्यमतेना-नुमाननिरूपणपरोग्रन्थ एव प्राचीनैराचार्यानुमानत्वेनाभिहितः । तदीयायागादाधर्य्याष्टीकाया उपरि पत्रिकात्मकोनिबन्धोऽयं व्यरचि उमाचरणनामधेयेन केनचन नैयायिकेन । उक्त-टीकायाः कतिपयस्थलानामुपर्य्येव पत्रिकाः समाप्तिरहितेऽस्मिन्नुपलभ्यन्ते । अत्यन्तसंक्षिप्त-त्वेनैवार्जवरहितत्वात् प्रायेणैवास्पष्टार्थकत्वाच्च पत्रिकेयं न मनागपि प्रशंसापदवीमधिरोढुमर्हति । पराचीनत्वं छिन्नत्वं जीर्णत्वञ्च समुपागतोऽयम् । अस्य मुद्रणमद्यापि न जातम् ।

704

1360 आचार्यानुमान गादाधरी-पत्रिका ।

Ācāryānumāna Gādādharī-patrikā

By Unknown Author.

Substance: Country-made paper. Size $16\frac{1}{2} \times 33\frac{1}{4}$ inches.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Folia 1-2 (by counting). Neatly written in Bengali character. 10 lines on a page. Extent 108 ślokas. Appearance good. Prose. Generally correct. Complete.

The Ms. contains a dissertation by an unknown author on Gadādhara's commentary on the inference of Ācārya (Udayana), generally known as Ācāryānumāna. It is not printed in "Kroḍapatra saṁgraha" (chss).

Beginning : तथा च विधेयतावच्छेदकावच्छिन्नं यद्धर्म्मविशिष्टे यद्धर्म्मसमानकालीनत्वेनावगाहते याऽशाब्दी बुद्धिः वा तद्धर्म्मजन्येति शिरोमणिः ।

End : इदमत्रावधेयं, किञ्चिद्विशिष्टे विशेषणतापन्नयद्धर्म्मनिष्ठावच्छेदकतानिरूपकत्वनिवेशकल्पेऽवच्छेदकतायां यद्धर्म्मनिष्ठत्वनिवेशनमनर्थकं एवं समानकालीनत्वदिशि यत्पदार्थनिवेशेनैव सामान्यव्याप्तिलाभादिति ।

विवरणम् : अस्मिन् पुस्तके कस्य चिदज्ञातनामधेयस्याचार्यानुमानगादाधरीमधिकृत्य काचित् पत्रिका सम्पूर्णा दृश्यते । नासौ क्रोडपत्र संग्रहे मुद्रिता ।

705

1617 आचार्यानुमान-टीका ।

Ācāryānumāna-ṭīkā.

By Mathurānātha Tarkavāgīśa.

Substance: Country-made yellow paper. Size $17\frac{1}{2} \times 3\frac{1}{4}$ inches. Folia 2 (by counting). Neatly written in Bengali character. 67 lines in a page. Extent 51 ślokas. Appearance old. Prose. Generally correct. Incomplete at the end. Condition good. Date not mentioned. Published.

There is a square blank space in the middle of each page.

Beginning : श्रीदुर्गा । आचार्योक्तप्रमाणमाशङ्कते अथेति । परामर्शमात्रं ज्ञानमात्रं लिङ्गपरामर्शोयथोक्तलिङ्गपरामर्शत्वाश्रयः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

End : एवञ्च पर्वतनिष्ठविशेष्यतानिरूपितधूमसमानकालीनत्वविषयताशालिनीधूमसमानकालीनत्वज्ञानाजन्यानुमितिः पक्ष इति भावः । प्रत्येकदलव्यावृत्तिस्तु हेतुव्याख्यानावसरे स्फुटीभविष्यति । ज्ञायमानविशेषणेति । पर्व...

विवरणम् : अनुमानचिन्तामण्यन्तःपातिपरामर्शप्रकरणान्तर्गतस्योदयनाचार्योक्तानुमानप्रमाणप्रदर्शनपरग्रन्थस्य व्याख्यानात्मकोऽयं निबन्धः । रचयिताऽस्य तर्कवागीशोपनामकः श्रीमान् मथुरानाथः । प्रकृतग्रन्थस्य प्रथमतः कियदंशस्य व्याख्यानमत्रावतिष्ठते । पत्रद्वयमेव पत्राङ्करहितमुपलभ्यते । प्राचीनोऽप्ययं नवीन इव प्रतिभाति । प्रकाशनमस्य सकृदेव जातम् ।

For description of contents see cat no. 706.

706

383 आचार्यानुमानटीका

Ācāryānumānaṭīkā.

By Gadādhara Bhaṭṭācārya.

Substance: Country-made yellow paper. Size $18\frac{1}{4} \times 3\frac{3}{4}$ inehes. Folia 18 (1a-18a) 6-9 lines on a page (by counting). Neatly written in Bengali character. Extent about 830 ślokas. Appearance old but neatly written. Prose. Generally correct. Complete. Date n.d. Printed.

Beginning : उपलक्षणस्यैव परिचायकत्वेन प्रसिद्धतया परिचायकत्वाप्रतिक्षेपेण लिङ्गमेव विशेषणमिति मूले विशेषणत्वोपगमोऽसङ्गतः ।

End : सुखादिसाधारणात्मविशेषगुणत्वावच्छिन्नं प्रति मनस्त्वेन कारणताकल्पनात् तत एवानुमितेः सकारणत्वनिर्वाहे अनुमितित्वावच्छिन्नं प्रति ज्ञानत्वेन हेतुत्वं निर्युक्तिकमित्यस्वरसबीजमत्र बोध्यम् ॥

Colophon : इति परामर्शटिप्पनी सम्पूर्णा ।

Post Colophon : श्रीगङ्गादासशर्मणः पुस्तकमिदं स्वाक्षरञ्च ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विवरणम् : तत्त्वचिन्तामरयनुमानखराडीयपरामर्शग्रन्थान्तर्गत "एवं लिङ्गपरामर्श एव कारणं नतु परामृश्यमानं लिङ्गम्" इत्यारभ्यावशिष्टः परामर्शग्रन्थ एवाचार्यानुमानत्वेन कैश्चनार्वाचीनैरभ्यधायि अनुमितौ लिङ्गोपहितलैङ्गिकभानवायुदयनाचार्यमतावलम्बनेन रचितत्वात्। वस्तुतस्तु ग्रन्थोऽयं प्रारम्भविहीनः परामर्शात्मकः। उक्तग्रन्थस्य दीधित्यभिधव्याख्यानमाश्रित्य गदाधरभट्टाचार्येण विनिर्मितोऽयं टीकापरोनिबन्धः। अयं खलु परामर्शविषयकनानासूक्ष्मसमालोचनावत्त्वेनातीवोपादेयतामासादितवानित्यतास्त्येव नैयायिकानामैकमत्यम्। अतत्य विचारवाहुल्यं नवीकृत्य युक्त्युद्भावनञ्चाभिनवां विस्मयसन्ततिं जनयतः। एतदीयपत्रप्रान्ते "आचाभटी"त्यङ्कितमस्ति ; पुष्पिकात्वस्य "इति परामशटिप्पनी सम्पूर्णा" इति। क्वचित् पत्रपार्श्वे टिप्पनी वर्त्तते। अयं हि प्राचीनोमुद्रितश्च।

विवरणम् : तदादिसर्वनामपदशक्तिविचारपरेयं पुस्तिका। ग्रन्थकर्तुर्नामास्यां नोपलभ्यते। तदादिसर्वनामपदानां पुष्पवन्तपदस्य च शक्यः केववलमत्र निरूपिताः परं वर्तन्ते। अस्याः ४ (ख) पृष्ठायां प्रायुपसर्गशक्तिविचारस्य प्रथमतः कियदंशोऽवतिष्ठते। अस्या अन्तिमपत्रीया संख्या न विद्यते, अन्तिमपत्रमस्या लेखनिकान्तरलिखितत्वात् विषयान्तरोटङ्कितत्वाच्च ह्यन्यदीयमित्यनुमन्यते। इयं खलु पराचीना। मुद्रणमस्या न जातम्।

819

931 तर्क-गादाधरी टीका।

Tārka-Gādādharī ṭīkā.

By Gadādhara Bhaṭṭācārya.

Substance : Machine-made reddish paper. Size $18\frac{1}{4} \times 4$ inches. Folia 25 (1a-25b). Neatly written in Bengali character. 8 lines in a page. Extent about 1,244 ślokas. Appearance fresh but the last folio in is torn. Prose. Generally correct. Complete. Date n.d. Published.

A commentary on the Cintāmaṇi dīdhiti Gadādhara Bhaṭṭācārya.

Beginning : तर्कात् यत्रानुमित्यौपयिकव्याप्तिनिश्चयविरोधिशङ्कानिवृत्तिरुपेयते तत्र

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तर्ककारणीभूतस्यापादकनिष्ठापाद्यव्याप्त्यापाद्यविरहपक्षतावच्छेदकादीनां निश्चयस्य विरोधिनो या शङ्का तन्निवृत्त्यर्थमपि तर्कात् पूर्वं तर्कान्तरमुपेयं तत्पूर्वमपि तज्जनकनिश्चयविरोधिशङ्का निवृत्त्यर्थं तर्कान्तरमित्यनवस्थिततर्कधाराप्रसङ्ग इत्याशङ्कते मूले तर्कस्येति (।)

End : नैयायिकनये शक्ते प्रा...तया तदतिरिक्तत्वघटितसाध्याप्रसिद्धेरितिभावः। एतत् प्रयोजकत्वं ॥

Colophon : इति तर्कटिप्पनी समाप्ता ॥

Post Colophon : श्रीगुरुवे नमः। श्रीशिवप्रसादशर्मणः स्वाक्षरमेतत् ॥ श्रीहरिदेवतर्कसिद्धान्त भट्टाचार्य्यस्य पुस्तकं ॥

विवरणम् : अनुमानचिन्तामण्यन्तर्गततर्कप्रकरणीयदीधिते व्याख्यानपरोऽयं निबन्धः। अस्य खलु निबन्धा श्रीगदाधरभट्टाचार्यः। तर्कस्तावदापाद्यव्याप्यापादकवत्ता-निश्चयजन्यज्ञानम्। स च शङ्काविघटकत्वेन वह्निधूमादिव्याप्तिग्राहकः। ननु तर्कस्य व्याप्तिग्रहमूलकत्वेन तत्रापि शङ्काभवेत्। तदनुत्पत्त्यर्थं यदि तर्कान्तरस्या-वश्यकत्वं स्यात्तदा तादृशतर्कान्तरकारणविघटकशङ्काविघटकत्वेन तर्कान्तरस्यापि भवेदावश्य-कत्वमिति तत्र तत्रापीत्यादिप्रणाल्याऽनवस्थेति चेत्। 'यावदाशङ्कं तर्कानुसरणात्।" "यत्र च व्याघातेन शङ्कैव नावतरति तत्र तर्कं विनैव व्याप्तिग्रहः।" यादृशवह्नि-धूमव्याप्तिग्राहकतर्कात् प्राक् तादृशतर्कविघटकस्य शङ्कासामान्यस्य तर्कान्यवह्न्यन्वय व्यतिरेकानुविधायित्वज्ञानादेवानुत्पत्तिस्तादृशतर्कस्याकारः "धूमो यदि वह्न्यसमवहिताजन्यत्वे सति वह्निसमवहिताजन्यस्यान्नोत्पन्नः स्यादिति। मुख्यतो विषयस्यास्य समाश्रयणेन तर्क-प्रकरणीयदीधितिमधिकृत्य सुविचारपरिपूर्णां विस्तृतां समालोचनामत्र कृतवान् निबन्धकारः। ग्रन्थस्यास्य प्राचीनत्वेऽपि विलक्षणं नावीन्यमुपलभ्यते। एतदीयान्तिमपत्रस्य पार्श्वैक-देशश्छिन्नतामुपगतः। मुद्रणमस्य वाराणसीस्थ चौखाम्बामुद्रणयन्त्रालयतो वारमेकमेव समजनि।

820

1629 तर्क-टीका।

Tarkaṭīkā.

By Jagadīśa Tarkālaṁkāra.

Substance : Country-made yellow paper. Size $18\frac{1}{2} \times 3\frac{1}{2}$ inches.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Folia 10 (2a-11a). Neatly written in Bengali character. 6-8 lines on a page. Extent about 393 ślokas. Appearance old. Prose. Generally correct. Incomplete towards the beginning and at the end. Condition good. Date not mentioned. Published.

A commentary on Cintāmaṇi dīdhiti of Raghunātha by Jagadīśa.

There is a square blank space in the middle of each page.

Beginning : [२ (क) पृः]...सामानाधिकरण्यावगाहित्वादिति मूलोक्ततर्कस्य तादृश कारणत्वग्राहकत्वानुरोधेनैव ग्राहकत्वं सम्भवतीत्याशयेनाह सामानाधिकरण्येति ।

End : व्याप्य......दशायामपि(?)व्याप्तेरलौकिकप्रत्यक्षप्रमोत्पादेन व्यभिचारादाह वोध्यादिमदिति व्याप्तिमद्विशेष्यकतर्कत्वादिना हेतुत्वमपेक्ष्य व्याप्त्यादिमत्त्वेन [११(क) पृः]

विवरणम् : अनुमानचिन्तामण्यन्तःपाति तर्कप्रकारणीयदीधितेः टीकापरोऽयं ग्रन्थः। अस्य खलु विनिर्माता श्रीजगदीशतर्कालङ्कारः। तर्को नाम व्याप्यारोपेण व्यापकारोपः। यथा—यदि वह्निर्नस्यात्, तर्हि धूमोऽपि न स्यादिति। अत्र वह्न्यभावो व्याप्यः, धूमाभावोव्यापक इति बोध्यम्। ग्रन्थोऽयं प्रारम्भसमाप्तिरहितः। "सामानाधिकरण्येनान्वयव्यतिरेकग्रहात् जायमानस्य तथैव हेतुहेतुमद्भावं गृह्णतस्तस्यैव वा व्याप्तिपरिच्छेदकत्वा"दित्यारभ्य "अत्र च सत्यत्वादिसम्पादके धर्मिणो बोध्यादिमत्त्वे बोध्यादिमद्धर्मिसन्निकर्षे वा तात्पर्य"मित्यन्तस्य दीधितिग्रन्थस्य व्याख्यानमत्रावतिष्ठते। प्राचीनतामुपागतोऽयम्। चौखाम्बामुद्रणालयान्मुद्रणमस्य वारमेकमजनिष्ट।

A commentary on Tarka has very great similarity with Āristotle's Dictum de Omin et nullo. The truth that "whatever is true of the whole of a class is true of any part of the class" is the basis Tarka. The work has been printed at Chaukhamba.

821

615 तर्कटीका।

Tarkaṭīkā.

By Gadādhara Bhaṭṭācārya.

Substance: Country-made yellow paper. Size $18\frac{1}{2} \times 3\frac{1}{4}$ inches.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Folia 18 by counting. Neatly written in Bengali character. 8 lines in a page. Extent 936 ślokas. Appearance fair but brittle. Prose. Generally correct. Incomplete.

The Ms. contains Gadādhara's commentary on Tarka section of TC. Dīdhiti, very often noticed and printed, Gādādharī. Chss., Benaras. The Ms. ends abruptly. The folia are joined together and cannot be handled. Folia 3, 4, 5 are missing in the Ms.

Beginning : See our previous Ms., already noticed and the printed edition of Gādādharī, Chss.

End : ननु व्यभिचारदर्शनसहकृतस्य सहचारदर्शनमात्रस्य व्याप्तिग्राहकत्वोपगमे भूयोदर्शनस्य व्याप्ति (p. 723)

विवरणम् : अस्मिन् पुस्तके गदाधरकृततर्कदीधितिटीका अन्ते खण्डिता आदौ च ३य-४र्थ-५म पत्रहीना गादाधर्यां मुद्रिता चोपलभ्यते। अत्र विषयादिविवरणं तु प्रागेवोक्तं तत्र द्रष्टव्यम्।

822

472 तर्कटीका।

Tarkaṭīkā.

By Gadādhara Bhaṭṭācārya.

Substance : Country-made yellow paper. Size $19\frac{1}{4} \times 3\frac{1}{2}$ inches. Folia 1-21 (fol, 3 missing). Neatly written in Bengali character. 8 lines in a page. Extent 1040 ślokas. Appearance old, worn out and torn at places. Prose. Generally correct. Incomplete at the end.

The Ms. contains Gadādhara's commentary on Tarka section of TC. pt. II, printed in the Gādādharī (Chss.). Fol. 3 is missing in the Ms. and it ends abruptly.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Beginning : तर्कात् यत्रानुमित्यौपयिकव्याप्तिनिश्चयविरोधिशङ्कानिवृत्तिरूपेयते तत्र तत्कारणीभूतापादकनिष्ठापाद्यव्याप्यापाद्यविरहपक्षतावच्छेदकादीनां निश्चयस्य विरोधिनी या शङ्का तन्निवृत्त्यर्थमपि तर्कात् पूर्व्वं तर्कान्तरमुपेयं etc.

End : असौ घटादिध्वंसः ध्वनुकनाशो न कस्यापि दुःखानुभव इति सोपि न स्यादित्यत आह ध्वनुकेष्विति । तत्राप्यवयवाद्यसाध—

विवरणम् : अस्मिन् पुस्तके गदाधरकृता तर्कटीका अन्ते खण्डिता गादाधर्यां काशीतो मुद्रिता उपलभ्यते । विषयादिगतं विवरणं प्रागेवोक्तं, तत्रैव द्रष्टव्यमिति ।

823

2146 तर्क-दीधिति-टीका ।

Tarka-dīdhiti-ṭīkā.

By Gadādhara Bhaṭṭācārya.

Substance: Country-made yellow paper. Size $18\frac{1}{2} \times 3\frac{1}{2}$ inches. Folia 29 (1-29). Neatly written in Bengali character. 7 lines on a page. Extent about 1094 ślokas. Appearance old. Prose. Generally correct. Incomplete at the end. Condition fair. Printed.

There is a square blank space in the middle of each page.

A commentary on Cintāmaṇidīdhiti of Raghunātha by Gadādhara Bhaṭṭācārya.

For description of contents see cat no. 821.

Beginning fol. 1 : ॐ नमः । तर्कात् यत्रानुमित्यौपयिकव्याप्तिनिश्चयविरोधिशङ्कानिवृत्तिरूपेयते तत्र तर्ककारणीभूतस्यापादकनिष्ठापाद्यव्याप्यापाद्यविरहपक्षतावच्छेदकादीनां निश्चयस्य विरोधिनी या शङ्का तन्निवृत्त्यर्थं ।

End fol. 29 : न चैवमप्यनेकवृत्तिघटत्वादिप्रमायां घटत्वादिज्ञानस्य उक्तप्रत्यासत्त्या कारणत्वकल्पनमफलम् तत्तद्व्यक्तिवृत्ति विषयता सम्बन्धेन ज्ञानं प्रति...

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विवरणम् : ग्रन्तहीनोऽयं ग्रन्थः। पत्राणामस्य मध्यभागश्छिन्नतया वाहुल्येन अक्षर-लोपः सञ्जातः। स्पष्टाक्षरश्चासौ ग्रन्थः। विशेषविज्ञानार्थं ८२१ संख्यकग्रन्थसूची द्रष्टव्या।

824

2167 तर्क-दीधिति-टीका।

Tarkadīdhiti-ṭikā.

By Jagadīśa Tarkālaṁkāra.

Substance: Country-made yellow paper. Size 17 × 3½ inches. Folia 11 (by counting). Neatly written in Bengali character. 8 lines in a page. Extent about 531 ślokas. Appearance very old, torn and worn out. Prose. Generally correct. Incomplete towards the beginning. Condition badly damage. Printed chss.

There is a square blank space in the middle of each page.

A commentary on Cintāmaṇidīdhiti of Rāgunātha by Jagadīśa Tarkālaṁkāra.

For description of contents see cat No. 76.

Beginning fol. 1a : इदन्त्ववधातव्यम् ग्रस्तु यथातथा वह्निधूमयो कार्य्यकारण-भावग्रहो नचासौ संयोगेन वह्निधूमयोर्व्याप्तिग्रहार्थमुपयुज्यत इति।

End fol. 11b : यत्तदर्थयोरननुगतत्वात् समवायेन तादृशवृत्तिद्वयस्याभावमादाय सत्तावान् मेयत्वादित्यादावतिव्याप्तेराह विशेषणतेति।

Colophon : इति व्याप्तिग्रहोपायदीधितिजागदीशी सम्पूर्णा।

Post Colophon : श्रीश्रीरामः।

विवरणम् : गङ्गेशकृततत्त्वचिन्तामण्यन्तर्गततर्कप्रकरणस्य दीधितिटीकाया जागदीशी-विवृत्यात्मकोऽयं ग्रन्थः। ग्रादिभागरहितोऽयं ग्रतीव जीर्णतां छिन्नतां च गतः।

ग्रस्मिन् पुस्तके "ग्रपरे तु धूमत्वावच्छिन्नस्य वह्नयजन्यत्वेन जन्यत्वविशिष्टस्य" इत्यारभ्य समाप्तिं यावत् 'चिन्तामणि दीधितिग्रन्थस्य' जागदीशी व्याख्या दृश्यते। विशेषविज्ञानार्थं ७६ संख्यकसूची द्रष्टव्या।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

825

863 तर्कपरिभाषा-व्याख्यानम्।

Tarkaparibhāṣā-Vyākhyānam.

By Bhāskara Bhaṭṭa.

Substance: Palm leaf. Size 16¾ × 1¾ inches. Folia 89 (2a-90b). Neatly written in Bengali character. 4-7 lines in a page. Extent about 1,980 ślokas. Appearance old. Generally correct. Prose. Incomplete at the beginning. Date Śaka 1281. Unpublished.

There is a hole in the middle of each folia.

Beginning: [२ (क) पृः] ···स्वसामग्रीलक्षणे(?)वस्थानाभावोवश्यमभिधातव्यः। अन्यथा कार्य्यनाशस्य स्वसामग्रीकालेवस्थाने समकालतया पौर्वापर्य्याभावेन स्वसामग्रीजन्यत्वं नस्यात्। ततश्च कार्य्यनाशस्य स्वसामग्रीकालेवस्थानाभावात्। तत्प्रतियोगिभूतं कार्य्यं तदावतिष्ठमानमाश्रयाभावेननाश्रितमेवावतिष्ठत इति।

End: विशेष इति नित्यद्रव्यग्रहणमनित्यद्रव्यव्यावृत्त्यर्थमुक्तं विशेषणमाह व्यावृत्तेति··· मात्नग्रहणं इत्यत्वादि(?) सामान्यविशेष व्यावृत्त्यर्थहेतु···रसाधारणमित्यर्थः॥

Colophon: इति भास्करभट्टविरचितं तर्कपरिभाषाव्याख्यानं समाप्तं।

Post Colophon: यथा दृष्टं तथा मया लिखितं। शुभमस्तु। शकं १२८१।

विवरणम्: प्राचीननैयायिकमतसिद्धषोड़शपदार्थाणां वैशेषिकप्रसिद्धपदार्थानाञ्च संक्षेपतो-गौतमसूत्रानुसारिव्याख्यानात्मिकायाः केशवमिश्ररचितायास्तर्कभाषायाष्टीकापरोऽयं निबन्धः। अस्य खलु रचयिता भट्टोपाधिक-भास्करनाम्ना प्रसिद्धः कश्चिन्नैयायिकः। एतदीय पुष्पिकालिखनानुसारेणैवास्य "तर्कपरिभाषा-व्याख्यान"मिति नामकृतम्। वस्तुतस्त्वेतन्मूल ग्रन्थस्य तर्कभाषेति नाम्ना सुप्रसिद्धत्वेन तद्व्याख्यानात्मकस्यैतस्यापि तर्कभाषा-व्याख्यान-मित्येव नाम समीचीनं प्रतिभाति। अथवा 'तर्कभाषा' तर्कपरिभाषेति नामान्तरमपि पुरा प्रसिद्धमासीदित्यपि भवितुमर्हति। प्रथमं पत्नमत्र न वर्त्तते। व्याख्याननावीन्यं किञ्चित् परिलक्ष्यते। अप्राचीनोऽप्ययं कीटदष्टतामापन्नः। उपपुष्पिकायामस्य "शकं १२८१" इत्युट्टङ्कितमास्ते, किन्तु हस्ताक्षरमवलोक्यैतादृशं प्राचीनत्वमस्य कथमपि नानु-

89

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मातुं शक्यते, वस्तुतोनैते लिपिकरणीयाः शकाब्दाः, अपितवेतद्ग्रन्थनिर्मिति शकाब्दा आदर्शस्था लिपिकारेण लिखिता इति सम्भाव्यते। मुद्रणमस्याद्यापि न जातम्।

For description of the contents see cat no. 117.

826

2320 तर्कभाषा।

Tarkavāṣā.

By Keśava Miśra.

Substance : Country-made yellow paper. Size 10 × 4½ inches. Folia 30 (1b-30b). Neatly written in Bengali character. 10 lines in a page. Extent about 683 ślokas. Appearance old. Prose. Generally correct. Complete. Condition good. Printed.

For description of contents see cat. no. 827.

Beginning fol. 1b: ॐ नमो गणेशाय।

बालोपि योन्यायनये प्रवेशमल्पेन वाञ्छत्यलसः(?)।

संक्षिप्त युक्तयान्विततर्कभाषा प्रकाश्यते तस्य कृते मयैषा॥

End fol. 30b: इहात्यन्ताप्रयुक्तानां स्वरूपभेदेन प्रतिपादनानति प्रयोजनानां··· लक्षणं न दोषाय एतावतैव बालव्युत्पादन सिद्धेः।

Colophon : इति केशवमिश्रविरचिता तर्कभाषा समाप्ता।

विवरणम् : ग्रन्थोयं नितरां जीर्णतां प्राप्तः। अक्षरलोपः मसीलोपश्च सर्वत्र दरीदृश्येते। अखण्डश्चायं ग्रन्थः। विशेष विज्ञानार्थं ८२७ संख्यक सूची द्रष्टव्या।

827

853 तर्कभाषा।

Tarkabhāṣā.

By Keśava Miśra.

Substance : Machine-made bluish and white paper. Size

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

$12\frac{1}{2} \times 4$ inches. Folia 8, (1b-8b). Neatly written in Bengali character. 8-17 lines on a page. Extent about 414 ślokas. Appearance not so old but worn out. Prose. Incorrect. Incomplete at the end. Date n.d. Availabe in Print.

Beginning: ॐ नमोगणेशाय। बालोऽपि यो न्यायनये प्रवेशमल्पेन वाञ्छत्यलसः श्रुतेन। संक्षिप्तयुक्त्यान्विततर्कभाषा, प्रकाश्यते तस्य कृते मयैषा॥

End: तथाहि पृथिव्याद्यष्टद्रव्यातिरिक्तः द्रव्याश्रितः पृथिव्याद्यष्टद्रव्यानाश्रितत्वे सति गुणान्वात् योपदनाश्रितोगुणः स तदति...

विवरणम्: महर्षिगौतमन्यायसूत्रानुसारिषोडशपदार्थतत्त्वनिरूपणात्मकोऽयं ग्रन्थः। अस्य खलु विनिर्माता तार्किकधुरन्धरः केशवमिश्रः। समग्रग्रन्थेऽस्मिन् प्राचीनन्यायसम्मतषोडषपदार्थतत्वनिरूपणं प्रसङ्गतः कणादमतसिद्धषट्पदार्थोपवर्णनञ्चावतिष्ठेते। अत्र तु प्रथमतः आत्मनिरूपणपर्यन्तः सन्दर्भोवर्तते। आपाततः सरलोऽप्ययं हि प्रतिपदं भावगाम्भीर्यमुज्जृम्भते। अपराचीनत्वेऽप्यस्य जीर्णत्वमुपलभ्यते। पत्राणामत्रत्यानां पार्श्वभागाश्छिपन्यन्विता विद्यन्ते। प्रायः प्रतिपत्रमेवास्य मसीलेपोपक्रमः संवृत्तः। अन्तिमपत्रमेतदीयं पत्राङ्करहितमास्ते। मुद्रितोऽयमनेकत्र।

828

1112 तर्क-माथुरीटीका।

Tarka-māthurīṭīkā.

By Mathurānātha Tarkavāgīśa

Substance: Country-made yellow and reddish paper. Size $16\frac{3}{4} \times 3\frac{3}{4}$ inches. Folia 9 (1-9b). Neatly written in Bengali character. 7-10 lines on a page. Extent about 300 ślokas. Appearance old, worm eaten and worn out. Prose. Generally correct. Complete. Condition bad. Date n.d. Available in print.

There is a square blank space in the middle of each page.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

A commentary on the Cintāmaṇi of Gaṅgeśa by Mathurānātha.

Beginning: [१ (क) पृः ३ पं] यत्तर्कविघटकशङ्कासामान्यं तर्काभावातिरिक्त-कारणप्रतियोगिकाभावादेव पूर्वं नावतरति तं तर्कमाह तथाहीति ।

End: स्वमते तु शक्यतिरिक्तत्ववह्निर्भावेन साध्यं बोध्यं न साधकं न लिङ्गं व्याप्तस्य व्याप्यत्वेन निश्चितस्य पक्षधर्मत्वे पक्षधर्मत्वनिर्णयेन तत्रेति व्यभिचारसंशयसामग्रीसत्वे न तत्र व्याप्तिनिश्चय इत्यर्थः ॥०॥ॐ॥०॥

Colophon: इति तर्करहस्यं ॥

विवरणम्: अनुमानचिन्तामणिमध्यगतस्य तर्कप्रकरणस्य व्याख्यापरोऽयं निबन्धः। अस्य खलु रचयिता श्रीमान् मथुरानाथः। तर्कोनाम व्याप्यारोपेण व्यापकारोपः "यदि वह्निर्न स्यात्, तर्हि धूमोऽपि न स्या"दित्याकारकः। अत्र वह्न्यभावोव्याप्यः, धूमाभावोव्यापकः।

"यत्तर्के विघटकशङ्कासामान्य' तर्काभावातिरिक्तप्रतियोगिकाभावादेव पूर्वं नावतरति" स तर्कः खलु "धूमो यदि वह्न्यसमवहितजन्यभिन्नत्वविशिष्टवह्निसमवहितजन्यभिन्नत्ववान् स्यात् उत्पन्नत्वाभाववान् स्या"दित्याकारक एव भवेत्।

विषयेऽस्मिन् सूक्ष्मविचारपूर्णं सुविस्तृतं समालोचनमत्र वर्तते। १म पत्रस्य (क) पृष्ठायां प्रकृतग्रन्थस्य प्रारम्भात् प्राक् व्याप्तिग्रहोपायरहस्य स्यान्तिमांशो विद्यते। अन्तिमपत्रस्य (ख) पृष्ठायामपि प्रकृतग्रन्थसमाप्त्यनन्तरं व्याप्त्यनुगमरहस्यस्य प्रारम्भोऽवतिष्ठते। केषाञ्चित् पत्राणां पार्श्वभागाः क्षुद्रटिप्पन्यन्विताः परिलक्ष्यन्ते। प्राचीनत्वं, कीटदष्टत्वं जीर्णत्वञ्च समुपागतोऽयम्। मुद्रणमस्यानेकशः समजनि।

829

1109 तर्कमाथुरी-पत्रिका।

Tarka-Māthurī-patrikā.

By Unknown Author.

Substance: Machine-made white paper. Size $17\frac{3}{4} \times 3\frac{3}{4}$ inches. Folia 3 (1a-3a). Neatly written in Bengali character. 8-11 lines on

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

a page. Extent about 144 ślokas. Appearance not old but torn. Prose. Generally correct. Complete. Condition bad. Date n. d. Unpublished.

Beginning: ॐ नमः शिवाय। धूमो(?) वह्न्यसमवहिताजन्यत्वेसति वह्निसमवहित-जन्यो न स्यादुत्पन्नो न स्यात् इति मूलं ।

End: अहेतुकत्वस्य वह्न्यन्वयव्यतिरेकानुविधायित्वाभावव्याप्यतया अन्वयव्यति-रेकानुविधायित्वज्ञानोत्तरमहेतुकत्वशङ्कायां अन्वयव्यतिरेकानुविधायित्वज्ञानेऽप्रामाण्यशङ्का जायते तद्वत्तानिश्चयोत्तरं तदभावव्याप्यसंशयस्य तद्वत्तानिश्चयधर्मिकाप्रामाण्यसंशायकत्वादित्यु-पादानस्याहेतुकत्वशङ्का प्रतिबन्धकत्वमन्तरेणाहेतुकत्वशङ्कानन्तरं व्यभिचारशङ्काया अन्वय-व्यतिरेकानुविधायित्वज्ञानेन निवृत्त्यसम्भवादहेतुकत्वशङ्कां प्रत्युपादानस्य प्रतिबन्धकत्वाभिधानं नानुपयुक्तं इति समुदिता पत्रिका ।

विवरणम् : अनुमानचिन्तामण्यन्तर्गततर्कप्रकरणस्य माथुर्याः टीकायाः कतिपय-स्थलानामुपरि विनिर्मितोऽयं पत्रिकापरोनिबन्धः । विनिर्मातुर्नामाव नोपलभ्यते । अस्य ग्रन्थसमाधाने विचाररीतौ च नावीन्यं किञ्चिदनुभूयते । प्रथमपत्रस्य (क) पृष्ठायां मसी-लोपोपक्रमः संवृत्तः । आधुनिकोऽप्ययं छिन्नतामुपागतः । अद्याप्यस्य मुद्रणं न जातम् ।

830

1487 तर्कमूलम् ।

Tarkamūlam.

By Gaṅgeśopādhyāya.

Substance: Country-made yellow paper. Size $15\frac{1}{2} \times 3\frac{1}{3}$ inches. Folia 2 (12a-13b). Neatly written in Bengali character. 5 lines on a page. Extent about 40 ślokas. Appearance old. Prose. Generally correct. Incomplete at the end. Condition not good. Date not mentioned. Available in print.

There is a square blank space in the middle of each page.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Beginning: [१३(क)पृ:] तथाहि धूमो यदि वह्न्यसमवहिताजन्यत्वे सति वह्निसमहिताजन्यः स्यादुत्पन्नेऽपि (?) न स्यादित्यत्र किं धूमोऽवह्नेरेव भविष्यति...

End: अनुमानमात्रोच्छेदकत्वादेव पक्षेतरोनोपाधिरिति चेत् भ्रान्तोऽसि न हि वयं उपाधित्वेन तस्य दोषत्वमाचक्ष्महे किन्तु साध्यव्यापक... [१३(क) पृ:]

विवरणम् : अनुमानचिन्तामण्यन्तःपाति तर्कप्रकरणपरोऽयं निबन्धः। अस्य खलु रचयिता नव्यन्यायप्रवर्तकः श्रीमान् गङ्गेशोपाध्यायः। तर्कोनाम व्याप्यारोपेण व्यापकारोपः। विषयेऽस्मिन् गुरुगम्भीरं समालोचनमत्र वर्तते। अयं पराचीनः समाप्तिरहितश्च। प्रथमपत्रस्य (क) पृष्ठायां प्रकृतग्रन्थस्य प्रारम्भात् पूर्वं व्याप्तिग्रहोपायमूलस्यान्तिमांशमात्रं लिखितमास्ते। मुद्रणमस्यानेकशः समजनि।

831

1482 (१) तर्कमूल-टीका।

Tarkamūla-ṭikā.

(२) व्याप्त्यनुगममूल-टीका।

Vyāptyanugamamūla-ṭikā.

By Unknown Author.

Substance: Country-made yellow paper. Size $18\frac{1}{4} \times 3\frac{1}{2}$ inches. Folia 6 (1b-6b). Neatly written in Bengali character.. 8-11 lines on a page. Extent about 364 ślokas. Appearance old and worn out. Prose. Generally correct. Complete. Condition good. Date not mentioned. Unpublished.

There is a square blank space in the middle of each page.

Beginning of the Tarkamūla-ṭikā: धूमो वह्नि व्यभिचारीनवेत्यादि शङ्कोत्सारकं तर्कमाह तथाहीति धूम इत्यादि।

End of the Tarkāmūla-ṭikā: किन्तु व्याग्राह (?) व्यभिचारज्ञानाभावसम्पादकतर्काभावादनिश्चितव्याप्तिकत्वमेवाप्रयोजकत्वमिति न सहचारदर्शनादिमात्रेण व्याप्तिनिश्चय इत्याखन्डलार्थः। व्याप्तस्य(?) पक्षधर्मत्वे व्याप्तिमत्तया निश्चितस्य पक्षधर्मतया गृहीतत्वेन॥ [५ (ख) पृ:]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Beginning of the Vyāptyanugamamūla-ṭīkā : [५ (ख) पृः] ननु अनुमितिं प्रति व्याप्तिज्ञानत्वेन हेतुत्वं अत्यन्ताभावगर्भादिभेदेन व्याप्तेर्नानाविधतया तज्ज्ञानानां परम्पराभावकत्वेपि अनुमितिजनननेन व्यभिचारादित्याशङ्कायामाह उक्तव्याप्तिप्रकारेष्विति ।

End of the Vyāptynugamamūla-ṭīkā : एवमित्यस्य विवरणं अव्यभिचारस्य व्याप्तित्व इति तदभावत्वेन अव्यभिचारिरा-(?)-भावत्वेन नवीनमते समाधत्ते साध्याभावेति ॥०॥

Colophon : व्याप्तिग्रहोपायः समाप्तः (?)

Post Colophon : श्रीरामः । श्रीशिवः ॥

विवरणम् : अनुमानचिन्तामरायन्तः पातिनोस्तर्क-व्याप्त्यनुगमप्रकरणयोः टीकापरोऽयं निबन्धः । रचयितुर्नामात्र न विद्यते । नेयं कृतिर्भवानन्दसिद्धान्तवागीशस्य रचनशैल्यास्तादृशत्वाभावात् । नापि मथुरानाथस्य तत्कृताभ्यामुक्तग्रन्थद्वितयस्य टीकाभ्यामस्याः साम्याभावात् । न च जगदीशतर्कालङ्कारस्य तद्रचिताभ्यामुक्तग्रन्थद्वय-टीकाभ्यामेतस्या (कृतेः) विसदृशत्वात् । न हि गदाधरभट्टाचार्यस्य रचनयोरनयोरत्यन्तसङ्क्षिप्तत्वात् तादृशविचारचातुर्याभावाच्च । परिशेषात् कणादतर्कवागीशस्य किलेयं कृतिरिति सम्भाव्यते ।

तर्कोनाम व्यापकाभाववत्त्वेन निर्णीते व्याप्यस्याहार्यारोपाद् यो व्यापकस्याहार्यारोपः सः । यथा निर्वह्नित्वारोपान्निर्धूमत्वारोपः निर्वह्निः स्यात् निर्धूमः स्यादित्यादिः । विषयेऽस्मिन्नत्यन्त संक्षिप्तसमालोचनमत्रास्ते । मूलमनुसृत्य नानाविधानां व्याप्तीनामनुगमप्रकारस्यापि नातिदीर्घं व्याख्यानं विनिर्मितं निबन्धकृता । प्रायः प्रतिपत्रमस्य मसीलोपोपक्रमः संवृत्तः । प्रथमान्तिमपत्रे खलु मसीलोपात् प्रायेणैवापाठ्यतामुपागते । अयं प्राचीनो जीर्णश्च जातः । प्रकाशनमस्याद्यापि न समजनि ।

A commentary on the Tarka Cintāmāṇi of Gangeśa by some unknown author. The commentary is quite different from the commentaries by Bhavānanda, Mathurānātha, Jagadīśa, Gadādhara; but the name of the author of this commentary could not be traced anywhere in the Ms. from the internal evidence, the author seems to be Kaṇāda Tarkavāgīśa.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

832

1621 तर्कमूल-टीका।

Tarkamūla-ṭīkā.

By Mathurānātha Tarkavāgīśa.

Substance: Country-made yellow paper. Size 18 × 4 inches. Folia 7 (3a-9b). Neatly written in Bengali character. 6-9 lines on a page. Extent about 378 ślokas. Appearance old and worn out. Prose. Generally correct. Incomplete towards the beginning and at the end. Condition very bad. Date not mentioned. Published.

There is a square blank space in the middle of each page.

Beginning: [३ (क) पृः] ति···वाभात् तथाच तादृशधूम एव प्रसिद्धिरिति वाच्यं तादृशधूमस्य घटादितुल्यतया तत्र सत्यन्तदलाभावेनैव विशिष्टप्रसिद्ध्यसम्भवात्।

End: तत्र तर्कं विनैव व्याप्तिग्रह इति जनक इति शेषः तर्कं विनैव व्याप्ति-ग्रहस्तर्कजनक इत्यर्थः।

विवरणम्: ग्रन्थोऽयं प्रारम्भसमाप्तिरहितः प्राचीनोजीर्णश्च। व्यक्तिद्वयेनास्य लिपिर्विरचिता। अन्तिमपत्रेण सह तत्पूर्ववर्त्तिपत्रस्य काऽपि सङ्गतिर्न परिलक्षिते। प्रतिपत्रमेव मसीलोपोपक्रमः संवृत्तः।

833

1624 तर्कमूल-टीका।

Tarkamūla-ṭīkā.

By Mathurānātha Tarkavāgīśa.

Substance: Country-made yellow paper. Size 20 × 3½ inches. Folia 5 (2a-6ā). Neatly written in Bengali character. 7 lines on a page. Extent about 181 ślokas. Appearance old, torn and worn out. Prose. Generally correct. Incomplete towards the beginning and at the end. Condition very very bad. Date not mentioned. Published.

There is a square blank space in the middle of each page.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Beginning : [२ (क) पृः) विशिष्टाभावत्वेनैव ततसिद्धेः। न च विशेषणाभाव-बाधनिश्चयसहकाराद् व्यापकतानवच्छेकत्वेनापि विशेष्याभाववत्वेन तत्सिद्धिरिति वाच्यं।

End: यदसाधारणं सहकार्य्या...मनो बहिर्गोचरां प्रमां जनयति तस्यैव मानान्तर-त्वादिति पूर्वपच्चोक्तं दूषयति अतएवेति। अतएव भूयोदर्शनजन्यसंस्कारस्तर्क एव प्रयोजको न तु व्याप्तिग्रहे अतएवेत्यर्थः। अप्रमात्वादिति इदमा···[६ (क) पृः]।

विवरणम् : प्रारम्भ-समाप्तिरहितोऽयं ग्रन्थः। अयं प्राचीनश्छिन्नोजीर्णश्च संवृत्तः। अन्तिमपत्रस्य (क) पृष्ठायामपस्रियमाणा मसी समुपलभ्यते।

834

1680 तर्कमूल-टीका।

Tarkamūla-ṭīkā.

By Mathurānātha Tarkavāgīśa.

Substance : Country-made yellow paper. Size $17\frac{1}{2} \times 3\frac{3}{4}$ inches Folia 4 (4a-7b). Neatly written in Bengali character. 7-8 lines in a page. Extent about 154 ślokas. Appearance old, torn, worm eaten and worn out. Prose. Generally correct. Incomplete towards the beginning and at the end. Condition very bad. Date n. d. Published.

There is a square blank space in the middle of each page.

Beginning: [४ (क) पृः] स्व' तार्किकः पुरुषस्तस्य या क्रिया यद्वह्वयन्वय-व्यतिरेकानुविधायित्वज्ञानं तस्माद् व्याघातः तत्प्रयुक्तोऽनुत्पाद इत्यर्थः।

End: एकदेशिमतं निराचष्टे ये चेति, व्यभिचारसंशयस्य तत्सामग्र्याश्चाप्रतिबन्ध-कत्वादिति शेषः। अनुकूलेति। व्यभिचारशङ्कानुत्पादानुकूलेत्यर्थः।

विवरणम् : ग्रन्थोऽयं प्रारम्भ-समाप्तिरहितः। अयं प्राचीनश्छिन्नः कीटदष्टोजीर्णश्च संवृत्तः। जलसंश्लेषजचिह्नव्याप्तत्वादयं प्रायेणैवापाठ्यतामुपागतः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

835

1007 तर्कवादार्थमञ्जरी।

Tarkavādārthamañjarī.

By Kaṇāda Tarkavāgīśa.

Substance : Country-made yellow paper. Size 18 × 3¼ inches. Folia (1-4). Neatly written in Bengali character. 8 lines on a page. Extent 224 ślokas. Appearance old and defaced. Prose. Generally correct. Complete.

The persent manuscript under notice is a *unique* one. It is not noticed in any other catalogue, nor is it printed anywhere. Kaṇāda, the author is known as a contemporary of Raghunātha Śiromaṇi, and a pupil of Vāsudeva Sārvabhouma. The descendants are living at Khānākula Kṛṣṇanagara in the Hooghly District, at present. See in this connection A.S. cat. vol. V. no. 7604. p. 150. The Ms. is mostly illegible.

Beginning: ...विशुद्धिश्च ब्राह्मणाजन्यत्वे सति ब्राह्मणजन्यत्वम्। इत्थञ्च ब्राह्मणत्वस्य न निर्विकल्पकं सर्व्वत्र ब्राह्मणत्त्वविशिष्टप्रत्यक्षसामग्रीसत्वात् (fol. 1a)

End : ...नानाकार्यकारणभावस्य नवशरीरतया राक्षस··· । कल्पनाशा(?)एव······ संक्षेपः। (fol. 4b)

Colophon : इति महामहोपाध्यायश्रीकणादतर्कवागीशभट्टाचार्यविरचितायां तर्कवादार्थमञ्जर्य्यां ब्राह्मणत्वप्रत्यक्षग्रन्थनिरूपणं समाप्तम्।

विवरणम् : अस्मिन् पुस्तके तर्कद्वारा विचार्य ब्राह्मणत्वस्वरूपं निरूपितम्।

836

717 तर्कविचारः।

Tarkavicāraḥ.

By Unknown author.

Substance : Country-made yellow paper. Size 18¼ × 4¼ inches.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Folia (1a-3b). Neatly written in Bengali character. 9 lines in a page. Extent 120 ślokas. Appearance good. Prose. Generally correct. Complete.

The Ms. contains a dissertation on Tarka, reasoning by an unknown author. See cat. p. 225, where is recorded one "Tarkavicāra by Gadādhara, oppert II, 9589 by Raghudeva, Bh. 35. The book is not yet printed.

Beginning : धूमो यदि वह्निजन्यो न स्यात् निरुक्तजन्यो न स्यादिति मूलोक्ततर्कस्यापायाभावेनापादकीभूतवह्निजन्यत्वाभावस्याभावनिर्णयद्वारा वह्निजन्यत्वाभावे संशयोच्छेदकत्वेपि वह्निधूमव्याप्तिग्रहप्रतिबन्धकवह्निव्यभिचारित्वशङ्कायां अविरोधितया कथं तस्य वह्निधूमव्याप्तिग्रहोपयोगित्वमिति चेन्मास्तु तस्य साक्षादुपयोगित्वं ।

End: यदा धूमो यदि वह्निवह्न्यघटितजन्यान्यतरवान् स्यात् जन्यो न स्यादित्यादौ तत्रापादकाभावसिद्धौ वह्निजन्यत्वमात्रसिद्धिरित्यादि बहुविधमालोचनीयमिति ध्येयं ।

Colophon : समाप्तोयं तर्कविचारः ।

विवरणम् : अस्मिन् पुस्तके व्याप्यारोपात् व्यापकारोपरूपतर्कस्य निरूपणं सम्यग्विचार्य कृतम् । अत्र ग्रन्थकारनाम नास्ति । गदाधरस्य रघुदेवस्य च इत्यभिधेयो ग्रन्थोऽस्तीति श्रूयते । ग्रन्थोऽयं नाद्यापि मुद्रितः । सम्पूर्णोऽयं ग्रन्थोमुद्रणार्हः ।

837

1547 तर्कविचारः ।

Tarkavicāraḥ.

By Unknown author.

Substance: Machine-made white paper. Size $15\frac{1}{4} \times 16$ inches. Folia 5 (1a-5b). Neatly written in Bengali character. 8-13 lines on a page. Extent about 142 ślokas. Appearance new and worm eaten. Prose. Incorrect. Complete. Condition good. Date not mentioned.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Begnning : ॐम् (?) नमः शिवाय। धूमो यदि वह्निजन्योन स्यात् निरुक्तजन्योन स्यात् इति मूलोक्ततर्कस्यापाया(?)भावेनापादकीभूतवह्निजन्यत्वाभावनिर्णयद्वारा...

End : यदाधूमो यदि वह्निवह्नयघटित(?)जन्यान्यतरवान् स्यात् जन्योनस्यादित्यादौ तत्रापादकाभावसिद्धौ वह्निजन्यत्वमात्रसिद्धिरित्यादिवहुविधमालोचनीयमिति ध्येयं ॥

Colophon : समाप्तोऽयं ग्रन्थः तर्कविचारः।

विवरणम् : तर्कविचारपरोऽयं निबन्धः। रचयितुर्नामात्र न वर्तते। तर्कोनाम व्याप्यारोपेण व्यापकारोपः। यथा—'यदिवह्निर्न स्यात् तर्हि धूमोऽपि न स्यादिति। विषयेऽस्मिन् संक्षिप्तं समालोचनमत्रावतिष्ठते। नूत्नोऽप्ययं कीटदष्टतामुपागतः। अशुद्धिवहुलोऽयम्। मुद्रणमस्याद्यापि न जातम्।

838

737 तर्कसंग्रहः।

Tarkasaṁgrahaḥ.

By Annaṁ Bhaṭṭa.

Substance : Country-made yellow paper. Size 13 × 4 inches Folia 4. Neatly written in Bengali character. 9 lines on a page. Extent about 144 ślokas. Appearance bad and brittle. Prose, Generally correct. Complete.

The Ms. is often noticed, printed and translate into English and Bengali. It deals with the Nyāya Vaiśeṣika categories.

Beginning : निधाय हृदि विश्वेशं विधाय गुरुबन्दनम्।
वालानां सुखबोधाय क्रियते तर्कसंग्रहः ॥१॥
द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः सप्त पदार्थाः ॥१॥

End : कणादन्यायमतयो र्वालव्युत्पत्तिसिद्धये।
अन्नं भट्टेन विदुषा रचितस्तर्कसंग्रहः ॥

विवरणम् : पुस्तकेऽस्मिन् तर्कसंग्रहः अन्नंभट्टकृतोमूलमात्रमस्ति। अयं ग्रन्थः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वहुल मुद्रितः। अत्र न्यायवैशेषिकोक्तपदार्थानां विवृतिरुपलभ्यते। पदार्थानां तत्त्वज्ञानाद् मोक्षोभवतीत्यत्र सिद्धान्तितम्।

839

851 तर्कसंग्रहः।

Tarkasaṁgrahaḥ.

By Annaṁ Bhaṭṭa.

Substance: Country-made Palm leaf. Size 11 × 1½ inches. Folia 15 (1b-15a). Neatly written in Bengali character. 3-4 lines on a page. Extent about 168 ślokas. Appearance old, worm eaten and worn out. Prose. Incorrect. Complete. Date n.d. Available in print.

Beginning: श्रीगणेशाय नमः।......

End: कणादन्यायमतयो र्वालव्युत्पत्तिसिद्धये।
अन्नं भट्टेन विदुषा रचितस्तर्कसंग्रहः॥

Colophon: इति श्रीअन्नं भट्टविरचिततर्कसंग्रहः समाप्तः॥

विवरणम्: तर्कसंग्रहसंज्ञकोऽयं ग्रन्थः। अस्य खलु विनिर्माता नैयायिकप्रवरः श्रीमदन्नं भट्टः। अत्र कणाद-न्यायमतसिद्धपदार्थानां विचारमुखेनानतिविस्तृतं निरूपणं वर्तते। अयं नाम सरलोवालकव्युत्पत्त्यनुकूलश्च। अस्य प्रायः सर्वाण्येव पत्राणि कीट-दष्टत्वान्मसीलोपाच्चापाठ्यतां गतानि। अयं प्राचीनोजीर्णश्च संवृत्तः। मुद्रणमस्य बहुशः समजनि।

For description of contents see cat no. 111.

840

923 तर्कसंग्रहचन्द्रिका।

Tarkasaṁgraha-Candrikā.

By Mukunda Bhaṭṭa.

Substance: Machine-made white paper. Size 13¾ × 4 inches. Folia 39 (1b-39a). Neatly written in Bengali character. 4-12 lines on

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

a page. Extent about 1,276 ślokas. Appearance old, torn and worn out. Prose. Incorrect. Complete. Date n. d. Unpublished.

A commentary on the Tarkasaṁgraha of Annaṁbhaṭṭa by Mukunda Bhaṭṭa.

Beginning : ॐ नमोगणेशाय। श्रीलक्ष्मीनृसिंहाय नमः। गल्लद्दानोद्रेकभ्रमदलिकदम्बावृतशिरोधूनानां सन्तोषादिव निजगुरोस्ताण्डवविधेः। प्रचरोर्दोदण्डैः (?) प्रवलतरविघ्नौघदमनियतो गम्यं भव्यं वितरतु शिशोः शैलदुहितुः ॥१॥ साम्बं शिवं नमस्कृत्य तर्कसंग्रहचन्द्रिका(।)...ग गिलकुलोत्पन्न मुकुन्देन वितन्यते ॥२॥ प्रणम्य विदुषो नूनमहं कुर्वे निवेदनं (।) वालवुद्धया मदीयोऽयं निवन्धोनावधीयतां ॥३॥ ग्रन्थारम्भे विघ्नोपशमाय विहितं मङ्गलं अन्त्येवासिशिक्षायै निवध्नाति (?) निधायेति।

End : न चापरिसङ्ख्येयं अस्य तु तत्त्वज्ञानापदवर्गौ(?)मित्या(?)ज्ञानात् संसार इत्येतदुपदिष्टं विशेषणेति सर्वेषां प्रमेया...नादीनां विशेषरूपेणाभिधानं विचारोऽभ्यर्हितत्वादिस्फुटमाकारैः...(!)

Colophon : इति श्रीमत्गिलोपाख्य मुकुन्दभट्टविरचिता तर्कसंग्रहचन्द्रिका समाप्ता॥

Post Colophon : श्रीनृसिंहाय नमः। ॐ सीतारामाभ्यां नमः। ॐ शिवदुर्गाभ्यां नमः ॐ गणेशाय नमः।

विवरणम् : अन्नम्भट्टविरचितस्य तर्कसंग्रहस्य टीकापरोऽयं निवन्धः। अस्य खलु विनिर्माता श्रीमद्गिलोपाख्यमुकुन्दभट्टः। न्यायवैशेषिकप्रसिद्धानां सप्तपदार्थानां विचारमुखेनानतिविशदा व्याख्याऽत्रावतिष्ठते। व्याख्यानस्य किञ्चिन्नावीन्यमुपलभ्यते। लिपिकारप्रमादजनितदोषाः प्रायः प्रतिपत्रमेव परिलक्ष्यन्ते। प्राचीनत्वेनायं जीर्णतां छिन्नताञ्च समुपागतः। पत्राणां केषुचिन्मसीलेपोपक्रमः संवृत्तः। अन्तिमपत्रं छिन्नत्वात् प्रायेणैवापाठ्यतामापन्नम्। अस्य मुद्रणमद्यापि न समजनि।

841

736 तर्कामृतम्।

Tarkāmṛtam.

By Jagadīśa Tarkālaṅkāra.

Substance : Machine-made white paper. Size 13 × 4 inches.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Folia 11. Neately written in Bengali character. 9 lines on a page. Extent 200 ślokas. Appearance bad and brittle. Prose. Generally incorrect. Complete.

The Ms. contains a catalogue of Nyāyavaiśeṣika catagories by Jagadīśa very often noticed and printed. The Ms. is so brittle that it cannot be handled.

Beginning: ब्रह्माद्या निखिलार्चितास्त्रिदशसन्दोहाः सदाभीष्टदा
अज्ञानप्रशमाय यत्र मनसो वृत्तिं समस्तां दधुः ।
श्रीविष्णोश्चरणाम्बुजं भवभयध्वंसैकवीजं परं
हृत्पद्मे विनिधाय तन्निरुपमन्तर्कामृतं तन्यते ॥

अथ श्रुतिः श्रूयते,—आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः इति, अस्यार्थः—मुमुक्षुणा आत्मा द्रष्टव्यः, मुमुक्षोरात्मदर्शनमिष्टसाधनमिति यावत् ।

End: विशेष्यसङ्गतस्य अन्ययोगव्यवच्छेदः, यथा पार्थ एव धनुर्द्धरः इत्यादौ । एवं दिशा सर्वत्र बोध्यम् ।

Colophon: इति श्रीजगदीशतर्कालङ्कारभट्टाचार्यकृतं तर्कामृतं समाप्तम् ।

Post Colophon: श्रीगोविन्ददेवशर्म्मणः स्वाक्षरमिदं ।

विवरणम्: अस्मिन् पुस्तके न्यायवैशेषिकोक्तपदार्थानां उद्देशोलक्षणं परीक्षा च कृताः जगदीशेन । ग्रन्थोऽयं बहुत्र मुद्रितः सटीकः । चषकोनाद्यापि मुद्रितः, तरङ्गिणी तु काश्यां मुद्रिता ।

842

725 तात्पर्यटीका ।

Tātparyaṭīkā.

By Mathurānātha Tarkavāgīśa.

Substance: Country-made yellow paper. Size 18 × $3\frac{3}{4}$ inches. Folia 14 + 1 = 15 (by counting). Neatly written in Bengali character.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

9 lines on a page. Extent 658 ślokas. Appearance old and new. Prose. Generally correct. Complete.

The Ms. contains both old and new folia. Some folia are taken from the original, while other are restoration, with a Kroḍapatra. The more is found in TC. pt. IV (Śabdakhaṇḍa), printed in B.I. with Mathurānātha's commentary.

Beginning: आसत्तिं निरूप्य तात्पर्यं निरूपयितुमाह—तत्पदाधीनमिति। (p. 319)

End: अनाश्वासः(?) अप्रामाण्यप्रसङ्गः। कर्त्तुर्भ्रमादिदोषजन्यत्वसम्भवादिति भावः।

विवरणम्: अस्मिन् पुस्तके गङ्गेशोपाध्यायकृततत्त्वचिन्तामण्यन्तर्गततात्पर्यवादस्य माथुरीटीका सम्पूर्णा क्रोडपत्रसहिता मुद्रिता च दृश्यते। तत्र तात्पर्याधीनं शब्दप्रामाण्यम्। तत्र तत्परत्वं न तत्साध्यकत्वं पदार्थतत्संसर्गयोः शब्दासाध्यत्वात् इति पूर्वपक्षः। सिद्धान्तस्तु यः शब्दः वक्त्रा यदिच्छया प्रयुक्तः स तत्परः। सा चेच्छा प्रतिपाद्यधीप्रवृत्ति-निवृत्तिविषयेति तत्परत्वम्।

843

742 तात्पर्य्यटीका।

Tātparyaṭīkā.

By Mathurānātha Tarkavāgīśa.

Substance: Country-made yellow paper. Size $17\frac{1}{2} \times 44$ inches Folia 1-18. Neatly written in Bengali character. 9 lines on a page. Extent 828 ślokas. Appearance old. Prose. Generally correct. Complete.

Beginning: आसत्तिं निरूप्य तात्पर्यं निरूपयितुमाह—तात्पर्याधीनमिति।

End: कदाचिद् भ्रमादिदोषजन्यत्वसम्भवादिति भावः। (fol. 18)

विवरणम्: अस्मिन् पुस्तके मथुरानाथकृता सम्पूर्णा तात्पर्यटीका दृश्यते। अयं ग्रन्थस्तु मुद्रितेत्यादिकं विवरणं प्रागेवोक्तम्। तत्रैव द्रष्टव्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

844

467 तात्पर्य्यटीका।

Tātparyaṭīkā.

By Mathurānātha Tarkavāgīśa.

Substance: Country-made reddish paper. Size 17½ × 4 inches. Folia 1a-6b. Neatly written in Bengali character. 8 lines on a page. Extent 192 ślokas. Appearance old but fair. Prose. Generally correct. Incomplete at the beginning and at the end.

It contains Mathurānātha's commentary on Tātparya, very often noticed and printed B.I., Calcutta' TC. pt. IV. Vol. I pp. 319-374.

Beginning: तरपदस्य इतरपदेत्यादिना तात्पर्यं प्रागेव वर्णितं, तथापि परमत-निराकरणाय पुनरारम्भ इति स्मर्त्तव्यं। (p. 319)

End: वैशिष्ट्यञ्च स्वाव्यवहितकालावच्छेदेन एकात्मवृत्तित्वं स्वाव्यवहितत्वञ्च स्वक्षणपू—(p. 334, L. 1-2)

विवरणम्: अस्मिन् पुस्तके मथुरानाथकृता तात्पर्यटीका आद्यन्तखण्डिता उपलभ्यते। विषयादिविवरणं तु प्रागेवोक्तं, तत्रैव द्रष्टव्यम्।

845

685 तात्पर्य्यटीका।

Tātparyaṭīkā.

By Mathurānātha Tarkavāgīśa.

Substance: Country-made yellow paper. Size 17¼ × 4 inches. Folia 3 (by counting. Written by the Bengali character. 8 lines on a page. Extent 100 ślokas. Appearance fair. Prose. Generally correct. Incomplete at the end.

The Ms. contains Mathurānātha's commentary on Tātparya

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

section of TC. pt. IV, Vol. I, often noticed and printed, B. I. Calcutta. The Ms. ends abruptly.

Beginning: आसत्तिं निरूप्य तात्पर्यं निरूपयितुमाह तात्पर्याधीनमिति। तात्पर्यज्ञानस्याप्यधीनं शब्दस्यानुभवजनकत्वं, तात्पर्यज्ञानमपि शब्दस्य सहकारीति फलितार्थः।

End: प्रतिपादकेति। प्रतिपादको वक्ता, इच्छाविषयत्वं जनकतासम्बन्धेन तत्प्रकारकेच्छाविशेष्यत्वं, जन्यतासम्बन्धेन तद्विशेष्यकेच्छाप्रकारत्वं वा। एतदेव विवृणोति यः शब्द इति। यदिच्छाया जनकतासम्बन्धेन यत्प्रकारकेच्छाया—

विवरणम्: अस्मिन् पुस्तके तत्त्वचिन्तामण्यन्तर्गतशब्दखण्डस्थतात्पर्यवृत्ते मथुरानाथकृता टीका मुद्रिता च दृश्यते। अत्र विषयादिविवरणं प्रागेवोक्तं तत्र द्रष्टव्यम्।

846

1655 तात्पर्यमूलम्।

Tātparyamūlam.

By Gaṅgeśopādhyāya.

Substance: Country-made yellow paper. Size 13 × 3 inches. Folia 4 (by counting). Neatly written in Bengali character. 4-6 lines on a page. Extent 78 ślokas. Appearance old. Prose. Generally correct. Incomplete towards the beginning. Condition good. Date not mentioned. Published.

There is a square blank space in the middle of each page.

Beginning: [२ (क) पृः]...रपि न स्यात् तात्पर्यनिर्वाहार्थमावृत्तिकल्पलनात्। अन्यथैकपरेपि तदापत्तेः।

End: धर्मिग्राहकमानेन नित्यसर्वज्ञत्वेन सिद्धे तत्र दोषाभावादिति।

Post Colophon: श्रीकाली।

विवरणम्: शब्दचिन्तामण्यन्तर्गततात्पर्यप्रकरणात्मकोऽयं निबन्धः। रचयिताऽस्य श्रीमान् गङ्गेशोपाध्यायः। अत्र प्रथम-तृतीयपत्रयोरभावो वर्तते। तात्पर्यं नाम

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"इतरपदस्येतरपदार्थसंसर्गज्ञानपरत्वम् ।" विषयेऽस्मिन् हृद्यं गाम्भीर्यपूर्णमनतिविस्तृतं समालोचनमास्ते । प्राचीनतामुपागतोऽयम् । एशियाटिक् सोसाइटिभवनतोवारमेकमस्य मुद्रणं जातम् ।

347

833 तात्पर्य्यवादः ।

Tātparyavādaḥ.

By Gaṅgeśopādhyāya.

Substance: Country-made yellow paper. Size 1½ × 2½ inches. Folia 10 (by counting). Neatly written in Bengali character 4-5 lines on a page. Extent 103 ślokas. Appearance old. Generally correct. Complete. Date n.d. Published.

There is a square blank space in the middle of each page.

Beginning: तात्पर्याधीनं शब्दप्रामाण्यं तत्र तत्परत्वं न तत्साध्यकत्वं ।

End: न चैवमानन्दोपीश्वरे तत्र मानान्तरविरोधात् पुरुषस्य भ्रमप्रमादादिभूयिष्ठत्वेन वेदे नाश्वास इति चेन्न धर्मिग्राहकमानेन नित्यसर्वज्ञत्वेन सिद्धे तत्र दोषाभावादिति ॥

विवरणम् : तुरीयचिन्तामण्यन्तर्गततात्पर्यवादपरोऽयं ग्रन्थः । रचयिता खल्वस्य गङ्गेशोपाध्यायः । अत्राष्टमपत्रस्य(क)पृष्ठीयद्वितीयपङ्क्तितः शब्दानित्यतावादस्य प्रारम्भतः कियदंशोऽवतिष्ठते । अयं तावत् पराचीनः । अत्रत्यान्तिमपत्रे पत्रसंख्या न विद्यते । सकृदेवास्य मुद्रणं जातम् कलिकाता एशियाटिक सोसाइटि समाख्यभवनतः ।

848

2726 सारसंग्रहः ।

Sāra Saṁgrahaḥ.

By Varadarāja.

Substance: Country-made yellow paper. Size 10¼ × 3 inches.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Folia 32 (by counting). Neatly written in Bengali character. 8 lines on a page. Extent 768 ślokas. Appearance bad and damaged. Prose and verse. Generally correct. Incomplete both ends.

A commentary on the Tārkikarakṣā by Varadrāja.

The Ms. begins and ends abruptly. The work contains original ślokas with an explanatory gloss Sāra Saṁgraha by another is the same as that of Nyāya Kusumāñjali bodhanī who hired about the 11th Century A.C. in Kashmir (See, Introduction to Kusumāñjali Karīkā by N. C. Vedantatirthā, Ass. no. 2, C. U. 7. The work deals with the sixteen categories of Nyāyasūtra and Vaiśeṣikasūtra in an exemplary mild and clear style and every student of philosophy should read its. The Ms. wrotes folias in the beginning, middle and the end. It is often noticed and printed Banaras Pandit.)

Beginning: ...ज्ञ स्वगृहीत भेदवशेन दृष्टसमस्तवस्त्वन्तरव्यावृत्तवस्तु व्यवहारोत्-पादनशक्तत्वं वा ? इदमहं जानामि इति वितय व्यवहारानुगुणत्वं वा ? किंचिद्धर्मान्तरं वा ? (तत्र pr.) न प्रथमः (?) कल्पः (pp. 31-32)। अनुमानादि सं विदां स्वात्मात्मनोरप्रत्यक्षत्वप्रसङ्गात् ।

End: असिद्धः साध्यतुल्यत्वाद्धेतुः साध्यसमो भवेत् । असिद्धो हेतुः साध्यासम इति लक्षणम् । साध्यसमशब्दप्रवृत्तिनिमित्तप्रदर्शनं साध्यतुल्यत्वादिति । तदुक्तं साध्या-विशिष्टः साध्यत्वात् साध्यसम इति । अ(न्य ?)था सिद्धिलक्षणं वि(वक्षन् ?) सि— (pp. 223-24).

विवरणम् : अस्मिन् पुस्तके वरदराजकृता तार्किकरक्षा ततकृतसारसंग्रहाख्यटीका सहिता आद्यन्तखण्डिता दृश्यते । ग्रन्थोऽयं काश्यां मुद्रितः । अस्मिन् ग्रन्थे वाचस्पत्यु-दयनादीनां नामान्युल्लिखितानि । ग्रन्थोऽयमतीवोपयुक्तः । अत्र सरलरीत्या न्यायसूत्र-भाष्यादिप्रतिपादिताः प्रसङ्गात् कणादसूत्र-प्रशस्तपादभाष्यप्रतिपादिता अपि सर्वे प्रमाणादयः पदार्था द्रव्यादयश्च पदार्थाः परिच्छेदत्रये निरूपिताः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

849

1550 त्वङ्मनोयोगविचारः ।

Tvaṅmanoyoga-Vicāraḥ.

By Uuknown author.

Substance: Machine-made white paper. Size 15 × 6 inches. Folia 3 (1a-3). Neatly written in Bengali character. 4-8 lines in a page. Extent 56 ślokas. Appearance new and worm eaten. Prose. Generally not correct. Complete. Condition good. Date not mentioned. Uupublished.

Beginning: अथ त्वङ्मनोयोगस्य । सुसु...(?)प्तिकाले ज्ञानोत्पत्तिवारणाय जन्यज्ञानत्वावच्छिन्नसामान्यं प्रति त्वङ्मनोयोगस्य हेतुता कल्पते (?) ।

End: एतेन ज्ञानोत्पादोगमे अनन्तव्यक्तीनां कल्पनां अपेक्ष्य नायवात् (?) त्वङ्मनोयोगस्यैव हेतुताकल्पनमेवोचितमित्यपि पारस्तं ॥०॥

विवरणम् : त्वङ्मनयोगविचारात्मकं निबन्धमिमं प्रणिनाय कश्चनाज्ञातनामधेयोनैयायिकः । सुषुप्तिकाले ज्ञानमात्रस्योत्पत्त्यभावाज्जन्यज्ञानत्वावच्छिन्नसामान्यं प्रति त्वङ्मनः संयोगस्य कारणता कल्प्यते । तत्र सुषुप्तिर्नाम पुरीतदभ्यन्तरावच्छिन्नान्तःकरणसंयोगः । विषयेऽस्मिन् ऊहापोहमुखेनानतिविस्तृतं सूक्ष्मं समालोचनमत्रावतिष्ठते । अयं नूतनोऽशुद्धिबहुलश्च । अत्रत्यानां पत्राणां सर्वेषामेव प्रान्तभागेषु कीटदंशनजचिह्नानि वर्तन्ते । प्रकाशनमस्य न जातम् ।

This is a work on the contact of the skin and mind by unkuown Naiyāyika. The consality of the above contacr of knowledge has been assumed to explain the non-appearance af knowledge during the period of sound sleep. The book discusses also whith allied subjects.

850

856 दशलकारवादः ।

Daśalakāravādaḥ.

By Gadādhara Bhaṭṭācārya.

Substance: Country-made yellow paper. Size $18\frac{3}{4} \times 4\frac{1}{4}$ inches.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Folia 20 (1a-20a). Neatly written in Bengali character. 9 lines in a page. Extent about 794 ślokas. Appearance old. Prose. Generally correct. Complete. Date n.d. Available in print.

Beginning : ॐ नमः शिवाय। धातुप्रकृतिकाश्चलकारकृतसन्यङ्णिच्प्रभृतयः प्रत्ययाः केचिद्धात्वर्थान्वितमधिकमर्थं ब्रुवते।

End : न च तात्पर्याभावात् सुखाद्यसाधनत्वबोधकत्वोपगमे त्वतिविवह इति वाच्यम् तस्यविध्यर्थत्वे तात्पर्येणाधुनिकानां न भुञ्जीतेत्यादि प्रयोगापत्तेरिति।

Colophon : इति महामहोपाध्याय श्रीलश्रीयुतगदाधरभट्टाचार्यविरचिताख्यातविचारः सम्पूर्णः।

Post Colophon : श्रीगोलोकनाथदेवशर्मणः पुस्तकाक्षरे।

विवरणम् : तर्कशास्त्रधुरन्धरश्रीगदाधरभट्टाचार्यविनिर्मितोऽयं निबन्धः। अयं खल्वाख्यातविचारनाम्ना प्रसिद्धः श्रीगदाधरविरचितसुविख्यातव्युत्पत्तिवादनामकग्रन्थस्यान्तिमप्रकरणात्मकः। वर्तन्तेऽत्र दशलकाराणामर्थाः सूक्ष्मविचारमुखेन निरूपिताः। वियन्तेऽस्य केषाञ्चन पत्राणां पार्श्वभागाष्टिप्पन्यन्विताः। अयं प्राचीनोमुद्रितश्चानेकत्र।

851

1635 १। दशलकारविचारः।

Daśalakāravicāraḥ.

२। तदादिशब्दशक्तिनिर्वचनम्।

Tadādiśabdaśaktinirvacanam.

By Bhavānanda Sidhānta Vāgīśa.

Substance : Country-made yellow paper. Size $18\frac{1}{4}\times3\frac{1}{4}$ inches. Folia 3 (1a-3b). Neatly written in Bengali character. 9 10-lines on a page. Extent about 194 ślokas. Appearance old and worn out Prose. Generally correct. Complete. Condition not good. It is with marginal notes. Date n.d. Published.

There is a square blank space in the middle of each page.

Beginning of the Daśalakāravicāra: नमो गणेशाय। पचति पक्ष्यति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपाक्षीदित्यादौ वर्तमानत्वादि प्रतीतेर्वर्तमानत्वेन लट्त्वादिना वर्तमान-प्रागभावप्रतियोगित्व-रूपे भविष्यत्वे……

End of the Daśalakāravicāra: एवञ्चाज्ञा अनुज्ञा आशंसापि विजातीयेच्छा, समिधमाहर इत्यादौ मदाज्ञाविषयसमित्कर्मकाहरणानुकूलकृतिमानित्यन्वयधीः ॥

Colophon of the Daśalakāravicāra : इति महामहोपाध्यायश्रीसिद्धान्तवागीश भट्टाचार्यविरचित दशलकारविचारः समाप्तः ॥

Beginning of the Tadādiśabdaśaktinirvacānam: [३ (क) पृः ननु त्यदादि सर्वनामशब्दस्य केन रूपेण शक्तिरितिचेत्, अत्रब्रूमः तदादिशब्दस्य (?)सर्वनाम-तया बुद्धिस्थत्वरूपेण बुद्धिस्थ एव शक्तिः ।

End of the Tadādiśabdaśaktinirvacanam : बुद्धिविषयत्वरूपेण तेषां शक्यतावच्छेदकत्वे बुद्धिविषयत्वावच्छिन्नघटत्वपटत्वादिसर्वनिष्ठा एकैवप्रकारता तदालाघवमिति प्राहुः ।

Colophon : इति तदादिशब्दशक्तिनिर्वचनम् सम्पूर्णम् ।

विवरणम् :—(१) दशलकारविचारनामकोग्रन्थः खलु सिद्धान्तवागीशोपनामकेन भवानन्देन व्यरचि । लकारार्थनिर्णयानुशीलनमन्तरेण न कस्यापि शब्दशास्त्रे सम्यग् व्युत्पत्तिर्भवेदित्यतोविषयेऽस्मिन् शिष्याणां झटिति व्युत्पत्तिसिद्धये निबन्धोऽयं विरचितो निबन्धकृता । क्षुद्रकलेवरस्याप्यस्य समधिकमुपयोगित्वं वर्तते विद्यार्थिसमाजे । प्राचीनतां जीर्णताञ्च समुपागतोऽयम् । प्रकाशनमस्य वारमेकमजनिष्ट ।

(२) त्यदादिशब्दशक्तिनिर्वचनपरोऽयं निबन्धः । एतन्निबन्धकर्तुर्नामात्र न वर्तते । रचन-शैल्या विचारभङ्गया च किलास्य रचयिता श्रीभवानन्दसिद्धान्तवागीश एवेति निश्चीयते । अत्यन्तसंक्षिप्तत्वेनैव क्वचित् क्वचिद्बोधसौकर्यं विघ्नितं जातमिति मन्यते । मुद्रण-मस्याद्यापि न समजनिष्ट ।

852

1870 दीधितिमाथुरी-टीका ।

Dīdhitimāthurī-ṭīkā.

By Mathurānātha Tarkavāgīśa.

Substance : Country-made yellow paper. Size $16\frac{1}{2} \times 4\frac{1}{2}$ inches.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Folia 229 (1b-228). Neatly written in Bengali character. 7 lines in a page. Extent about 1029 ślokas. Appearance old. Prose. Generally in correct. Incomplete at the end. Condition good.

A commentary on the Cintāmaṇidīdhiti of Raghunātha by Mathurānātha Tarkavāgīśa.

Beginning fol. 1: ॐ नमः शिवाय ॥ कुञ्चिताधरपुटेन पूरयन् वंशिकां प्रचलदङ्गुलीचयः। मोहयन्निखिलवामलोचनाः पातु कोपि नवनीरदच्छविः ॥ जगद्गुरोः श्रीरामस्य चरणौ मूर्द्ध्निधारयन्। तत्सुतो मथुरानाथो दीधितिं सफुटयत्यमूं निर्व्विघ्न-प्रारिप्सितग्रन्थपरिसमाप्तिकामनया कृतं भगवन्नमष्कारुरुपं मङ्गलं शिष्यशिक्षायै आदौ-निबध्नाति—ॐ नम इति।

End fol. 328b: कालविशेषे(?) असाधारण्येपि न क्षति यदा कदाचिदुपाधि-सत्वेनैव हेतुमति पक्षे वाधे उपाधिरिति नियमाभङ्गा(?)दितिमतत्वयेऽस्वरसः।

विवरणम्: अस्मिन् पुस्तके विशेषव्याप्तिसामान्यलक्षणप्रकरणाभ्यां हीनानां सामान्य-निरुक्तिसव्यभिचारसहितानां अनुमित्याद्युपाध्यन्तग्रन्थानां 'अनुमानतत्त्वचिन्तामणिदीधितेः' मथुरानाथतर्कवागीशकृता रहस्याख्या टीका वर्तते टीकेयं सुदुर्लभा।

अनतिविस्तृतैषा दीधितिमाथुरीटीका दीधित्यवगमे सम्यगुपयोगिनीति मन्ये।

ग्रन्थेस्मिन् लिपिकरप्रमादः सर्वत्र वरीवर्तते। लिपिकरप्रमादेन ग्रन्थोयं दुर्बोध्यतां गतः। प्रथमपत्रमस्य ईषज्जीर्णतां गतं। अन्यानि पत्राणि प्राचीनान्यपि नवीनायमाना-न्येव तिष्ठन्ति। पत्राणां 'ख' पृष्ठे दक्षिणभागे पृष्ठाङ्काः वर्तन्ते। अष्टषष्ठीसंख्यातु द्विधैवो-पन्यस्ता। ग्रन्थस्य २१२ संख्यक पत्रस्य 'ख' पृष्ठं ३१५ संख्यक पत्रस्य पृष्ठद्वयञ्च लिपिशून्यं। सामान्याभावदीधितिरहस्यस्य अन्ते—इति श्रीरघुनाथतर्कवागीशभट्टाचार्यविरचितमित्यादि पुष्पिका दृश्यते, तत्र भ्रमादेव मथुरानाथस्थले रघुनाथेतिलिखितमिति मन्ये। अस्याः टीकायाः अन्तिमांशस्य दीधिति श्चौखम्बामुद्रितगादाधरीपुस्तकस्थसामान्याभावदीधितिपाठेन-सह न सङ्गच्छते।

अतएव चतुष्टयदीधितिरहस्यस्य प्रारम्भे विशेषव्याप्तिप्रकरणान्तर्गतस्य "उपाधिनेति। विशेषणतामापन्नेनोपाध्यनुप्रवेशेनेतियाव"दित्यादिदीधितिपाठस्य व्याख्यावर्तते। उपाधि-दीधितिरहस्यं, सव्यभिचारदीधितिरहस्यमपि असमाप्तं।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दीधितिमाथुरीटीकायाः ग्रन्थसूची

ग्रन्थनाम	पत्रसंख्या	पङ्क्तिसंख्या
अनुमितिः	१	
व्याप्तिपञ्चकं	५१ (ख)	५म
सिंहव्याघ्रलक्षणं	५६ (ख)	७म
व्यधिकरणं	६८ (ख)	२य
पूर्व्वपक्षः	१३७ (ख)	४र्थ
सिद्धान्तलक्षणं	१५८ (ख)	१म
अवच्छेदकत्वनिरुक्तिः	१६४ (क)	६ष्ठ
सामान्याभावः	२११ (क)	२य
अतएवचतुष्टयं	२१३ (क)	
व्याप्तिग्रहोपायः	२३३ (ख)	५म
तर्कः	२४६ (क)	२य
व्याप्त्यनुगमः	२६५ (ख)	
उपाधिः	२७५ (क)	
सामान्यनिरुक्तिः	३१६	
सव्यभिचारः	३२६ (ख)	३य

853

1106 द्रव्यनाशरहस्यम् ।

Dravyanāśarahasyam.

By Unknown author.

Substance: Country-made yellow paper. Size 17 × 3½ inches. Folia 3 (1a-3b). Neatly written in Bengali character 6-8 lines on a page. Extent 154 ślokas. Appearance old, torn and worn out. Prose. Generally correct. Complete. Condition bad. Date n. d. Unpublished.

There is a square blank space in the middle of each page.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Beginning : नमो दुर्गायै । द्रव्यनाशं प्रति समवायिकारणनाशोऽसमवायिकारणनाशश्च हेतुः क्वचित् कपालादिनाशात् कुत्रचित् संयोगनाशादपि घटनाशदर्शनात् ।

End : संयोगस्यापि द्रव्यासमवायिकारणतया तन्नाशादपि द्रव्यनाशोत्पत्त्या तादृशजातेश्च क्रियाजन्यतावच्छेदकजातिव्याप्यत्वाभावादिति वाच्यं क्रियाजन्यतावच्छेदकजातेरेतादृशजातिव्याप्यविरुद्धभेदेन नानात्वस्वीकारात् तादृशजातेर्नाना......संयोगनाशहेतुतायां व्यभिचारप्रसङ्गात् व्याप्यतावच्छेदकजातेश्च नानात्वव्यभिचारासम्पादकत्वादिति कृतं पल्लवितेनेति ।

Colophon : इति द्रव्यनाशरहस्यम् ॥०॥

विवरणम् : अज्ञातकर्तृकेऽस्मिन्नुपलभ्यमाने निबन्धे द्रव्यनाशं प्रति कस्य कारणत्वमिति पृच्छायाः सम्यक् समाधानमास्ते । तत्र हि प्राञ्चः क्वचित् कपालादिनाशात् क्वचिच्च कपालद्वयसंयोगनाशाद् घटनाशदर्शनाद् द्रव्यनाशं प्रति समवायिकारणनाशस्यासमवायिकारणनाशस्य च हेतुत्वं कल्पयन्ति ।

नव्यास्तु सर्वत्रासमवायिकारणनाश एव द्रव्यनाशकारणं द्व्यणुकादिनाशस्थले तस्य हेतुतायामावश्यकत्वात् । यत्र च मुद्गरपातादिना कपालनाशस्तत्रापि तदधीनकपालद्वयसंयोगनाशादेव घटादिनाशोपगमात् कार्यकारणलाघवानुरोधेन क्षणविलम्बकल्पनाया न्याय्यत्वादिति वदन्ति ।

निबन्धोऽयं पराचीनश्छिन्नोजीर्णश्च संवृत्तः । अस्य प्रायः प्रतिपत्रमेवापक्षियमाणा मसी समुपलभ्यते । मुद्रणमस्य न जातम् ।

854

2291 द्रव्यसूक्तिः ।

Dravyasūktiḥ.

By Jagadīśa Tarkālaṃkāra.

Substance: Country-made yellow paper. Size $17\frac{1}{2} \times 3\frac{3}{4}$ inches. Folia 23. Neatly written in Bengali character. 8 lines on a page. Extent 920 ślokas. Appearance old. Prose. Generally correct. Complete. Condition good.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

There is a square blank space in the middle of each page.

This Ms. has been collected from Navadvīpa in the year 1963.

A commentary on the Praśastapāda Bhāṣyam entitled Sūkti by Tarkālaṃkāra.

It begins fol. 1a : ओं नमो गणपतये ।

कणभक्षमुनेः पक्षरक्षाविन्यस्तवासनाः

सूक्तिं श्रीजगदीशस्य चिन्तयन्तु विचक्षणाः ।

ग्रन्थारम्भे विघ्नविघाताय कृतस्येश्वरादिप्रणामस्य शिष्याणां शिक्षार्थमादौ निबन्धपूर्वकं प्रवृत्त्यङ्गमभिधेयं दर्शयति प्रशस्तपादाचार्यः प्रणम्येति ।

It ends fol. 23b : तस्याशुसञ्चारित्वे हेतुमाह प्रयत्नेति । क्वचिदात्मनः प्रयत्नेन क्वचिददृष्टेन परिगृहीतत्वाचानितत्वाचाशुसञ्चारितेत्यर्थः ।

Colophon : इति महामहोपाध्याय-श्रीजगदीशतर्कालंकारभट्टाचार्यविरचिता द्रव्य-भाष्यटीप्पनी समाप्ता ।

विवरणम् : वैशेषिकदर्शनप्रशस्तपादस्य सूक्तिनामधेयेयं टीका जगदीशतर्कालंकारेण विरचिता । टीकारचनावसरे सर्वथैव उदयनमार्गं तथा भाष्यमतमनुसृतम् । एवं स्वमत-व्यवस्थापनाय आचार्यमतमुपदर्शितम् । पदार्थानां तत्त्वज्ञानस्य निःश्रेयसोपयोगित्वादिकं सुविशदं प्रतिपादितं टीकाकारेणेति ।

855

394 द्वितीयसिद्धान्तलक्षण-जागदीशी-टीका ।

Dvitīyasiddhāntalakṣaṇa-Jāgadīśī-ṭīkā.

By Jagadīśa Tarkālaṃkāra.

Substance : Country-made yellow paper. Size $18\frac{3}{4} \times 3\frac{3}{4}$ inches. Folia 13 (1b-13b). Neatly written in Bengali character. 8-9 lines in a page. Extent about 585 ślokas. Appearance old. Prose. Generally correct. Complete. Date 1704 Śak. Printed.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Beginning : श्रीरामः। द्रव्यं पृथिवीत्वादित्यादौ विशिष्टाभावाद्यनङ्गीकारेऽव्याप्त्य-भावादाह नानाव्यक्तीति ।

End : अग्रे इति लाघवादन्योन्याभावव्याप्तिरित्यादिग्रन्थ इत्यर्थः ।

Colophon : इति द्वितीयसिद्धान्तलक्षणजागदीशी सम्पूर्णा ॥

Post colophon : श्रीरामः श्रीरामः श्रीरामः । श्रीरामः श्रीरामः ॥

शाके दोषविभाजकासुरमुनि (?) सचन्द्रमानेनिशं
ध्यात्वा कृष्णपदाम्बुजं स्मरतिथौ मासे च चैत्राख्यके ।
पक्षे मेचकके निधाय हृदये वाक्यं गुरोः सादरात्
व्यालेखीदनुमानखण्डगणितान्तूनामनामा द्विजः ॥
शाके मिलनभोर्णवामृतकरे मासे दिने भास्करे
मीने कामतिथौ गते खरकरे शूराश्वमाने दिने ।
ध्यायी श्रीशिवचन्द्रशर्मसुकृती श्रीकृष्णपदाम्बुजं
व्यालेखीत् जगदीशसत्कृतिमिमां पाठाय मान्यां सतां(?) ॥

विवरणम् : तत्त्वचिन्तामण्यनुमानखण्डीयव्याप्तिवादान्तर्गत — द्वितीयसिद्धान्तलक्षणस्य दीधित्याख्यां टीकामधिकृत्य जगदीशतर्कालङ्कारेण विनिर्मितोऽयं निबन्धः । अयं नाम विशेषव्याप्तित्वेनाप्यभिहितोऽर्वाचीनैः । उत्तरसिद्धान्तलक्षणत्वेनाप्ययं कैश्चिद्गीयते । इदानीं विशेषव्याप्तित्वेनैवास्य समधिकप्रचारः समजनि नैयायिकसमाजे । अत्रात्यन्ताभावघटित-विशेषव्याप्तिलक्षणं तावत् प्रतियोगिव्यधिकरणस्वसमानाधिकरणात्यन्ताभावाप्रतियोगिना सामानाधिकरण्यम् । न च हेतुसमानाधिकरणेत्यादिपूर्वोक्तव्याप्तिसिद्धान्तलक्षणादभेद इति वाच्यम् । तत्र साध्यजातीयसमानाधिकरणसाधनजातीयत्वस्य अत्र च साध्यसाधनयोः सामानाधिकरण्यस्य व्याप्तित्वे तात्पर्यात् । अत्रात्यन्ताभावघटितवत् सामान्यविशेषभेदा-दन्योन्याभावघटितमपि व्याप्तिलक्षणद्वयं निरूपितम् । प्रथमं तावत् यत्समानाधिकरणा-न्योन्याभावप्रतियोगि यद्वन्न भवति तेन समं तस्य सामानाधिकरण्यरूपम् । द्वितीयन्तु स्वसमानाधिकरणान्योन्याभावप्रतियोगियदवत्कत्वरूपम् । अत्र सार्वभौममतस्योपवर्णनं तन्निराकरणञ्च वर्तते ; सन्त्यभावनिर्वचनावसरे साम्प्रदायिकानां नवीनानाञ्च मतोपरि दूषणोद्-भावनानि च । अस्यान्तराऽन्तरा मसीलोपोपक्रमः संवृत्तः । अत्रत्यपार्श्वैः टिप्पनी-परिशोभितो वर्तते । प्राचीनोऽयं जीर्णत्वमुपागतः । मुद्रणमस्य समजनिष्टानेकतः ।

This work by Jagadīśa gives a definition of Viśeṣa Vyāpti

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(particular instances of Vyāpti) on the basis of Raghunātha's commentary on Siddhānta Lakṣaṇa.

856

2237 द्वितीया व्युत्पत्तिः ।

Dvitīyā Vyutpattiḥ.

By Gadādhara Bhaṭṭācārya.

Substance: Country-made yellow paper. Size 17 × 3 inches. Folia 26 (1b-26b). Neatly written in Bengali character. 7 lines on a page. Extent about 827 ślokas. Appearance old. Prose. Generally correct. Incomplete at the end. Condition good. Printed.

There is a square blank space in the middle of each page.

For description of contents see cat no. 552.

Beginning fol. 1b: ॐ नमः शिवाय अनुमित्यर्थकधातुयोगविधेयत्वं वा द्वितीयार्थः तेन वह्न्यादिपक्षकानुमितिपरस्य वह्निमनुमिनोमित्यादि वाक्यस्य न प्रामाण्यं ।

End fol. 26b: ज्ञानभेदेन विषयिताभेदे अभेदे च नित्यवृत्तिविषयित्वावच्छिन्न-प्रतिबन्धकतानिरूपितप्रतिबध्यतावच्छेदकविषयिताशालीत्वमेव धर्मितावच्छेदक···

विवरणम्: महामहोपाध्यायगदाधरभट्टाचार्यविरचित-व्युत्पत्तिवादस्य अंशविशेषात्मकोयं ग्रन्थः । अत्र तु द्वितीयाकारकस्य अन्तहीनं द्वितीयखण्डं दृश्यते । ग्रन्थोयं स्पष्टाक्षरः । पत्राणि च प्रान्तभागे छिन्नानि ।

857

2236 द्वितीया व्युत्पत्तिः ।

Dvitīyā byutpattiḥ.

By Gadādhara Bhaṭṭācārya.

Substance: Country-made yellow paper. Size 17 × 3 inches. Folia 7 (1a-7b). Neatly written in Bengali character. 7 lines on a

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

page. Extent about 256 ślokas. Appearance old. Prose. Generally correct. Incomplete at the end. Condition good. Printed Chss.

There is a square blank space in the middle of each page.

For description of contents see cat no. 552.

Beginning fol. 1a : ॐ नमो गणेशाय अनुमित्यर्थकधातुयोगे विधेयत्वं विधेयित्वं वा द्वितीयार्थः ।

End fol. 7b : भ्रातृपुत्रीयतीत्यादौ स्वविषयतानिरूपितसम्बन्धविषयतानिरूपित भ्रातृविषतानिरूपित-सम्बन्धविषयतानिरूपितविषयताश्रयनि··· ।

विवरणम् : महामहोपाध्यायगदाधरभट्टाचार्यविरचित—व्युत्पत्तिवादस्यांशविशेषोऽयं ग्रन्थः। अत्र च द्वितीयाकारकस्य द्वितीयखण्डस्यांशविशेषो दृश्यते। पत्रपार्श्वे क्षुद्राः टिपण्योवर्तन्ते ।

858

1071 धर्मितावच्छेदकप्रत्यासत्तिरहस्यम् ।

Dharmitāvachedaka-pratyāsattīrahasyam.

By Harirāma Tarkavāgīśa.

Substance: Country-made yellow paper. Size $16\frac{1}{2} \times 3\frac{1}{2}$ inches. Folia 6 (1a-6b). Neatly written in Bengali character. 8 lines on a page. Extent about 282 ślokas. This is same as our Ms. No. 1094 Cat No. 16. Appearance old, torn and worn out. Prose. Generally correct. Incomplete at the end. Condition is very bad. Date n.d. Unpublished.

There is a square blank space in the middle of each page.

Beginning : ॐ नमो गणेशाय। अनुमितिपरामर्शयोः कार्यकारणभावघटक-प्रत्यासत्तिः सामानाधिकरण्यं तेन चैकपुरुषीयपरामर्शदशायां तत्शून्यपुरुषान्तरस्य नानुमित्यापत्तिः तस्य समवायरूपकारणतावच्छेदकसम्बन्धेन परामर्शविवहात् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

End: केचित्तु स्वावच्छेदकावच्छिन्नत्व, स्वनिरूपकज्ञाननिरूपितत्व...उभयसम्बन्धेन धूमाभावप्रकारतानिरूपित विशेष्यताविशिष्टान्यधूमप्रकारतानिरू... [६ (ख) पृः]

विवरणम् : समाप्तिरहितस्यास्य निबन्धस्य प्रायः प्रतिपत्रमेव मसीलोपादपाठ्यत्वं समुपागतम्। अत्रत्य पत्रपार्श्वैकदेशाः सलिलसमाश्लेषजचिह्नसम्पृक्ता वर्तन्ते। अयं प्राचीन-शिल्पोजीर्णश्च संवृत्तः। Ms. No. 1094, Cat No. 16 सूची द्रष्टव्या।

859

1078 धर्मितावच्छेदकप्रत्यासत्तिरहस्यम्।

Dharmitāvachedakapratyāsattīrahasyām.

By Harirāma Tarkavāgīśa.

Substance: Country-made yellow paper. Size $16 \times 2\frac{3}{4}$ inches. Folio 1. Neatly written in Bengali character. 8-9 lines on a page. Extent about 46 ślokas. This is another copy of our previous Ms. No. 1094, Cat. No. 16. Appearance old and worn out. Prose. Generally correct. Incomplete towards the beginning. Condition is not good. Date n.d. Unpublished.

There is a square blank space in the middle of each page.

Beginning: ...विशेष्यतावच्छेदकनिष्ठप्रत्यासत्त्याकारणतायाः कल्पनेन...स्याति-स्फुटत्वादि अलमतिविस्तरेण।

End: तदपेक्षया आत्मव्यक्तिभेदेन उपदर्शितकारणताकल्पनस्यैवोचितत्वादित्याहुः।

Colophon: इति धर्मितावच्छेदकप्रत्यासत्तिरहस्यम्।

Post-Colophon: ...लिखनात् भूवि...म एतादृशोमम। आस्तां श्रीगुरुदेवस्य प्रीणनाय विलम्बकः ॥०॥ श्रीगोविन्दशर्मलिखितमिदम्।

विवरणम् : पुस्तकमिदं पराचीनत्वाज्जीर्णत्वमुपागतम्। पुस्तकस्यान्तिमांशमात्र-मत्रावतिष्ठते। मसीलोपादिदं प्रायेणैवापाठ्यतामुपायातम्। पत्राङ्कोनात्र वर्तते। Ms. No. 1094. Cat. No. 16 सूची द्रष्टव्या।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

860

1068 धर्मितावच्छेदकप्रत्यासत्तिरहस्यम् ।

Dharmitāvacchedakapratyāsattirahasyam.

By Harirāma Tarkavāgīśa.

Substance: Country-made yellow paper. Size 16 × 2¾ inches. Folia 2-6 (= 6 by counting). Neatly written in Bengali character. 7 lines in a page. Extent 140 ślokas. Appearance old and discoloured. Prose. Generally correct. Incomplete at the beginning.

This Ms. is one of the same as our previous cat. number 16 by Harirāma Tarkavāgīśa. The present Ms. wants the beginning, it contains the concluding portions (140 ślokas) only out of an extent of 1176 ślokas (the whole book). It does not mention the name of the author but by comparison it comes out to be of Harirāma as the end of the book is the same as in our previous number.

Beginning : प्रायत्वादिकमनिवेश्यैव विशेष्यतावच्छेदकत्वप्रत्यासत्त्या कार्यकारणभाव कल्पनं सम्भवतीत्याहुः ।

End : तदपेक्षया तादृशव्यक्तिभेदेन उपदर्शितकारणताकल्पनस्यैवोचितत्वादित्याहुः ।

Colophon : इति धर्म्मितावच्छेदकप्रत्यासत्तिरहस्यं समाप्तं ।

Post Colophon : लिपीनां लिखनात् भूरिः श्रम एतादृशो मम । श्रास्तां श्रीगुरुदेवस्य प्रीणनायाविलम्बिकः ॥ श्रीगोविन्द शर्मणः···मिदं ।

विवरणम् : २६ संख्यक पुस्तक विवरणे द्रष्टव्यम् ।

861

1071 धर्मितावच्छेदकप्रत्यासत्तिरहस्यम् ।

Dharmitāvacchedakapratyāsattirahasyam.

By Harirāma Tarkavāgīśa.

Substance : Country-made white paper. Size 17½ × 3½ inches.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Folia 1-6. Neatly written in Bengali character. 8 lines on a page. Extent 252 ślokas. Appearance old and discoloured. Prose. Generally correct. Incomplete at the end.

This is another copy of our previous number noticed before. The Ms. ends abruptly.

Beginning : अनुमितिपरामर्शयोः कार्यकारणभावघटकप्रत्यासत्तिः सामानाधिकरण्यं तेन चैकपुरुषीयपरामर्शदशायां तत्-शून्य(?)पुरुषान्तरस्य नानुमित्यापत्तिः, तस्य समवाय-रूपकारणतावच्छेदकसम्बन्धेन परामर्शविरहात् ।

End : केचित्तु स्वावच्छेदकावच्छिन्नत्वस्वनिरूपकज्ञाननिरूपितत्वउभयसम्बन्धेन धूमा-भावप्रकारतानिरूपितविशेष्यताविशिष्टान्यधूमप्रकारतानिरू-

विवरणम् : सर्वमेव २६ संख्यकसूच्यां उक्तम् । तत्रैव द्रष्टव्यम् ।

862

1078 धर्मितावच्छेदकप्रत्यासत्तिरहस्यम् ।

Dharmitāvacchedakapratyāsattirahasyam.

By Harirāma Tarkavāgīśa.

Snbstance : Country-made yellow paper. Size $16\frac{1}{2} \times 3\frac{1}{2}$ inches. Folia 2 (by counting). Neatly written in Bengali character. 7 lines on a page. Extent 100 ślokas. Appearance old and discoloured. Prose. Generally correct. Incomplete at the end.

The Ms. ends abruptly. It contains 1 folio of Vidhivāda and another folio of Dharmitāvacchedakapratyāsattirahasyam.

Beginning : ओदनकामः पचेत स्वर्गकामो यजेत इत्यादौ विधिवाक्यं पाकयागादौ प्रवर्त्तकं तस्य तथात्वं न साधनमव्युत्पन्नानां ततोऽप्रवृत्तेः, किन्त्वर्थज्ञानद्वारेति । (fol. 1a)

End : न च समवायेन तत्तदात्मसमवेतत्वावच्छिन्नं प्रति तादात्म्येन तत्तादात्मकेन हेतुतायां मानाभावात् एतादृशरीत्या नापत्तिवारणसम्भव इति वाच्यं विषयभेदेन—(fol. 2b)

93

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विवरणम् : अस्मिन् पुस्तके एकस्मिन् पत्रे विधिस्वरूपविचारः कृतः। अन्यस्मिन् पत्रे धर्मितावच्छेदकप्रत्यासत्तिरहस्यस्य कश्चिदंशो विद्यते।

863

1855 धर्मितावच्छेदकविचारः।

Dharmitāvacchedakavicāraḥ.

Unknown Author.

Substance ; Country-made red and yellow paper. Size 17 × 4 inches. Folia 4. Neatly written in Bengali character. 7 lines in a page. Extent about 136 ślokas. Appearance old. Prose. Generally correct. Incomplete at the end. Condition good.

There is a square blank space in the middle of each page.

It begins fol. 1a : ॐ नमो गणेशाय। अनुमितिपरामर्शयोः कार्यकारणभाव घटकप्रत्यासत्तिः सामानाधिकरण्यं तेनैकपुरुषीयपरामर्शदशायां तच्छून्यपुरुषान्तरस्य नानुमितिः। तस्य समवायरूपकारणतावच्छेदकसम्बन्धेन परामर्शानधिकरणत्वात्।

It ends fol. 4b : तत्र पर्वतत्वं धर्मितावच्छेदकता प्रत्यासत्त्या च पर्वतत्वे धूमपरामर्शसत्वात्। अत्रोच्यते तादृशावच्छेदकतासम्बन्धेनानुमि

विवरणम् : असम्पूर्णोऽयं ग्रन्थः। पर्वतोवह्निमानित्याद्यनुमितौ कस्य धर्मितावच्छेदकत्वं तदेव विचारमुखेन प्रदर्शितम्।

864

1474 धर्मिताविचारः।

Dharmitāvicāraḥ.

By Harirāma Tarkavāgīśa.

Substance : Country-made raddish and yellow paper. Size $18\frac{1}{2} \times 3\frac{1}{2}$ inches. Folia 16 (1a-16b). Neatly written in Bengali character. 8-10 lines on a page. Extent about 532 ślokas. Appearance

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

old, torn and worn out. Prose. Generally correct. Complete. Condition not good. Date not mentioned. Unpublished.

There is a square blank space in the middle of each page.

This is another copy of our previous no. 1094 (2) already noticed.

Beginning: श्रीहरिः। अनुमितिपरामर्शयोः कार्यकारणघटकप्रत्यासत्तिसामानाधिकरण्यं। तेनैकपुरुषीयपरामर्शदर्शायां तत्शून्यपुरुषान्तरस्य नानुमितिः। तस्य समवायरूपकारणतावच्छेदकसम्बन्धेन परामर्शानधिकरणत्वात्।

End: तदपेक्षया आत्मव्यक्तिभेदेन उपदर्शितकारणताकल्पनस्यैवौचित्यादित्याहुः॥

Colophon: इति धर्मिताविचारः समाप्तः।

Post colophon: श्रीदुर्गा जयति।

विवरणम्: निबन्धोऽयं व्यरचि श्रीमता हरिरामतर्कवागीशेन। धर्मितावच्छेदकप्रत्यासत्तिरहस्यनाम्नाऽप्ययं नैयायिकसमाजे समधिकं प्रथते। सामानाधिकरण्यमेवानुमितिपरामर्शयोः कार्यकारणभावघटकप्रत्यासत्तिरित्याहुः प्राचीनाः। तन्मतं न समीचीनं एकधर्मावच्छिन्नपरामर्शकाले धर्मान्तरावच्छिन्नविशेष्यकानुमित्यापत्तिवारणार्थं धर्मितावच्छेदकव्यक्तीनां विशिष्य निवेशनीयतया धर्मितावच्छेदकव्यक्तिभेदेन कार्यकारणभावबाहुल्यात्। अतोऽनुमितिपरामर्शयोः कार्यकारणभावप्रत्यासत्तिस्तावत् समानधर्मितावच्छेदकत्वमेवेति प्राहुर्नवीनाः।

विषयेऽस्मिन्नानाकल्पाः सम्यगुद्भाविताः निबन्धकृता। तेषु कल्पेषु हेतुतावच्छेदकभेदेन परामर्शहेतुताभेद आवश्यक इत्यवगन्तव्यम्। तदसहिष्णूनां नैयायिकानां मनोमोदार्थमेकादशपत्रस्य (ख) पृष्ठायामेकोऽभिनवोऽनुगम उल्लिखितो वर्तते। पराचीनोऽयं छिन्नत्वं जीर्णत्वञ्च समुपागतः। पत्राणां पार्श्वभागाः क्षुद्रटिप्पन्यन्विताः। अन्तिमपत्रद्वयं खल्वशुद्धिबहुलम्। क्वचित्क्वचिन्मसीलोपोपक्रमः संवृत्तः। प्रकाशनमस्य न समजनि। Cat. No. 16, Ms. No. 1094 (2) सूची द्रष्टव्या।

865

1661 ध्वंसजन्यभावयोः कार्यकारणभावरहस्यम्।

Dhvaṁsajanyabhāvayoḥ kāryakāraṇabhāvarahasyam.

By Harirāma Tarkavāgīśa.

Substance: Country-made yellow paper. Size 17 × 3¼ inches.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Folia 3 (1a-3b). Neatly written in Bengali character. 5-10 lines in a page. Extent about 150 ślokas. Appearance old, torn and worn out. Prose. Generally correct. Complete. Condition very bad. Date not mentioned. Published.

There is a square blank space in the middle of each page.

Beginning : ॐ कृष्णाय नमः। एवं ध्वंसोविनाशी जन्यत्वादित्यादौ जन्यत्वावच्छिन्नविनाशित्वव्यापकं भावत्वमुपाधिस्तत्रानुकूलस्तर्को······

End : भेदादेः स्वरूपतोहेतुत्वकल्पने किं न विनिगमनाविरहादिति वदन्ति।

Colophon : सम्पूर्णोयं विचारः ॥

विवरणम् : तार्किकचूडामणेर्गदाधरभट्टाचार्यस्याध्यापकेन हरिरामतर्कवागीशेन विनिर्मितोऽयं ग्रन्थः। अत्र ध्वंसी विनाशी जन्यत्वादित्याकारकानुमानस्य हेतौ भावत्वरूपमुपाधिमुद्भाव्य तत्रोपाधौ प्रतियोगितासम्बन्धेन ध्वंसं प्रति तादात्म्येन जन्यभावत्वेन कारणत्वमिति साध्यव्यापकताग्राहकः कार्यकारणभावात्मकोऽनुकूलतर्कः प्रदर्शित आस्ते। ग्रन्थकारीयविचाररीति नैयायिकमनोमोदजननी। अत्यन्तसंक्षिप्तत्वेनायं ग्रन्थः किञ्चिद्दुर्बोध्यतामुपागतः। अयं प्राचीनोजीर्णश्छिन्नश्च संवृत्तः। प्रतिपत्रमेवापक्षियमाणा मसी सम्यगुपलभ्यते। कलिकातासंस्कृतमहाविद्यालयीयगवेषणाविभागतः प्रकाशनमस्य वारमेकं जातम्।

866

487 नञ्वादः।

Nañvādaḥ.

By Raghunātha Śiromaṇi.

Substance : Country-made yellow paper. Size 16½×3 inches. Folio 1. Neatly written in Bengali character. 5 lines on a page. Extent 23 ślokas. Appearance fair. Prose. Generally correct. Incomplete at the end.

The Ms. ends abruptly. It contains Raghunātha Śiromaṇi's Nañvāda, printed in Bib. Ind. pp. IV (Śabdakhaṇḍa), pp. 1010-1086,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Calcutta, Sk. 1822. The present Ms. begins at p. 1010 and ends at p. 1052 of the printed edition.

Beginning : संसर्गाभावोऽन्योन्याभावश्च नञोऽर्थः। तत्र चान्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वं व्युत्पत्तिबललभ्यं (pp. 1010-1017)

End : अतएव यजतिषु येयजामहं करोति नानुयाजेष्वित्यादावे(क)वाक्यत्वानुरोधात् येयजामहमित्यादेरनुसङ्गे—(pp. 1050-52)

विवरणम् : अस्मिन् पुस्तके रघुनाथशिरोमणिकृतोनञ्वादोऽन्ते खण्डित उपलभ्यते। अयं नञवादोगदाधरकृतटीकासहितः। अस्मिन् ग्रन्थे—

'तत् सादृश्यमभावश्च तदन्यत्व तदल्पता।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिताः' ॥

इति सादृश्यादयः षड़ेव नञर्थाः समालोचिताः, स्वमतेन संसर्गाभावोऽन्योन्याभावश्च नञोऽर्थ इति सिद्धान्तितम्। तेन यत्र च विशेषणविशिष्टयोरभेदेनान्वयो व्युत्पन्नस्तत्रान्योन्याभावो नञा बोध्यते यथायं घटो नीलः इति तत्र विशेषण-विशिष्टपदयोः समानविभक्तिकत्वं विरुद्धविभक्तिराहित्यं वा तन्त्रम्।

867

561 नञ्वादः।

Nañvādaḥ.

By Raghunātha Śiromaṇi.

Substance : Country-made yellow paper. Size $9\frac{1}{4} \times 3\frac{1}{4}$ inches. Folia 1a-3b. Neatly written in Bengali character. 8 lines on a page. Extent 52 ślokas. Appearance good. Prose. Generally correct. Complete.

The Ms. contains a dissertation on Nañ, negatire particle, by Raghunātha Śiromaṇi, very often noticed and printed, B. I. Calcutta with T.C. Pt. IV. Vol. II, pp. 1010-1086, with Gadādhara's commentary. The present Ms. contains the text only.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Beginning : संसर्गाभावोऽन्योन्याभावश्च नञोऽर्थः । तत्र चान्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वं व्युत्पत्तिवललभ्यं ।

End : तेन न पचति न राज्ञ इत्यादौ कृत्यादेरन्योन्याभावो भुतलं न घट इत्यादौ घटादेः संसर्गाभावो न प्रतीयते इत्याहुः ।

विवरणम् : अस्मिन् पुस्तके रघुनाथशिरोमणिकृतो नञ्वादो दृश्यते । अयं ग्रन्थस्तु 'एसियाटिक् सोसाइटि'समाजात् मुद्रिते तत्त्वचिन्तामणौ मुद्रित उपलभ्यते । विषयादिविवरणं तु प्रागेवोक्तं तत्रैव द्रष्टव्यमिति ।

868

661 (१) **नञ्वादः ।**

Nañvādaḥ.

By Raghunātha Śiromaṇi.

(२) **नञ्वादटिप्पनी ।**

Nañvādaṭippanī.

By Unknown Author.

Substance: Country-made yellow paper. Size $16\frac{1}{4} \times \frac{1}{2}$ inches. Folia 1-2 + 1 + 1-24 = 27. Neatly written in Bengali character. 7 lines in a page. Extent 1134 ślokas. Appearance fair. Prose. Generally correct. Complete.

The Ms. contains (1) Śiromaṇi's Nañvāda and (2) Gadādhara's Commentary on it, often noticed and printed, Bib. Ind., Calcutta. It has a stray leaf also.

Beginning : (1) संसर्गाभावोऽन्योन्याभावश्च नञोऽर्थः ।

(2) राधामुखाब्जमधुमत्तमधुव्रतश्री-
कृष्णस्य पादयुगलं शिरसा प्रणम्य ।
नञ्वादसङ्गतशिरोमणिगूढभावं
श्रीमान् गदाधरबुधः प्रकटी करोति[1] ॥

---

1 The printed edn. has सुधीर्विशदीकरोति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

End : (1) तेन न पचति न राज्ञ इत्यादौ कृत्यादेरन्योन्याभावो भूतलं न घट इत्यादौ घटादेः संसर्गाभावो न प्रतीयत इत्याहुः ।

(2) आहुरित्यस्वरससूचनाय । प्रथमाविभक्त्या संख्याद्यतिरिक्तार्थबोधने तस्याम-साधुतापत्तिरिति ।

Colophon : (1) श्रीमद्भट्टाचार्यशिरोमणि विरचितं नञ्विवेचनं सम्पूर्णं ।

(2) महामहोपाध्याय श्रीगदाधर भट्टाचार्यविरचिता नञ्वादटिप्पनी समाप्ता ।

Post Colophon : (2) श्रीहरिहरशर्म्मणा लिखितैषा स्वकीया ।

विवरणम् : अस्मिन् पुस्तके रघुनाथशिरोमणिकृतो नञ्वादस्तथा गदाधरभट्टाचार्य-नञ्वादटीका द्वयमेव संपूर्णं मुद्रितञ्च दृश्यते । अत्र विषयादिविवरणं प्रागेवोक्तं तत्र द्रष्टव्यम् ।

869

975 नञ्वाद-गादाधरीटीका ।

Nañvāda-gādādharīṭīkā.

By Gadādhara Bhaṭṭācārya.

Substance : Country-made yellow paper. Size 17 × $3\frac{3}{4}$ inches. Folia 5 (1b-5b). Neatly written in Bengali character. 8-10 lines in a page. Extent 146 ślokas. Appearance old. Prose. Generally correct. Incomplete at the end. Date n. d. Published.

There is a square blank space in the middle of each page.

A commentary of the Nañvāda of Raghunātha by Gadādhara

Beginning : ॐ नमः शिवाय ।

राधामुखाब्जमधुमत्तमधुव्रतश्री, कृष्णस्य पादयुगलं शिरसा प्रणम्य ।
नञ्वादसंगतशिरोमणिगूढभावं, श्रीमान्गदाधरबुधप्रकटीकरोति ॥

यद्यपि सादृश्यादयः षडेव नञर्थाः, तदुक्तं तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता ।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिताः (॥)

इति तथापि लक्षणयैव सादृश्याद्यर्थे प्रयोगनिर्वाहे तादृशार्थे शक्तेः कल्पनमयुक्तं अपितु

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अभावान्यत्वरूपार्थद्वय एव सादृश्यत्वाद्यपेक्षया अभावत्वभेदत्वयोर्लघुतया तयोः प्रवृत्तिनिमित्तत्वे विनिगमकसत्त्वादित्याशयेनाह संसर्गाभाव इति ।

End : न च तत्राप्याधेयत्वं संसर्गतयैव विषयस्तथाचेदं वाक्यं घटवत्कर्मत्वप्रतीतिपरमित्याकारकज्ञानमे... [५ (ख) पृः]

विवरणम् : तार्किकशिरोमणिरघुनाथरचितस्य नञ्वादस्य टीका परोऽयं निबन्धः। निबन्धा खल्वस्य गदाधरभट्टाचार्यः। अत्र तावदस्ति नञ्पदार्थस्य सूक्ष्मविचारादिमुखेन निरूपणम्। निबन्धकर्त्तुर्व्याख्यानकौशलं विस्मयं जनयति। अयं हि पराचीनतामुपागतः। व्यक्तिद्वयेनास्य प्रतिलिपिर्विनिर्मिता। निबन्धसमाप्तिरत्र न वर्त्तते नञ्पदार्थमपर्यालोचयता श्रीमतागङ्गेशोपाध्यायेन रचितस्य तत्त्वचिन्तामणयन्तःपातिशब्दपरिच्छेदस्य नञ्पदार्थनिरुपणरहितस्यासम्पूर्णत्वमाकलयता तत्प्रकाशकेन तत्परिच्छेदस्यान्तिमे गादाधर्याटीकया सह रघुनाथशिरोमणिप्रणीतो नञ्वादः परिशिष्टत्वेण मुद्रापितः। कलिकाताराजधान्यां वाप्तिस्तमिशनयन्त्रतोऽस्य मुद्रणं वारमेकमेव समजनि ।

870

647 नञ्वादटिप्पनी ।

Nañvādaṭippanī.

By Rāmabhadra Sārvabhauma.

Substance: Country-made yellow paper. Size $17\frac{1}{2} \times 3$ inches. Folia 1-8. Neatly written in Bengali character. 8 lines on a page. Extent 384 ślokas. Appearance old but fair. Prose. Generally correct. Complete. Date Śk. 1632.

The Ms. contains a commentary on Raghunātha Śiromaṇi's Nañvāda, by Rāmabhadra Sārvabhauma. This work is rarely noticed and not yet printed. It should be printed. The original text of Śiromaṇi with Gadādhara's commentary has been printed in Bib. Ind., TC. pt. IV, Vol. II, fol. 1a of the Ms. has the concluding lines of some other work, it seems.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Beginning : तातस्य तर्कसरसीरुहकाननेषु चूडामणेर्दिनमणेश्चरणौ प्रणम्य ।
श्रीरामभद्रसुकृती कृतिनां हिताय लीलावशात् किमपि कौतुकमातनोति ॥
संसर्गाभावेति । संसर्गाभावत्वविशिष्टोऽन्योन्याभावत्वविशिष्टश्च नञोऽर्थः शक्य(?) इत्यर्थः, नञस्ताद्रूप्येणैवानुभवात् ।

End : कृत्यादेरित्यादिना स्वत्वपरिग्रहः । असामर्थ्यमिति पूर्व्वोक्तमेतत् । अत्र कल्पनागौरवादिकमरुचिवीजमिति संक्षेपः ।

Colophon : इति महामहोपाध्याय श्रीयुतरामभद्रसार्व्वभौमभट्टाचार्यविरचिता नञ्वादस्य टिप्पनी समाप्ता ।

Post Colophon : श्रीरामरुद्रशर्म्मणः स्वाक्षरमिदं पुस्तकञ्च । शकाब्दाः १६३२ वैशाख ।

विवरणम् : अस्मिन् पुस्तके शिरोमणिकृतनञ्वादस्य रामभद्रकृता टिप्पनी सम्पूर्णा अद्याप्यमुद्रिता मुद्रणार्हा दृश्यते । अत्र विषयादिविवरणं तु प्रागेवोक्तं तत्रैव द्रष्टव्यम् ।

871

469 नञ्वादटीका ।

Nañvādaṭikā.

By Gadādhara Bhaṭṭācārya.

Substance: Country-made yellow paper. Size $17\frac{1}{2} \times 4$ inches. Folia 1a – 21b + 1. Neatly written in Bengali character. 9 lines in a page. Extent 1010 ślokas. Appearance old but fair. Prose. Generally correct. Complete. Date Sk. 1691.

The Ms. contains Gadādhara's commentary on Raghunātha Siromaṇi's Nañvāda noticed in our previous Ms. no. 792 and printed in Bib. Ind. Calcutta, TC. Pt. IV. Vol. II, pp, 1010-1086. The Ms. has 1 fol. on Parāmarśapūrvapakṣarahasya by Mathurānātha towards the end.

For the beginning and the end, see Cat. no. 872.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Colophon : महामहोपाध्याय-श्रीगदाधरभट्टाचार्यविरचितनञ्वादटिप्पनी समाप्ता ॥०॥

Post colophon : श्रीरस्तु मयि लेखके ॥०॥ श्रावणस्याष्टाविंशति दिवसे वृहस्पतिवारे समाप्तश्चायं ग्रन्थः । श्रीगुरवे नमः । शुभमस्तु शकाब्दाः १६६१ ॥

विवरणम् : विवरणं तु ८७२ संख्यकसूच्यां द्रष्टव्यम् ।

872

346 नञ्वादटीका ।

Nañvādaṭīkā.

By Gadādhara Bhaṭṭācārya.

Substance : Machine-made yellow paper. Size 15½ × 3½ inches. Folia 1b – 25. Neatly written in Bengali Character. 8-10 lines on a page. Extent 800 ślokas. Appearance fresh. Prose. Generally correct. Incomplete at the end.

The Ms. contains Gadādhara's commentary on Śiromaṇi's Nañvāda, published in Bib. Ind., TC. pt. IV. Vol. II. The present Ms. runs from the very beginning up to p. 1070 of the printed edition. It deals with the particle nañ in a dissertation, composed by Raghunātha Śiromaṇi.

Beginning : राधामुखाब्जमधुमत्तमधु(व्रत ?)श्री-
कृष्णस्य पादयुगलं शिरसा प्रणम्य ।
नञ्वादसङ्गतशिरोमणिगूढभावं
श्रीमान् गदाधरबुधः(सुधीः B. I.)करोति ॥

यद्यपि सादृश्यादयः षडेव नञर्थाः—etc. (p. 1010) ।

End : यथा श्राद्धाधि(दि?)करणे विध्यर्थेष्टसाधनत्वाभावबोधस्तथा तत्तत्क्रियायामिष्टसाधनत्वाभावबोधो न सम्भवति अपि तु धात्वर्थेऽकरणे इष्टसाधनत्वमेव लिङा प्रत्याज्यं(य्यं) तथा च हरिशयनादि B.I. कृत—(p. 1070)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विवरणम् : अस्मिन् पुस्तके शिरोमणिकृत-नञ्वादस्य टीका गदाधरभट्टाचार्यकृता असम्पूर्णा दृश्यते। अयं सटीकग्रन्थः "एशियाटिक् सोसाइटि" समाजात् मुद्रितः तत्त्वचिन्तामणिशब्दखण्डान्ते निहित उपलभ्यते। अत्र नञ्सम्बन्धीविचारः कृतः। तदुक्तम्--

तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिताः॥

अस्मिन् ग्रन्थे एतेष्वर्थेषु कुत्र कया रीत्या नञः कीदृशी शक्तिरित्यादिकं विचारजातं दृष्टम्।

873

2293 नञ्वादटीका।

Nañvādaṭīkā.

By Gadādhara Bhaṭṭācārya.

Substance : Country-made yellow paper. Size $18\frac{1}{2} \times 3\frac{1}{2}$ inches. Folia 20 (1a-20b). Neatly written in Bengali character. 8 lines in a page. Extent about 701 ślokas. Appearance old. Prose. Generally correct. Complete. Condition good. Printed Chss.

There is a square blank space in the middle of each page.

A commentary on the Nañvāda of Raghunātha by Gadādhara Bhaṭṭācārya.

For description of contents see cat. no. 872.

Beginning fol. 1a : श्रीरामः॥ राधामुखाब्जमधुमत्तमधुव्रतश्रीकृष्णस्य पादयुगलं शिरसा प्रणम्य। नञ्वादसङ्गतशिरोमणिगूढभावं श्रीमान् गदाधरसुधीर्विंषदी करोति।

यद्यपि सादृश्यादयः षडेव नञर्थास्तदुक्तं तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता। अप्राशस्त्यं विरोधश्च नञर्थाः षट्प्रकीर्त्तिताः।

End fol. 20b : आहुरित्यस्वरस सूचनाय स च प्रथमा विभक्त्या संख्याद्यतिरिक्तार्थबोधने दस्यासाधुतापत्तिरितिक्तं पल्लवितेन।

Colophon : इति समाप्तश्चायं ग्रन्थः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विवरणम् : रघुनाथकृतनञ्वादस्य गादाधरीटीका अस्मिन् ग्रन्थे वर्त्तते। ग्रन्थोऽयं स्पष्टाक्षरः समाप्तिं गतश्च। अस्मिन् लिपिकारप्रमादाः दरीदृश्यन्ते। विशेषपरिज्ञानार्थं ८७२ संख्यक सूची द्रष्टव्या।

874

498 नञ्वाददीधितिः।

Nañvādadīdhitiḥ.

By Raghunātha Śiromaṇi.

Substance: Machine-made yellow paper. Size $14\frac{1}{4} \times 3$ inches. Folia 2 (by counting). Neatly written in Bengali character. 6 lines in a page. Extent 70 ślokas. Appearance fresh. Prose. Generally correct. Incomplete at the end.

The Ms. contains Śiromaṇi's Nañvāda which is also called Nañvādadīdhiti and Nañvādarahasya. Of course, here dīdhiti is not a commentary but the orginal work, printed in Bib. Ind., Calcutta, under TC. Pt. IV, Vol. II. The Ms. ends abruptly.

Beginning: संसर्गाभावोऽन्योन्याभावश्च नञोर्थः। तत्रान्वयितावच्छेदकधर्म्मावच्छिन्नप्रतियोगिताकत्वं व्युत्पत्तिबललभ्यं। (pp. 1010-1017)

End: अतएव प्राभाकराः न कलञ्जं भक्षयेदिति श्रुतेः क(ल)ञ्जभक्षणाभावविषयकं कार्य्यमित्यर्थमाहुः। नियम(तः B.I.)स्तु तात्पर्यादिवशात् मुख्यफलाजन (pp. 1073-74)

विवरणम् : अस्मित् पुस्तके रघुनाथशिरोमणिकृतो नञ्वादः खण्डितो दृश्यते। ग्रन्थोऽयम् "एशियाटिकसोसाइटि समाजात् मुद्रित उपलभ्यते। विवरणं प्रागेवोक्तं तत्रैव द्रष्टव्यम्।

875

1652 नञ्वादरहस्यम्।

Nañvādarahasyam.

By Raghunātha Śiromaṇi.

Substance: Country-made yellow paper. Size 16×3 inches.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Folia 2 (1a-2b). Neatly written in Bengali character. 6-7 lines in a page. Extent 57 ślokas. Appearance old, torn and worn out. Prose. Generally correct. Complete. Condition very bad.

There is a square blank space in the middle of each page. Date not mentioned.

Beginning : ॐ नमः शिवाय । संसर्गाभावोऽन्योन्याभावश्च नञोऽर्थः ।

End : भूतलं न घट इत्यादौ घटादेः संसर्गाभावेन(?) प्रतीयत इत्याहुः ।

Colophon : इति महामहोपाध्यायश्रीशिरोमणिभट्टाचार्यविरचितनञ्वादरहस्यं समाप्तम् ।

विवरणम् : अभावबोधकनञर्थविचारात्मकोऽयं निबन्धः । तार्किकशिरोमणी रघुनाथोऽस्य रचयिता । संसर्गाभावान्योन्याभावबोधकस्य नञः सूक्ष्मविचारमुखेन परमत-निरसनपुरःसरं सुगम्भीरं निर्वचनमत्र कृतं निबन्धकृता । प्राचीनत्वं छिन्नत्वं जीर्णत्वञ्च-समुपागतोऽयम् । व्यक्तिद्वयेनास्य लिपिर्विनिर्मिता । एशियाटिक् सोसाइटिभवनतः प्रकाशनमस्य वारमेकमजनिष्ट ।

876

829 नञ्विचारः ।

Nañvicāraḥ.

By Raghunātha Śiromaṇi.

Substance: Machine-made white paper. Size 15 × 4 inches. Folia 11 (1b-4a). Neatly written in Bengali character. 6-9 lines on a page. Extent 66 ślokas. Appearance not so old but torn. Prose. Generally correct. Complete. Date n.d. Published.

Beginning : ॐ नमः शिवाय । संसर्गाभावोऽन्योन्याभावश्च नञोर्थः । तत्रान्व-यितावच्छेदकावच्छिन्नप्रतियोगिताकत्वं व्युत्पत्तिबललभ्यम् ।

End : केचित्तु प्रतियोगिपदोत्तरस्य सुपः प्रतियोगित्वेऽनुयोगित्वे वा नञुत्तरस्य चाधिकरणत्वे नञोवाऽभाववति लक्षणा विभक्त्यर्थानुयोगिसमानविभक्तिकार्थयोरन्योन्याभाव-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संसर्गाभावबोधने नञो न सामर्थ्यं तेन न पचति न ज्ञात(?) इत्यादौ कृत्यादेरन्योन्याभावो भूतलं न घट इत्यादौ घटादेः संसर्गाभावो न प्रतीयेत इत्याहुः ।

ColoPhon : इति महामहोपाध्याय श्रीशिरोमणिभट्टाचार्यविरचितो नञविचारः ।

Post Colophon : ॐ नमः परदेवतायै । अथ शाब्दबोध निरूप्यते .....एवं भेदत्वरूपाखण्डोपाधिविशिष्टाभाव

विवरणम् : नञ्विचारात्मकोऽयं ग्रन्थः । तार्किकशिरोमणीरघुनाथोऽस्य रचयिता । सूक्ष्मनातिदीर्घविचारमुखेनात्र संसर्गाभावान्योन्याभावयोर्नञर्थत्वं व्यवस्थापितं ग्रन्थकृता । अत्रत्यान्तिमपत्रे प्रकृतग्रन्थलिखनान्तरं नञ्पदघटितस्य कस्यचिद्वाक्यस्य शाब्दबोधप्रणाल्युपक्रमोविरचितोलिपिकारेण । नायं खलु पराचीनः किन्तु च्छिन्नत्वमापन्नः । मुद्रणमस्य बहुशः समजनि ।

The meaning of nañ has been discussed in the book by Raghunātha.

877

792 नञ्वादविवृतिः ।

Nañvādavivṛtiḥ.

By Gadādhara Bhaṭṭācarya.

Substance : Country-made yellow paper. Size $18 \times 4\frac{1}{4}$ inches. Folia 1-25. Neatly written in Bengali character. 9 lines on a page. Extent 1000 ślokas. Appearance old and worn out but with a good hand writing. Prose. Generally correct. Complete.

The Ms. contains Gadādhara's commentary, called Vivṛti, on Raghunātha Śiromaṇi's Nañvāda, both printed in B.I., Calcutta and very often noticed in the catalogues of Mss.

Beginning : राधासुखाब्जमधुमत्तमधुव्रतश्री-
कृष्णस्य पादयुगलं शिरसा प्रणम्य ।
नञ्वाद सङ्गतशिरोमणिगूढभावं
श्रीमान् गदाधरसुधीर्विष(श)दीकरोति ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यद्यपि सादृश्यादयः षडेव नञर्थाः, तदुक्तं—

तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता ।

अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिताः ॥ इति ।

तथापि लक्षणयैव सादृश्याद्यर्थे प्रयोगनिर्वाहे तादृशासादृशा B.I. शक्ते शक्ति-B.I. कल्पनमनुचितं(मयुक्तं B.I.) ।

End : आहुरित्यस्वरससूचनाय । स च प्रथमाविभक्त्या संख्याद्यतिरिक्तार्थबोधने तत्या असाधुत(त्व B.I.)पत्तेरिति ।

Colophon : इति महामहोपाध्यायश्रीगदाधरभट्टाचार्यनिर्मिता नञ्वादविवृतिः सम्पूर्णा ।

Post Colophon : श्रीगोलोकनाथशर्म्मणः स्वाक्षरपुस्तं । ॐ नमः शिवाय । श्रीश्रीरामशर्म्मणे नमः ।

Note—From the post-colophon it appears that the present Ms. was written by Golokanātha Nyāyaratna, pupil of Srī Rāma Siromaṇi of Navadvipa, who died about the latter part of the 19th century (1855 A.C.). He lived about B. S. 1213-1261 (pp. 22, Vaṅge Navyanyāyacarita).

विवरणम् : अस्मिन् पुस्तके शिरोमणिकृतनञ्वादस्य गदाधरकृता टीका सम्पूर्णा दृश्यते । तत्र षण्णां नञर्थानां विचारं कृत्वा नञः शक्तिर्निरूपिता ।

878

2611 नञ्वादटीका ।

Nañvāda-ṭīkā.

By Gadādhara Bhaṭṭācāryya.

Substance : Country-made yellow paper. Size 18 × 2¾ inches. Folia 14 (by counting). Neatly written in Bengali character. 7 lines in a page. 88-90 latters in a line. Extent about 504 ślokas. Appearance old. Prose. Condition worn out. Generally correct. Incomplete at the end. Printed.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

There is a square blank space in the middle of each page.

For the beginning and contents of the Ms. see our cat no. 877.

It ends fol. 14b: साक्षाद् भेदान्वयेन भवविरयेव भवति तु विभक्त्यर्थमन्तराकृत्येति व्युत्पत्तिः घटकर्मत्वमित्यादौ घटादिविशेषिताद्येयत्वादिरुप विभक्त्यर्थस्यैव कर्मत्वादौ प्रकारतया भानादिति ।

879

1724 नव्यमतविचारः ।

Navyamatavicārah.

By Harirāma Tarkavāgīśa.

Substance : Country-made yellow paper. Size $18\frac{1}{4} \times 3\frac{1}{4}$ inches. Folia 8 (by counting). Neatly written in Bengali Character. 7-8 lines in a page. Extent about 413 ślokas. Appearance old, torn, worm eaten and worn out. Prose. Generally correct. Incomplete at the end. Condition very bad. Printed.

There is a square blank space in the middle of each page. Date not mentioned.

This is another copy of our previous No. 906 cat. no. 15 already noticed.

Beginning : प्रकारकेच्छाहेतुः गौरवेण...देव स्वरूपसम्बन्धरूपावच्छेदकत्वासम्भवेपि तादृशावच्छेदकत्वस्याज्ञातत्वादिति न काचिदनुपपत्तिरिति ।

End : न च तत्र किमपि नोत्पद्यत इति वाच्यं ज्ञानसामान्यानुत्पादस्यानुभवविरुद्ध-त्वात् सामग्रीसहकार्योत्पत्तेर्वाधकाभावादिति तत्त्वं ।

Colophon : इति नव्यमतविचारः समाप्तः ।

विवरणम् : प्रारम्भरहितेऽत्र निबन्धे रघुनाथशिरोमणिप्रभृतीनां नव्यानां मतं संक्षेपेणालोचितमास्ते । निबन्धोऽयं 'नव्यमतवाद' इति नाम्नाऽपि प्रथितोऽस्ति । मसी-लोपाच्छिन्नत्वात् कीटदष्टत्वाज्जीर्णत्वाच्च प्रायेणायमपाठ्यतामुपागतः । पत्राणि प्रायः सर्वाण्येव पत्राङ्करहितानि ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

880

1450 नव्यमुक्तिवादः ।

Navyamuktivādaḥ.

By Gadādhara Bhaṭṭācārya.

Substance : Country-made yellow paper. Size 17½ × 3½ inches. Folia 9 (by counting). Neatly written in Bengali character. 6-9 lines on a page. Extent about 342 ślokas. This is another copy of our previous no. 505 already noticed. Appearance old, torn and worn out. Prose. Generally correct. Incomplete in the middle. Condition very bad.

There is a square blank space in the middle of each page. Date not mentioned. Available in print.

Beginning : ॐ नमः शिवाय । प्रयोजनमुद्दिश्यैव पुमांसस्तदुपाये प्रवर्त्तन्ते अतः शास्त्रस्य प्रयोजनं प्रथमतः प्रदर्शयन्ति शास्त्रकृतः ।

End : व्रीहिभिर्यजेत यवैर्वा इत्यादावपि व्रीह्यादौ यवासाहित्यबोधस्य व्युत्पत्ति-सिद्धत्वादित्यन्यत्र विस्तरः ।

Colophon : इति नव्यमुक्तिविचारः ।

Post Colophon : ज्यैष्ठस्यासिते पक्षे द्वादश्यां भृगोर्दिने(?) । व्यलेखि पुस्तिका चेयं श्रीकृष्णेन शर्मणा ॥०॥ श्रीदुर्गा शरणं ॥०॥

विवरणम् : निबन्धोऽयं मध्ये खण्डितः । इममन्तरा ४, ५, अङ्काङ्कितं पत्रद्वयं न वर्तते । उत्सङ्गेऽस्य क्रोडपत्रात्मकं पत्रद्वितयमवतिष्ठते । प्राचीनत्वेनायं जीर्णतां छिन्नताञ्च समुपागतः । क्वचित् क्वचिन्मसी लोपोपक्रमः संवृत्तः ।

881

811 नियोज्य भट्टाचार्यटीका ।

Niyojya Bhaṭṭācāryaṭikā.

By Gadādhara Bhaṭṭācārya.

Substance : Country-made yellow paper. Size 18⅓ × 3¼ inches.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Folia 8 (1a-8b). Neatly written in Bengali character. 6-7 lines on a page. Extent about 286 ślokas. Appearance not old but torn. Prose. Generally correct. Date n.d. Unpublished.

There is a square blank space in the middle of each page.

Beginning : नमः शिवाय । लिङोऽर्थः कार्यत्वं पाकादिक्रियायामेव प्रथमतोऽन्वेति न तु स्वर्गकामोयजेतेत्यादौ प्रथमतस्तदन्वयः किन्तु कार्यत्वेनैव वैदिकलिङ्वाच्येऽपूर्वे प्रथमतो विषयतया यागान्वयः प्रतीयते (।) विषयत्वन्तु जन्यत्वं तत्र च शक्यतावच्छेदककार्यत्वैकदेशे कृतौ स्वर्गकामान्वयः (।)

End : इदमापाततः स्वर्गपरम्परासाधनताघटकापूर्वानुपस्थितावपि इष्टान्तरजनकव्यापारान्तरोपस्थित्या इष्टपरम्परासाधनत्वयागादाविष्टे च स्वर्गाभेदे भासमाने विशिष्टबुद्धौ तन्मते विशेषणज्ञानस्याहेतुतया योग्यतावलादेवापूर्वघटितस्वर्गपरम्परासाधनताभानसम्भवात् (।) अतोदर्शितसाधनत्वान्वयप्रयोजकयोग्यताज्ञानात्मकस्य यागजन्यं कार्यं स्थायीतिज्ञानस्य निर्वाहानवबोधेनैवापूर्ववाच्यताबीजमित्यवधेयम् ॥०॥

विवरणम् : एतदीयपत्रपार्श्वभागे "नियोज्यभटी" इति लिखितमस्ति । वस्तुतस्त्वयं तुरीयचिन्तामण्यन्तर्गतापूर्ववादस्य व्याख्यानपरोग्रन्थः । अस्य खलु विनिर्माता तार्किकाग्रेसरो महामहोपाध्यायीगदाधरभट्टाचार्यः । अत्रापूर्ववादमूलस्य प्रथमतः "आशुविनाशित्वात् परम्पराघटकानुपपत्तेश्च" इत्यन्तसन्दर्भस्य व्याख्यामात्रमवतिष्ठते । व्याख्यानमिदमतिविस्तृतमपि नूनं प्रौढपाठकानां न धैर्यच्युतिं घटयति । अयमप्राचीनोऽपि छिन्नतामुपागतः । पत्राणामस्य दक्षिणप्रान्तभागाः सलिलसमाश्लेषजचिह्नान्विताः । अमुद्रितोऽयम् ।

The name of the text is not mentioned in the Ms. but on the every leaf there is written नियोज्य, भ, टी, evidently the abbreviation for Niyojyānvaya Gādādharīṭikā. This is the same as Apūrvavāda Gadādhara dwells on the injunction one who wants to enjoy heaven should perform the horse-sacrifice, and tries to ascertain how the subject should be understood to be related to the action—as a doer, as one on whom injunction is given, or as one who is entitled to perform the sacrifice.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

882

2718 नियोज्यान्वय-टीका ।

Niyojyānvaya-ṭīkā.

By Gadādhara Bhaṭṭācārya.

Substance: Country-made red and white paper. Size $13\frac{1}{4} \times 4$ inches. Folia 12 (by counting). Neatly written in Bengali character. 3-7 lines in a page. 50-54 latters in a line. Extent about 276 ślokas. Appearance old. Prose. Condition good. Generally correct. Incomplete at the end. It ends abruptly. Printed.

A commentary on the Niyojyānvaya of Gangeśa by Gadādhara.

It begins fol. 1a: ॐ नमो नारायणाय । लिङर्थः कार्यत्वं पाकादिरूप लौकिक-क्रियायामेव प्रथमतोऽन्वेति न तु स्वर्गकामो यजेतेत्यादितो पात्रादौ प्रथमतस्तदन्वयः ।

It ends fol. 12b: तस्याशाब्दत्वे च उक्तानुपपत्तिर्दुर्वारतया तच्छाब्दत्वस्याप्यावश्य-कत्वात् कर्तृत्वाच्च कृतिसमवायित्वं कामनयास्त(?)दन्वये ।

883

679 नियोज्यान्वयगादाधरीपत्रिका ।

Niyojyānvaya-Gadādharīpatrikā.

By Unknown author.

Substance: Country-made yellow paper. Size $17\frac{1}{2} \times 3\frac{1}{2}$ inches. Folia 8 by counting. Neatly written in Bengali character. 8 lines on a page. Extent 280 ślokas. Appearance fair. Prose. Generally correct. Complete.

The Ms. contains two sets of dissertation on Gadādhara's commentary of the Niyojyānvaya section of Vidhivāda in T.C. pt. IV, Vol. II, nearly noticed and not printed in Kroḍapatrasaṁgraha, Chss.,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Benaras. It has another half on dissertations on Gadādhara's Śaktivāda and Rāmabhadra's Kusumāñjaliṭīkā.

Beginning : इष्टसाधनत्वं कृतिसाध्यत्वं बलवदनिष्टाननुबन्धित्वञ्च नैयायिकमते विधिप्रत्ययार्थः ।

End : स्वाश्रयपशुकरणकयागकरणीभूतपशुवृत्तित्वस्वाश्रयनिष्ठभेदप्रतियोगितावच्छेदक - त्वोभयसम्बन्धेन एकत्वस्य पश्वंशेऽन्वय इति केचित् ।

Colophon : Fol. 3A, नियोज्यान्वयग्रन्थस्य भट्टाचार्योपरि विवेचनसिद्धा पत्रिका समाप्ता ।

Post Colophon : पितृचरणे भक्तिर्मे जायतेऽचला ।
श्रीरघुमणिचरणे मतिर्जायतेऽचला ॥

There is a square blank space in the middle of each page.

विवरणम् : अस्मिन् पुस्तके गदाधरकृतविधिवादान्तर्गतनियोज्यान्वयटीकाया उपरि पत्रिकाद्वयं रामभद्रसार्वभौमकृतन्यायकुसुमाञ्जलिकारिकाव्याख्योपरि पत्रिकैका गदाधरस्य शक्तिवादोपरि च पत्रिकैका अद्याप्यमुद्रिता दृश्यन्ते। अत्र विषयादिविवरणं प्रागेवोक्तं तत्र द्रष्टव्यम् ।

884

2242 नियोज्यान्वय-गादाधरीटीका (अपूर्ववादटीका) ।

Niyojyānvaya-Gādādharīṭīkā.

By Gadādhara Bhaṭṭācārya.

Substance : Country-made white and reddish paper. Size 18 × 3½ inches. Folia 10 (1a-10b). Neatly written in Bengali character. 6 lines on a page. Extent about 154 ślokas. Appearance old. Prose. Generally correct. Incomplete at the end. Condition good.

There is a square blank space in the middle of each page.

A commentary on Savdacintāmaṇi of Gangeśa by Gadādhara Bhāṭṭacārya.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

For description of contents see cat. no. 168.

Beginning fol. 1a : लिङोर्थः कार्यत्वं पाकादिक्रियायामेव प्रथमतोऽन्वेति न तु स्वर्गकामो यजेतेत्यादौ प्रथमतस्तदन्वयः प्रतीयते विषयत्वञ्च जन्यत्वं तत्र च शक्यतावच्छेदक कार्यत्वैकदेशे कृतौ स्वर्गकामाद्यन्वयः ।

End fol. 10b : अपूर्व्वानुपस्थितौ परम्परासाधनमिति बोधनानर्हत्वं द्वितीयकल्पे हेतुः परस्परेति इदमापाततः स्वर्गपरम्परासाधनताघटकापूर्व्वानुपस्थितावपि इष्टान्तरजनक व्यापार ।

विवरणम् : गङ्गेशकृतशब्दचिन्तामण्यन्तर्गतस्य अपूर्ववादस्य गदाधरभट्टाचार्यकृतेयं टीका 'नियोज्यान्वय-गादाधरीति' नामनिर्द्दिष्टेति मन्यते । अस्मिन् पुस्तके पुष्पिका न दृश्यते न वा ग्रन्थकर्तुर्नाम कुत्रापि परिलक्ष्यते । १६८ संख्यकमुद्रितग्रन्थसूच्या सह सङ्गतिदर्शनादियमपूर्ववादस्य गादाधरीटीकेति निर्णीयते । विशेषविवरणार्थं १६८ संख्यक ग्रन्थसूची द्रष्टव्या ।

885

485 नियोज्यान्वयटीका ।

Niyojyānvayaṭīkā.

By Gadādhara Bhaṭṭācārya.

Substance : Country-made yellow paper. Size 19 × 3¼ inches. Folia 1-8. Neatly written in Bengali character. 6 lines on a page. Extent 264 ślokas. Appearance old and worn out. Prose.. Generally correct. Complete.

The Ms. contains Gadādhara's commentary on Niyojyānvaya under *Apūrvavāda* section of TC. pt. IV. See no. 7791 of A.S. Cat. Vol. XI, p. 226, where there are some differences of readings. It is not yet printed.

Beginning : लिङर्थः कार्यत्वं पाकादिरूपे लौकिकक्रियायामेव प्रथमतोऽन्वेति, न तु स्वर्गकामो यजेतेत्यादितो मासादौ प्रथमतस्तदन्वयः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

End : एवञ्चापूर्व्वजनकत्वं प्रतीत्य तद्‌विशिष्टे यागे स्वर्गसाधनताबोधः, स्वर्गसाधनता-विशिष्टे च तस्मिन् स्वर्गकामनियोज्यकत्वबोधः, तद्‌विशिष्टे च कार्यताबोध इति सर्व्वमनाकुलं ।

Colophon : इति श्रीगदाधरभट्टाचार्यकृता नियोज्यान्वयटिप्पनी समाप्ता ।

विवरणम् : अस्मिन् पुस्तके गदाधरभट्टाचार्यकृता तत्त्वचिन्तामण्यन्तर्गतापूर्ववादगतनियोज्यान्वयटीका सम्पूर्णा अद्याप्यमुद्रिता उपलभ्यते । तत्र कार्यत्वेनैव वैदिकलिङ्-वाच्ये अपूर्वे प्रथमतः विषयतया यागाद्यन्वयः । विषयत्वन्तु जन्यत्वं, तत्र च शक्यतावच्छेदककार्यत्वैकदेशकृतौ स्वर्गकामान्वय इति सिद्धान्तः ।

886

1580 नीलधूमत्वादि-विचारः ।

Nīladhūmatvādi-vicāraḥ.

By Unknown author.

Substance: Country-made yellow paper. Size $17\frac{1}{2} \times 4$ inches. Folio 1. Neatly written in Bengali character. 8-9 lines in a page. Extent 45 ślokas. Appearance old, torn and worn out. Prose. Generally correct. Complete. Condition bad.

There is a square blank space in the middle of each page. Date not mentioned. Unpublished.

Beginning : ॐ नमो गणेशाय । नीलधूमत्वादेर्व्वारणीयत्वे(त्वे)त्यस्य विचारः । स्वं धूमत्वं तत्समानाधिकरणस्वभिन्नतादृशसाध्यसम्बन्धितावच्छेदकं धूमनिष्ठतद्‌व्यक्तित्वं तदघटितधूमत्वमिति लक्ष……ः ।

End : केचित्तु स्वानवच्छिन्नविशेष्यतावच्छेदकत्व तादृशधर्मावच्छिन्न स्वसामानाधिकरण्योभयसम्बन्धावच्छिन्नप्रतियोगिताकस्याश्रयीभूतविशेष्यतावच्छेदकत्वमिति समुदायार्थः ।

Colophon : इति नीलधूमत्वादेर्विचारः समाप्तः ।

विवरणम् : नीलधूमत्वादेर्न व्याप्यतावच्छेदकत्वमित्यस्य विचारपरोनिबन्धोऽयं निरमायि केनचनाज्ञातनामधेयेन नयायिकेन । व्याप्यतावच्छेदकत्वं नाम स्वसमानाधिकरण

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वभिन्नतादृशसाध्यसम्बन्धितावच्छेदकाघटितत्वम्। स्वं नीलधूमत्वं तत्समानाधिकरणां साध्यसम्बन्धितावच्छेदकं धूमत्वादिकं तद्घटितधर्मत्वान्न नीलधूमत्वादिकस्य व्याप्यतावच्छेदकत्वम्। धूमत्वस्य तु तादृशसाध्यसम्बन्धितावच्छेदकाघटितत्वादेव व्याप्यतावच्छेदकत्वं निराबाधम्। विषयेऽस्मिन्नूहापोहमुखेन नातिदीर्घं समालोचनमत्रास्ति। पत्रस्य पृष्ठयोरुभयोरेव मसीलोपोपक्रमः संवृत्तः। प्राचीनोऽयं छिन्नतां जीर्णताञ्चसमुपागतः। प्रकाशनमस्य न जातम्। पत्रस्य दक्षिणपार्श्वभागः सलिलसम्पर्कजचिह्नसम्पृक्तः।

887

704 न्यायकुसुमाञ्जलिकारिकाव्याख्या।

Nyāyakusumāñjali kārikāvyākhyā.

By Haridāsa Bhaṭṭācarya.

Substance: Machine-made white paper. Size 15 × 5¾ inches. Folia 23 (by counting). Neatly written in Bengali character. 12 lines n a page. Extent about 480 ślokas. Appearance fresh. Prose. Generally correct. Incomplete at the end.

The Ms. Haridāsa's commentary with Udayana's Kārikā texts and foot notes on Nyāyakusumāñjali, often noticed printed. Commented had translated into English. The Ms. ends abruptly towards the beginning of chapter II.

Beginning: ईषदीषदनधीतविद्यया तातमातृमुदमाविवर्द्धयन्।
क्षेपणाय भवजन्मकर्मणां कोपि गोपतनयो नमस्यते॥

इष्टदेवतासङ्कीर्त्तनं ब्रह्मप्रतिपादकसच्छन्दप्रयोगात्मकञ्च मङ्गलं कुर्वन्नेव ग्रन्थनामाह—सत्पक्षप्रसरः...न्यायप्रसूनाञ्जलिः।

End: ननु सर्वप्रलयसम्भवादिति न युक्तं प्रलये मानाभावात्, अहोरात्रस्याव्यवहिताहोरात्रपूर्वकत्वनियमात् कर्मणां विषमविपाकतया कालोपाधित्वस्य···त्वाद् युगपददृष्टस्य—(Ka. 2) p. 45, ed. Kāmākhyānatha, cat. 1818 Sk. fol. 6).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विवरणम् : अस्मिन् पुस्तके हरिदासभट्टाचार्यकृता न्यायकुसुमाञ्जलिकारिकाव्याख्या मूलकारिकासहिता सटिप्पणा असकृत्मुद्रिता खण्डिता च दृश्यते। अत्र ईश्वरास्तित्वं समर्थते।

Colophon : इति प्रथमस्तवककारिकाव्याख्या समाप्ता।

888

727-28 न्यायकौस्तुभः।

Nyāyakauṣtubhaḥ.

By Mahādeva Puṇatāṃakara.

Substance : Country-made yellow paper. Size 30 × 3½ inches. Folia 1-131. Neatly written in Bengali character. 9 lines in a page. Extent 5220 ślokas. Appearance fair but brittle. Prose. Generally correct. Complete.

The Ms. contain Sabdaparicheda (complete) only. The Pratyakṣa-paricched only has been printed in S.B.T. No. 33, Benaras, see I.O. No. 1981, R. Mitra, Noticed Vol. V. p. 174, no. 1861.

Beginning : नत्वा साम्बशिवं मुकुन्दपितरं श्रीकन्वसंज्ञं गुरुं
भूयः सुस्थ(सूक्ष्म)धिया विभाव्य च तदुक्तार्थं समस्तं हृदि।
शब्दे मानवरे विशिष्टविविधव्युत्पत्तिसम्पादके
गूढार्थप्रतिपत्तये वरधियां कुर्वे प्रबन्धं वरं॥

अथ शब्दो निरूप्यते। अत्रोपजीवक-(पजीव्योपजीवक)भावसङ्गत्योपमाननिरूपणानन्तरं शब्दनिरूपणमिति बहवो वदन्ति।

End : पार्थ एव धनुर्द्धर इत्यादावपि नानुपपत्तिरिति दिक्।
शब्दार्थानामनन्तत्वात् स्वल्पत्वात् संविदो मम।
मया नोक्तं प्रमेयं यद् बोध्य(द्ध)व्यं तत् सुधीवरैः॥१॥
नाना निबन्धानालोक्य विभाव्य च पुनः पुन-
मयात्र लिखितं यद् यत्तेन वा (?) तुष्यन्तु तार्किकाः॥२॥
महाक्ले (क्ले)शतो भावनातश्च सम्यक्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Last three lines of the 3rd and 4th lines of the 4th sloka omitted in the Ms. for which see I.O. 1981.

Colophon: इदं ग्रन्थं (?) गम्पूर्णं ।

सन १२८२ माह श्रावण तां ४।५ । रात्रि १ प्रहरसमय नूतनवाटीते साङ्ग (लेखा)।

विवरणम् : अस्मिन् पुस्तके गङ्गेशोपाध्यायस्य तत्त्वचिन्तामणिमनुसृत्य शब्दप्रमाणं निरूपितम् । तत्र शब्दाप्रामाण्यवादप्रकरणादारभ्य उपसर्गवादान्तमेवकारवादार्थसहितं शाब्दपरिच्छेदस्य सर्वमभिधेयं सुष्ठु विचारितम् । ग्रन्थकृदयं सप्तदशशताब्द्यामाविरासीदिति ज्ञेयं सरस्वतीभवनप्रकाशित-प्रत्यक्षपरिच्छेदात्मक-ग्रन्थभूमिकातः । अत्र नव्यन्यायशैली एव अनुसृता परं नव्यन्यायपारिभाषिकशब्दानाम् अवच्छेदकता-प्रकारतादीनां न तादृशः प्रचारो दृष्ट इति सुबोधोऽयं ग्रन्थो दार्शनिकानामिति ।

889

1230 न्यायप्रकीर्णग्रन्थाः ।

Miscellaneous Nyāya Tracts.

By Unknown author.

Substance: Country-made yellow paper. Size 15–17×3 inches. Folia 21 (by counting). Neatly written in Bengali character. 5-6 lines on a page. Extent 252 ślokas. Appearance old, worn out and new. Prose. Generally correct. Incomplete,both ends.

The Ms. begins and ends abruptly. It contains fragments of (1) Vyāptipañcaka (text), (2) Kevalānvayidīdhiti, (3) Hetvābhāsa-sāmānyanirukti-dīdhiti, (4) Siddhānta-Lakṣaṇa-dīdhiti and some other stray leaves.

Beginning: वृत्तेर्वा साध्यस्याभाववति वृत्तावपि हेतोर्नाव्याप्तिः ।

End: अत्रोच्यते-अतीतानागतधूमादिज्ञानेपि अनुमितिसत्त्वात् न लिङ्गहेतुः ।

विवरणम् : अस्मिन् पुस्तके व्याप्तिपञ्चकमूल-केवलान्वयिदीधिति-हेत्वाभासदीधिति-सिद्धान्तलक्षणादीधित्यादयः आद्यन्तखण्डिता उपलभ्यन्ते । विषयादिगतं विवरणं तु प्रागेवोक्तं तत्रैव द्रष्टव्यम् ।

96

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

890

605 न्यायप्रकीर्णग्रन्थाः ।

Miscellaneous Nyāya Tracts.

By Gadādhara Bhaṭṭācārya.

Substance : Country-made yellow paper. Size $18\frac{1}{2} \times 3\frac{1}{2}$ inches. Folia 27 (by counting). Neatly written in Bengali character. 7 lines on a page. Extent 1170 ślokas. Appearance bad, torn and rotten. Prose. Generally correct. Incomplete, both ends.

The Ms. contains Gadādhara's commentaries on Dīdhiti on sections of TC. Hetvābhāsa-savyabhicāra and some other stray leaves. The Ms. begins and ends abruptly.

Beginning : निवेशेपि वा धर्म्मितावच्छेदकतात्वेन तस्यानिवेशनीयतया प्रकारतात्वेनानिवेशात् साहचर्यस्य धर्म्मितावच्छेदकतान्तःपातिधूमादिविषयतामादायातिप्रसङ्गाभावात् ।

End : निष्कृष्टं दर्शयति—तथा च इत्यादिना । यद्धर्म इति यत्पदं साध्यतावच्छेदकपरं । तत्सम्बन्धावच्छिन्न इति विशेषणताविशे-

विवरणम् : अस्मिन् पुस्तके केचित् न्यायप्रकीर्णग्रन्थाः आद्यन्तखण्डिताः काश्यां मुद्रिताश्च गदाधरकृतदीधितिटीकारूपा हेत्वाभाससव्यभिचारादीनां व्याख्यानानि च विद्यन्ते । विषयादिविवरणं तु प्रागेवोक्तं तत्रैव द्रष्टव्यमिति ।

891

603 न्यायप्रकीर्णग्रन्थाः ।

Miscellaneous Nyāya Tracts.

By Unknown author.

Substance: Country-made yellow paper. Size 18×3 inches. Folia 24 (by counting). Neatly written in Bengali character. 8 lines in a page. Extent 960 ślokas. Appearance bad and torn. Prose. Incorrect. Incomplete.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

The Ms. contains stray leaves of Pūrvapakṣa-Māthurīṭīkā, Kevalānvayī Jāgadīśīṭīkā and Apūrvavāda text of TC., very often noticed and printed, B.I. Calcutta and Chss., Benaras. The Ms. begins and ends abruptly.

Beginning : पर्वतीयवह्नयतिरिक्तवह्नयभाववान् पर्वत इति बाधसहकारेण पर्वतः पर्वतीयवह्निमानिति नानुमितिः ।

End : अभिप्रायविधिपक्षे बलवदनिष्टाननुबन्धित्वसा(मा)नुमानिकं इति साधनतापक्षे तु तदपि शक्यमिति गौरवमिति ।

विवरणम् : अस्मिन् पुस्तके न्यायशास्त्रस्य ग्रन्थाः पूर्वपक्षमाथुरीटीका, केवलान्वयि-जागदीशीटीका, अपूर्ववादमूलं च उपलभ्यन्ते एते ग्रन्थाश्चाद्यन्तखण्डिताः कलिकातायां काश्यां च मुद्रिता विषयादिविवरणं तु प्रागेवोक्तं तत्रैव द्रष्टव्यमिति ।

892

606 न्यायप्रकीर्णग्रन्थाः ।

Miscellaneous Nyāya Tracts.

By Mathurānātha Tarkavāgīśa.

Substance : Country-made yellow paper. Size $18 \times 3\frac{1}{2}$ inches. Folia 11 (by counting). Neatly written in Bengali character. 8 lines on a page. Extent 440 ślokas. Appearance tolerable. Prose. Generally correct. Incomplete both ends.

The Ms. contains Mathurānātha's commentaries on Vyāptipañcaka, Vyadhikaraṇa section of TC. pt. II, very often noticed and printed, Bib. Ind. Calcutta. The Ms. begins and ends abruptly.

Beginning : द्रव्यत्वाभावाभावरूपाभावस्य चाधिकरणभेदेन भेदाभावात् । ननु तथापि घटाकाशसंयोगघटत्वान्यतराभाववान् गगनत्वादित्यत्र घटानधिकरणदेशावच्छेदेन घटाकाशसंयोगाभावस्य गगने सत्त्वात् सद्धेतुतयाऽव्याप्तिः ।

Substance : Country-made yellow paper. Size $17\frac{1}{2} \times 3\frac{1}{2}$ inches. Folia 43 (1b-45b). Neatly written in Bengali character. 6-8 lines in a page. Extent about 2,025 ślokas. Appearance old, torn and worn out. Prose. Generally correct. Complete. Date Śak 1743. Printed.

Beginning : ॐ नमः शिवाय । मूले व्याप्तिपक्षधर्मतयोः सङ्गत्यप्रदर्शनन्यूनतां परिजिहीर्षुस्तयोरेककार्यकारित्वरूपसङ्गतिं दर्शयन् व्याप्त्यनन्तरमित्यादिमूलमवतारयति अनुमितीति ।

End : अत्र केचित् पक्षताया अनुमित्यहेतुत्वमते विनापि वह्नयादिलिङ्गकवह्नयाद्यनु-मित्सां तादृशानुमित्युत्पत्त्या तादृशानुमितौ तादृशानुमित्साविरहविशिष्टप्रत्यक्षादिसामग्र्य-भावस्य कारणताधिक्यात् गौरवं, पक्षताहेतुत्वमते तादृशानुमितेरिच्छानियततया तत्रेच्छाया लघीयस्याहेतुतयैवोपपत्तेः पक्षतापि तत्रेच्छा एवेत्याहुः ।

Colophon : इति श्रीलश्रीगदाधरभट्टाचार्यविरचिता पक्षताटिप्पनी संपूर्णा ।

विवरणम् : पक्षता-मूलोपरिदीधित्यभिधायाष्टीकाया वाख्यानात्मकोऽयं ग्रन्थो-विरचितोगदाधरभट्टाचार्येण । अत्र प्राचीनैस्तावदनुमितेः प्राक् साध्यसन्देहोनियमेन वर्तत

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्यभिप्रायेण सन्दिग्धसाध्यधर्मत्वमेव पक्षत्वमित्युक्तम्। अत्रोहापोहादिकमपि समधिकं नावीन्यमावहति। वर्तते चात्र पक्षतायां सूक्ष्मविचारमुखेन मिश्रमतोपवर्णनं तन्मतेऽस्वरसप्रदर्शनञ्च। सार्वभौमसम्मतपक्षतालक्षणस्य निराकरणरीतयोऽपि नूनं नैयायिकानां मानसोल्लासविधायिन्यः। अत्र सर्वत्रैव युक्तयस्तावन्नवीकृत्योद्भाविताः। ग्रन्थोऽयमत्युत्कृष्ट इत्यत्रास्त्येव नैयायिकानामविवादः। अयं खलु जीर्णः प्राचीनश्च। मुद्रितोऽयमनेकत्र।

932

502 पक्षता-गादाधरी-टीका।

Pakṣatā-Gādādharī-ṭīkā.

By Gadādhara Bhaṭṭācārya.

Substance: Country-made yellow paper. Size $18\frac{1}{4} \times 3\frac{1}{4}$ inches. Folia 9 (1b-9a). Neatly written in Bengali character. 7 lines in a page. Extent about ślokas. Appearance fresh. Prose. Generally correct. Incomplete at the end. Date n.d. Printed.

There is a square blank space in the middle of each page.

Beginning: श्रीहरिः। मूले व्याप्तिपक्षधर्मतयोः सङ्गत्यप्रदर्शनेन न्यूनतां परिजिहीर्षुस्तयोरेककार्यकारित्वरूपसङ्गतिं प्रदर्शयन् व्याप्त्यनन्तरमित्यादिमूलमवतारयति अनुमितीति।

End: साध्यविशिष्टपक्षविषयकत्वनिवेशप्रयोजनं दर्शयति यत्किञ्चिदिति (।) किञ्चिद्विषयकत्वप्रकारकं निवेश्यापि यत्किञ्चिज्ज्ञानं जायतामित्यादीच्छावारणं सम्भवतीति यत्किञ्चिद्गोचरत्वप्रकारकेच्छानुधावनं(।) नचेच्छापूर्वं यत्किञ्चिद्गोचरज्ञानस्यावश्यकत्वात् तादृशेच्छा एव न सम्भवति घ्राणगोचरेच्छायां··· [९(क) पृः]

विवरणम्: पक्षतासिद्धान्तलक्षणघटकीभूतायाः सिषाधयिषाया व्याख्यानपरोऽयं ग्रन्थः। अस्य कतिपयपत्रपार्श्वभागाष्टिप्पनीपरिशोभिता वर्तन्ते। नायं खलु प्राचीनः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

933

545 पक्षता-गादाधरीवादार्थः ।

Pakṣatā-Gādādharīvādārthaḥ.

By Unknown author.

Substance: Country-made reddish paper. Size $19\frac{3}{4} \times 3\frac{3}{4}$ inches. Folio 1. Neatly written in Bengali character. 11-13 lines in a page. Extent about 72 ślokas. Appearance fresh. Prose. Generally correct. Incomplete at the beginning. Date n.d. Not printed.

Beginning: कताकान्यत्वमेव प्रतिवन्धकतायां विशेषणं देयं वह्निघटवत्पर्वत-कालीनः पर्वतोवह्निमानित्यादौ—घटविशिष्टवह्निमान्नवेतिसंशयीय प्रतिवन्धकतायाः साध्यता-वच्छेदकवह्नित्वातिरिक्तघटत्वावच्छेद्यत्वावच्छिन्नप्रकारतानिष्ठावच्छेदकताकान्यत्वविरहेण तादृश-संशयस्य न पक्षतात्वं ।

End: तथापि वह्निव्याप्यसाध्यकस्थले वह्निव्याप्यवह्निमान् वह्निसामान्याभाववान् वा पक्ष इति संशयस्य पक्षतात्वापत्तेर्दुर्वारत्वात् ॥

विवरणम्: पक्षता-गादाधर्याष्टीकाया उपरि वादार्थात्मिकेयं पुस्तिका । अत्रैकपत्र-मात्रमवतिष्ठते । अत्रत्यस्य प्रथमवादार्थस्य शेषभागे "इतिन्यायालङ्कारभट्टाचार्यैकपरिशीलिता-पदवी" इतिलिखितमस्ति, तेनैव निश्चीयते न्यायालङ्कारभट्टाचार्योपाधिकः कश्चिन्नैयायिकोऽस्य-रचयितेति । अत्रत्ये विचारे किञ्चिन्नावीन्यमुपलभ्यते । अमुद्रितेयम् ।

934

391 पक्षता-जागदीशी-टीका ।

Pakṣatā Jāgadīśī-ṭikā.

By Jagadīśa Tarkālaṁkāra.

Substance: Country-made yellow paper. Size $18\frac{1}{4} \times 3\frac{1}{2}$ inches. Folia 14 (1a-14b). Neatly written in Bengali character. 6-7 lines in

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

a page. Extent about 448 ślokas. Appearance old. Prose. Generally correct. Inomplete at the end. Date n.d. Printed.

A commentary on the Pakṣatādīdhiti of Rāgunātha by Jagadīśa.

Beginning: ॐ नमः शिवाय। अनुमितिलक्षणेति अनुमितिस्वरूपकार्येत्यर्थः। व्याप्तिज्ञानजन्याया अनुमितेः किमन्यत्कारणमितिजिज्ञासयैव पक्षतानिरूपणादितिभावः।

End: एवं पक्षतावच्छेदकसामानाधिकरण्यमात्रेण सिद्ध्युत्तरं तदवच्छेदेनानुमित्सायामपि तत् तत् सामानाधिकरण्येनानुमित्यनुत्पत्तेः तादृशानुमितौ पक्षतावच्छेदकसामानाधिकरण्यमात्रेणैवानुमित्सैव उत्तेजिका।

विवरणम्: तत्त्वचिन्तामणयुक्तपक्षताया दीधित्याख्यां व्याख्यामुपजीव्य जगदीशतर्कालङ्कारेण विरचितोऽयं टीकापरोग्रन्थः। अत्र साध्यसंशयत्वं पक्षतात्वमिति प्राचीनसम्मतपक्षतालक्षणस्य सूक्ष्मविचारोवर्तते प्रसङ्गतोऽत्र पक्षतायां मिश्रमतोपवर्णनं सार्वभौममतनिरसनं प्राभाकरमतोपरिदोषोद्भावनञ्च वर्तन्ते।

For the description of contents see cat. no. 277 (part II).

935

1444 पक्षता-जागदीशीटीका।

Pakṣatā-jāgadīsīṭikā.

By Jagadīśa Tarkālaṁkāra.

Substance: Country-made yellow paper. Size $16\frac{1}{2} \times 4\frac{1}{2}$ inches. Folia 32 (3a-34b). Neatly written in Bengali character. 8 lines in a page. Extent 1,144 ślokas. This is another copy of our previous Ms. No. 979 already noticed. Appearance old, torn, worm eaten and worn out. Prose. Generally correct. Incomplete at the end. Condition very bad. Date not mentioned. Available in print.

There is a square blank space in the middle of each page

Beginning: [३ (क) पृः] मवच्छेद्यत्वादिति वाच्यं इष्टत्वात् ह्रदोवह्न्यभाववान् नवेत्याकारकसंशयस्यैव तत्र पक्षतात्वात् साध्यपक्षभेदेन पक्षताया नानात्वात्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

End : प्रगल्भमतं निरस्यति करणेत्यादिना(।) ननु पत्तताविशिष्टपरामर्शत्वेनेव परामर्श-विशिष्टपत्ततात्वेपि विनिगमकाभावेन हेतुत्वापत्त्या द्वयोरेवलाघवात् स्वातन्त्र्येण......
[३४ (ख) पृः]

विवरणम् : संशयपत्तता-दीधितेरन्तिमांशादारभ्य प्रगल्भमतनिरसनप्रारम्भपरस्य तदीयग्रन्थस्य व्याख्यानमात्रमत्रावतिष्ठते। निबन्धोऽयं प्राचीनतां, छिन्नतां, कीटदष्टतां, जीर्णताञ्च समुपागतः। पत्रपार्श्वभागाः सलिलसम्पर्कजचिह्नसम्पृक्ताः। प्रायः प्रतिपत्रमेव मसीलोपोपक्रमः संवृत्तः। पञ्चमपत्रमस्य छिन्नत्वाज्जलसमाश्लेषजचिह्नैर्नैवास्पष्टात्तरत्वाच्च प्रायेनैवापाठ्यतामुपागतम्।

For the description of contents see cat no. 277.

936

946 पक्षता-जागदीशीटीका।

Pakṣatā-jāgadīśīṭīkā.

By Jagadīśa Tarkālaṁkāra.

Substance : Country-made yellow paper. Size $17\frac{1}{3} \times 3\frac{1}{2}$ inches. Folia (by counting). Neatly written in Bengali character. 7-10 lines in a page. Extent about 1,080 ślokas. This is the same as our cat. no. 277. Notes on the margin. Appearance old and worn out. Prose. Generally correct. Complete. Date n.d. Published.

There is a square blank space in the middle of each page.

Beginning : श्रीरामः। अनुमितिस्वरूपैककार्यैत्यर्थः।

End : ॰भिन्नविषयकप्रत्यत्तादिकं प्रति तादृशप्रत्यत्तादिगोचरतत्तद्बुभुत्साविशिष्ट-परामर्शत्वेन विरोधित्वमपेद्य निरुक्तपत्तताविशिष्टपरामर्शत्वपर्यवसितेनानुमितिसामग्रीत्वेन विरोधित्वकल्पनायामेव विपरीतगौरवादित्यास्तां विस्तरः।

Colophon : इति पत्तताटिप्पनी संपूर्णा॥

विवरणम् : ग्रन्थोऽयं पराचीनो जीर्णश्च संवृत्तः। अस्य लिपिस्तावद् व्यक्तिद्वयेन

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निर्मिता। क्वचित् क्वचिदपक्षियमाणा मसी समुपलभ्यते। पत्राणामवत्यानां प्रायः सर्वेषामेव पार्श्वभागाः सलिलसमासङ्गजचिह्नसम्पृक्ता वर्तन्ते।

937

345 पक्षता-जागदीशी-टीका।

Pakṣatā Jāgadīśi ṭikā.

By Jagadīśa Tarkālaṁkāra.

Substance: Country-made yellow and reddish paper. Size $19\frac{1}{2} \times 3\frac{1}{3}$ inches. Folia 41 (1a-41b). Neatly written in Bengali character. 7-8 lines on a page. Extent about 1,590 ślokas. Appearance old. Prose. Generally correct. Complete. Date n. d. Printed.

There is a square blank space in the middle of each page.

This is another copy of our cat. no. 277.

Beginning: ॐ नम(?) गणेशाय। अनुमितिलक्षणेति अनुमितिस्वरूपैककार्येत्यर्थः।

End: नवानुमितौ इच्छाविरहविशिष्टायाः प्रतिबन्धकत्वं श्रापत्तौ तु केवलमिष्टापत्तिरेव कथमुभयं प्रति एकरूपेण प्रतिबन्धकत्वं वाच्यं। व्याप्यत्वांशेऽप्रामाण्यग्रहाभावविशिष्ट इच्छाविरहविशिष्टत्वमिति॥

Colophon: इति पक्षतारहस्यं समाप्तम्।

Post Colophon: श्रीश्रीदुर्गा। श्रीश्रीहरिः। श्रीश्रीरामः। श्रीश्रीकृष्णः।

विवरणम्: पीतेषद्रक्तपत्रान्वितस्यास्य निबन्धस्य पत्राणि प्रायेणैव विषमाण्यवतिष्ठन्ते; क्वचित् क्वचित् पत्रपार्श्वे टिप्पन्योपि वर्तन्ते। प्राचीनोऽयम्।

938

410 पक्षता-जागदीशी टीका।

Pakṣatā Jāgadīśi ṭikā.

By Jagadīśa Tarkālaṁkāra.

Substance: Country-made yellow paper. Size $19\frac{1}{4} \times 3\frac{1}{2}$ inches. Folia 28 (by counting). Neately written in Bengali character. 8-10

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

lines in a page. Extent about 1,248 ślokas. Appearance very bad. Prose. Incorrect. Complete. Date n.d. Printed.

There is a square blank space in the middle of each page.

Beginning : ॐ नमो गणेशाय । अनुमितिलक्षणेति अनुमितिरूपकार्येत्यर्थः (।) व्याप्तिज्ञानजन्याया अनुमितेः किमन्यत्कारणं इति जिज्ञासयैव पक्षतानिरूपणादितिभावः (।)

End : भिन्नविषयप्रत्यक्षादिकं (?) प्रति तादृश प्रत्यक्षादिगोचरतत्तद्बुभुत्साविशिष्ट-परामर्शत्वेन विरोधित्वमपेक्ष्य निरुक्तपक्षताविशिष्टपरामर्श पर्यवसितेनानुमितिसामग्रीत्वेन विरोधित्वकल्पनायामेव विपरीत गौरवादित्यपास्तं (?) विस्तरः ॥

Colophon : श्रीमहामहोपाध्याय श्रीलजगदीशतर्कालङ्कारभट्टचार्य विरचितानुमान-रहस्ये पक्षताटीप्पनी संपूर्णा ॥

Post Colophon : श्रीशिवरामः शरणं ॥ गिरः कमलकोमलाः कुलिशकर्कसं मानसं पुरः प्रणयनर्त्तनं वह्विवह्वि...(?) प्रकोपक्रम(!)अवस्थितिविलास्थवत् (?) विषमदूषणा-न्वेषणं खलस्य...कथय कोवगन्तुंक्षमः ।

विवरणम् : द्वितीयचिन्तामण्यन्तर्गतपक्षताप्रकरणस्य दीधितिमुपजीव्य रचितोऽयं टीकापरोनिबन्धः । रचयिता खल्वस्य श्रीजगदीशभट्टाचार्यः । पक्षता नामानुमितौ कारणम् । सा च साध्यसंशयरूपेति प्राचीनाः । केचिच्चानुमित्सात्मिकैव सेति विवक्षन्ति । इच्छापक्षतावादिनोऽपि केचनासन् । नव्यास्तावदुक्तवादिमतानां हेयत्वं प्रदर्श्य सिषाधयिषा-विरहविशिष्टसिद्ध्यभावरूपैव पक्षतेति सिद्धान्तयन्ति । अत्र पक्षताविषयिका सूक्ष्मा सुविशदा समालोचना वर्तते । विद्येते च पक्षतायां मिश्रमतोपवर्णनम्, सार्वभौम-मतखण्डनञ्च । अस्योत्सङ्गे पक्षतादीधित्युट्टङ्कितं पत्रमेकमवतिष्ठते । केषुचिदेतदीयपत्रेषु मसीलोपोपक्रमः संवृत्तः । अस्य केचित् पत्रपार्श्वभागाष्टिप्पनीसंशोभिताः परिदृश्यन्ते । अन्तिमपत्रे विवाहविचारसमाख्यैका टिप्पनी लेखकप्रमादादेव व्युत्क्रमेण लिखिता वर्तते । मुद्रितोऽयमनेकत्र ।

939

947 पक्षता-जागदीशीपत्रिका ।

Pakṣatā-jāgadīśīpatrikā.

By Unknown author.

Substance : Machine-made yellow and reddish paper. Size

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

$18\frac{3}{4} \times 4$ inches. Folia 33 (by counting). Neatly written in Bengali character. 5-15 lines in a page. Extent about 990 ślokas. Appearance old, torn and worn out. Prose. Generally not correct. Date n. d.

विवरणम् : पक्षता-जागदीश्याष्टीकाया उपरि विनिर्मितः पत्रिकापरोऽयं ग्रन्थः। अत्रोक्तटीकायाउपर्यनेकजनविनिर्मितपत्रिकान्वितानि कानि चित् प्रकीर्णपत्राण्यवतिष्ठन्ते केवलम्। पत्रप्रान्तेषु सर्वत्र पत्राङ्का अपि न वर्त्तन्ते। क्वचित् क्वचिन्मसीलोपोपक्रमः सञ्जातः। प्राचीनत्वाज्जीर्णत्वच्छिन्नत्वे समुपागतानि पत्राणि। मध्येऽस्य हेत्वाभासीयपत्रद्वयमप्यास्ते। बहुजनैरस्य लिपयोविनिर्मिताः ॥

940

1003 पक्षता-जागदीशीपत्रिका।

Pakṣatā-jāgadīśīpatrikā.

By Umācaraṇa Śarmā.

Substance: Country-made yellow paper. Size $20 \times 3\frac{3}{4}$ inches. Folia 9 (by counting). Neatly written in Bengali character. 4-10 lines in a page. Extent about 437 ślokas. Appearance old, torn and worn out. Prose. Generally correct. Complete. Date n.d. Unpublished.

Beginning : ननु सिद्धिगोचरेच्छामात्रस्य सिषाधयिषात्वे द्रव्यत्वेन द्रव्यज्ञानं जायतामितीच्छायामपि सिद्ध्यात्मकपरामर्शाद् वह्न्यनुमितिः स्यादिति जगदीशः। अत्रेयमाशङ्का द्रव्यज्ञानं जायतामितीच्छायाः पूर्वं द्रव्यज्ञानं मदिष्टसाधनं इतिज्ञानस्यावश्यकत्वेन तस्य द्रव्यज्ञानत्वेन विरोधितया तादृशेच्छैव न सम्भवति अतो द्रव्यत्वेन इत्युक्तं द्रव्यत्वनिष्ठसमवायसम्बन्धावच्छिन्नावच्छेदताकज्ञानं जायतामिति समुदितार्थः।

End : एवञ्च यत्र क्रमेण सिद्ध्यात्मकपरामर्शानुमितिस्तत्र परामर्शोत्पत्तिक्षणे योग्यताविरहोपपादनाय निरुक्तव्यापकाभावप्रतियोगित्वमपि स्वप्रागभावविरहवैशिष्ट्यावच्छिन्नं ग्राह्यं व्याप्यत्वञ्चानुमित्साकालीनत्वानुमित्साविषयीभूतसिद्धिप्रागभावत्वोभयधर्मरूपेण बोध्यते वह्न्य-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नुमितित्वप्रकारेणातीतानुमितिगोचरेच्छया सिद्ध्यात्मकपरामर्शत्वे अनुमित्यापत्तिरिति सुधिभिर्ध्येयमशेष्यं ॥

विवरणम् : अनुमानचिन्तामणयन्तर्गतपक्षताप्रकरणीय-जागदीश्याष्टीकाया उपरि पत्रिकात्मकं निबन्धमिमं रचयाञ्चकार श्रीउमाचरणशर्मा। यद्यपि कथितटीकाया मध्यतः "सिद्धिगोचरेच्छामात्रस्य सिषाधयिषात्वे" इत्यादि कतिपयस्थलानि सम्यगाहृत्य तेषामुपरि पत्रिकात्वेन विनिर्मितोऽयं निबन्धः। तथाप्ययमसम्पूर्ण इति वक्तुं न शक्यते तदादिग्रन्थस्यैव निबन्धकृदभिप्रेतत्वेन सम्भाव्यत्वात्। प्राचीनोऽयं छिन्नतां जीर्णताञ्च समुपागतः। इयमन्तरा ४-६ त्रीणि पत्राणि न विद्यन्ते। प्रायः सर्वत्रैवास्य मसीलेपोपक्रमः संवृत्तः। पत्राणि च प्रायेणैव विषमाणि वर्तन्ते। मुद्रणमस्य न जातम्।

941

760 पक्षता जागदीशीपत्रिका।

Pakṣatā-Jāgadīśīpatrikā.

By Unknown author.

Substance: Country-made yellow paper. Size 17 × 4 inches. Folia 1-10. Neatly written in Bengali character. 13 lines in a page. Extent 780 ślokas. Appearance old and worn out. Prose. Generally correct. Complete. Date, Śk. 1754.

The Ms. contains a patrika on Jagadiśa's commentary of Pakṣatā, rarely noticed and not printed.

Beginning: यादृश यादृश इच्छा सत्वे सिद्धौ सत्यामनुमितिः तत्तदिच्छाभावसमुदायस्य विशेषणत्वादिच्छायामननुगमेपि न क्षतिरिति शिरोमणिः।

End: निरुक्तोत्पत्त्यपेक्षया गुरुत्वादेतदभिप्रायेणैव क्षणत्वस्यातिरिक्तत्वं ग्रन्थकृतैवोक्तमिति भावः।

Colophon : इति पक्षताया जगदीशस्य पत्रिका समाप्ता।

Post colophon : श्रीभगवान् चन्द्र शर्मणः स्वाक्षरं पुस्तकञ्च। सौराषाढस्य द्वितीयदिवसे गुरुवासरे पुस्तिकेयं समाप्ता शकाब्दाः १७५४।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विवरणम् : अस्मिन् पुस्तके पक्षताजागदीश्या उपरि काचित् पत्रिका अयाप्यमुद्रिता दृश्यते । विषयादिगतं विवरणं प्रागेवोक्तं । तत्रैव द्रष्टव्यम् ।

942

772 पक्षता-जागदीशी-माथुरी-पत्रिका ।

Pakṣatā Jāgadīśī Māthurī patrika.

By Unknown author.

Substance : Country-made yellow paper. Size 15 × 3¼ inches. Folio 1. Neatly written in Bengali character. 8 lines in a page. Extent about 30 ślokas. Appearance fair. Prose. Generally correct. Incomplete both at the beginning and at the end.

The Ms. begins and ends abruptly. It contains a merely of पत्रिका's on Jāgadīśa's commentary and Mathurānātha's commentary of Pakṣatā TC. pt. II, It is not printed in the "क्रोड़पत्रसंग्रह" (ctss.).

Beginning : साध्यवत्त्वानिश्चयप्रतिवध्यत्वे सति तादृश निश्चयनिष्ठप्रकारतानिरूपित प्रतिबन्धकतावच्छेदकीभूत विषयिताशून्यत्वं पक्षत्वमिति समुदितार्थः ।

Colophon : संशयपक्षता ॥०॥ माथुर्य्युपरि ॥

End : वस्तुतस्तु द्वितीयसंसर्गविधया निविष्ध्याऽवच्छेदकतायां तद्विशेषणं तादृशाभावप्रतियोगितावच्छेदकताय(ा)मिति ध्येयं ।

विवरणम् : अस्मिन् पुस्तके पक्षताजागदीश्यास्तथा पक्षतामाथुर्या उपरि आद्यन्त खण्डिता पत्रिका उपलभ्यते । एषा तु न वाराणस्यां क्रोड़पत्रसंग्रहे मुद्रिता । विषयादिकं प्रागेवोक्तं, तत्रैव द्रष्टव्यम् ।

943

1355 पक्षता-जागदीशी-पत्रिका ।

Pakṣatā Jāgadīśi patrikā.

By Unknown author.

Substance : Country-made white paper. Size 15¾ × 3¼ inches. Folia 1a-11b. Neatly written in Bengali character. 11 lines in a

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

page. Extent about 660 ślokas. Appearance old but fair. Prose. Generally correct. Complete.

The Ms. contains a dissertation by an unknown author on Jagadīśa's commentary of Pakṣatā, rarely noticed and not printed.

Beginning : अथ पक्षविषयतावहिर्भूतत्वं पक्षतावच्छेदकावच्छिन्नविशेष्यत्वावच्छिन्न-भेदप्रतियोगितानवच्छेदकत्वं, अवच्छेदकत्वन्तु अवच्छेदकतावच्छेदक साधारणनिरूपकता-सम्बन्धावच्छिन्नं ग्राह्यं ।

End: यद्यपि स्वाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकसिद्धिभिन्नसिद्ध्यभाव एव प्रक्रान्तत्वादुपादातुमुचितो गौरवस्य वक्ष्यमाण लक्षणेऽप्यविशिष्टत्वात् इति जागदीश्युक्तिर्ण संगच्छते, तत्र उत्पत्तिघटितत्वादेवाभावगौरवात् इति ध्येयं ।

विवरणम् : अस्मिन् पुस्तके जगदीशकृतपक्षताटीकाया उपरि अज्ञातनामा काचित् पत्रिका अद्याप्यमुद्रिता दृश्यते । विषयादिविवरणं तु प्रागेवोक्तं तत्रैव द्रष्टव्यम् ।

944

629 पक्षता जागदीशी पत्रिका ।

Pakṣatā-Jāgadīśī patrikā.

By Unknown author.

Substance : Country-made yellow paper. Size $18\frac{1}{4} \times 3\frac{1}{4}$ inches. Folia $26+7=33$ (by counting). Neatly written in Bengali character. 9 lines in a page. Extent 1860 ślokas. Appearance fair. Prose. Generally correct. Complete.

The Ms. contains a dissertation on Jagadiśa's commentary of Pakṣatā, not noticed and printed in the kroḍapatra - saṁgraha, chss., Benaras. It also contains some other story haves on various Nyāya topices.

Beginning : साधकपदस्य भावव्युत्पत्त्या सिद्धिपरत्वं मानपदस्यानुमितिभिन्न-सिद्धिजनकप्रमाणपरत्वं स्वीकृत्य सिद्धित्वेनानुमितिभिन्नसिद्धिजनकान्यतरत्वधर्म्मितावच्छेदकी-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कृ य सिषाधयिषाविरहविशिष्टं यत् सिद्धितादृशसिद्धिजनकान्यतरत् तदभावत्वेनानुमितिम्प्रति एककारणत्वं ।

End : प्रागुक्तोत्पत्तिनिवेशे क्षणत्वस्यातिरिक्तत्वमते क्षणत्वनिवेशसत्त्वेपि लाघवाच्च स्वाधिकरणसमयध्वंसानधिकरणसमयसम्बन्धरूपोत्पत्त्वेर्निरुक्त उत्पत्त्यपेक्षया गुरुत्वाच्चैतदभिप्रायेणैव क्षणत्वस्यातिरिक्तत्वं ग्रन्थकृतैवोक्तमितिध्येयं ।

Colophon : पक्षता सम्पूर्णा ।

945

2592 पक्षता-जागदीशी-पत्रिका ।

Pakṣatā Jāgadīśī patrikā.

By Unknown author.

Substance : Country-made yellow paper. Size $18\frac{3}{4} \times 3\frac{3}{4}$ inches. Folia 8 (by counting). Neatly written in Bengali character. 10 lines in a page. Extent about 600 ślokas. Appearance old. Prose. Generally correct. Incomplete.

The Ms. contains one folio Pakṣatā Māthurī patrikā and nine folia of Pakṣata-Jāgadīśī-patrikā. The pagination and the arrangement of folia are faulty and fols. marked 4-6 are missing. The last page contains māthurī patrikā on Pakṣatā. There are not noticed in any other catalogue of Mss. nor are they printed in the Kroḍapatra saṁgraha chss.

Beginning: ननु सिद्धिगोचरेच्छामात्रस्य सिषाधयिषात्वे द्रव्यत्वेन द्रव्यज्ञानं जायतामितीच्छायामपि सिद्धयात्मकपरामर्शाद्वह्न्यनुमितिः स्यादिति जगदीशः । अत्रेयमाशङ्का ।

End: केचित्तु यत्रादौ अनुमितिर्जायतामितीच्छा ततः चक्षुसंयुक्तपर्वतव्यक्तौ वह्निव्याप्यधूमवत्तानिश्चयस्तत्रानुमितिक्षणे इच्छाविरहविशिष्टलौकिकप्रत्यक्षसामग्रीसत्त्वेनानुमितिस्तत्र सामग्रीप्रतिबन्धकत्वापेक्षया सिद्धेः प्रतिबन्धकतायामतीव लाघवादिति प्राहुरित्यवधेयम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विवरणम् : अस्मिन् पुस्तके पक्षताजागदीश्यामाथुर्य्योपरि पत्रिका अद्याप्यमुद्रिता विद्यते। पत्रपार्श्वे च "उमाचरणशर्मणापि कृता" इति लिखितमस्ति। विषयादि-विवरणं प्रागेवोक्तं तत्रैव द्रष्टव्यम्।

946

414 पक्षता टीका।

Pakṣatā-ṭīkā.

By Kaṇāda Tarkavāgīśa.

Substance : Country-made yellow paper. Size $18\frac{1}{4} \times 3\frac{1}{4}$ inches. Folia 4 (1a-4a). Neatly written in Bengali character. 8-11 lines in a page. Extent about 240 ślokas. Appearance old. Prose. Incorrect. Complete. Date n.d. Unpublished.

There is a square blank space in the middle of each page.

Beginning : ॐ नमो गणेशाय। व्याप्तीति। व्याप्त्यनन्तरं व्याप्तिनिरूपणा-नन्तरं(।) पक्षधर्मता-पक्षे धर्मता यस्याः लक्ष...(?)रूपो यो धर्मस्तस्य भावः इति व्युत्पत्त्या वा पक्षता निरूप्यत इत्यर्थः। अतः पक्षतानिरूपणेनार्थान्तरं अनुमितिरूप एककार्यकारित्व संगत्या पक्षता(?)निरूपयितुं शिष्यावधानाय प्रतिजानिते (?) ज्ञापनं ज्ञानानुकूलव्यापारः शब्दप्रयोगरूपः। अत्र व्याप्तिपदे व्याप्तिनिरूपणे लक्षणा(।) अनन्तरपदस्य च ध्वंसादि.. (।) करणकालवृत्तिरर्थः (।) तदेकदेशे च ध्वंसे व्याप्तिपदार्थस्य व्याप्तिनिरूपणस्य प्रतियोगितया-न्वयः। आख्यातार्थोविषयत्वं विषयता च व्यापारुबन्धिना (?) अतः शब्दस्य निर्विषय-त्वेपि न क्षतिः (।) तथाच व्याप्तिनिरूपणाध्वंसादि···(?)करणकालवृत्तिनिरूणविषयः पक्षता इत्यन्वयबोधः।

End : समाधत्ते तथापीति(।) पक्षमेदेति(।) पक्षपदोपस्थापकपर्वतादिपदप्रवृत्तिनिमित्तं पर्वतत्वादिकं अनिवेश्य पक्षताया हेतुत्वमितिशेषः। अयमाशयः समवायेन अनुमितिं प्रति समवायेन सिद्धेर्न प्रतिबन्धकत्वं। येनोक्तदोषः स्यात् अपि तु वह्नित्वावच्छिन्नविधेयतानिरूपित-विशेष्यतावच्छेदकतया अनुमितिं प्रति वह्न्यभावत्वावच्छिन्नप्रकारतानिरूपितवह्नित्वावच्छिन्न-प्रकारतानिरूपितविशेष्यतावच्छेदकतया ज्ञानं प्रतिबन्धकत्वं (?)। उक्तसम्बन्धेन च ज्ञानं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नाव्यप्यव्रत्तीति नोक्तदोष इति ब्रूमः। पक्षताहेतुत्वव्यवस्थापनन्तु अस्माकं तर्कवादार्थमञ्जर्यामनुसन्धेयं(?)

Colophon : इति समाप्तोऽयं ग्रन्थः।

विवरणम् : अनुमानचिन्तामरयन्तर्गतपक्षताप्रकरणस्य टीकात्मकोऽयं निबन्धः। अस्य खलु विनिर्माता कणादतर्कवागीशः। व्याख्यानमेतदीयमत्यन्तसंक्षिप्तमपि न बोधसौकर्यं प्रतिबध्नाति। निबन्धस्यास्य प्रारम्भेऽन्ते च रचयितुर्नाम नोपलभ्यते। किन्तु "पक्षताहेतुत्वव्यवस्थापनन्तु अस्माकं तर्कवादार्थमञ्जर्यामनुसन्धेय"मिति निबन्धावसानीयलिखनस्वरसादेव तर्कवादार्थमञ्जरीरचयितैवास्य रचयितेत्यवगम्यते। तर्कवादार्थमञ्जरी खलु कणादतर्कवागीशेन रचितेत्यस्त्यध्यापकपरम्परागता जनश्रुतिर्बलीयसी। प्राचीनोऽयम्। प्रथम पत्रस्य (ख) पृष्ठायां मसीलोपोपक्रमः संवृत्तः। अद्याप्यस्य मुद्रणं न जातम्।

This book is composed by the author of Tarkavādārthamañjarī and that is Kaṇāḍa Tarkavāgīśa. The discussion is lucid. The book is not available in print.

947

1605 पक्षताटीका।

Pakṣatāṭikā.

By Jagadīśa Tarkālaṁkāra.

Substance : Country-made yellow paper. Size 17 × 4 inches. Folia 33 (1a–33b). Neatly written in Bengali character. 5·9 lines in a page. Extent about 1,056 ślokas. Appearance old. Prose. Generally correct. Complete. Condition good.

There is a square blank space in the middle of each page.

This is another copy of our previous cat. no. 934 already noticed. Published.

Beginning : ॐ गणेशाय नमः। अनुमितिलक्षणेति। अनुमितिस्वरूपैककार्येत्यर्थः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

End : व्याप्यत्वांशेऽप्रामाण्यग्रहाभावनिशिष्टेच्छाविरहविशिष्टत्वमिति ॥०॥

ColoPhon : इति पक्षतारहस्यं समाप्तं ॥०॥

विवरणम् : पुस्तकेऽत्र मुद्रितपुस्तकेभ्योवहवः पाठभेदाः समुपलभ्यन्ते। व्यक्ति-द्वितयेनास्य लिपिर्विनिर्मिता। क्वचित् क्वचिन्मसीलोपोपक्रमः संवृत्तः।

948

2527 पक्षताटीका (मयूखः)।

Pakṣatāṭīkā (Mayūkhaḥ).

By Jagadīśa Tarkālamkāra.

Substance : Country-made yellow paper. Size 16½×3 inches. Folia 5. Neatly written in Bengali character. 6-7 lines in a page. Extent 150 ślokas. Appearance old. Prose. Generally correct. Incomplete. Condition good.

A commentary on the Cintāmaṇi (only Pakṣatā) of Gangeśa entitled Mayūkhaḥ by Jagadīśa Tarkālamkāra. The name of the text and the author are not mentioned in the Ms. but manuscript of Madras library Ms. no. D4029, this very text comes under the name of Pakṣatāṭīkā and its authorship is attributed to Jagādīśa Tarkālamkāra. Left hand side of the Ms. is heavily damaged. First page of the Ms. is wanting. This Ms. has been collected from Navadvipa in the yeor 1963. This Ms. described under Ms. no. 2112.

It begins fal. 2a: तथाविधसंशयस्यालक्षत्वात्। यत्तु भिन्नधर्मिकस्यापि संशयस्य प्राचां मते निश्चयप्रतिवध्येत्वापेक्षधर्मिक···निश्चयानिवर्त्यशंसयमात्रस्य विवक्षितत्वान्नतत्ला-व्याप्तिरिति तन्न।

It ends fol. 6b: अतएव यत्पक्षसाध्यकानुमितिसामान्यं प्रति सिद्ध्युत्तरमेव सिषाधयिषोत्तरमेव जायते तत्रानुमितस्यैव वा पक्षता न तु निरुक्तसिद्ध्यभावः तस्य हेतुत्वे गौरवात्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विवरणम् : "सन्दिग्धसाध्यधर्मत्व"मिति चिन्तामणिसंशयपक्षतालक्षणस्य "यद्धर्मिक-साध्यस्य यादृशसम्बन्धेन यः संशयस्तद्धर्मिकायां तादृश-तादृशसम्बन्धेन साध्यानुमितौ स एव पक्षता"इति जगदीशकृतव्याख्या, शिरोमणिकृत "यत्र साध्यस्य यादृशसम्बन्धा-वगाहिनिर्णयनिवर्त्यो यः संशयस्तत्र स तादृशसम्बन्धेन साध्यानुमितौ पक्षता"इति व्याख्यातो भिन्नतया प्रतीयते, एवं मूलस्थ "धर्म" पदं साध्यतावच्छेदकसम्बन्धेन संशयस्य लाभार्थ-मित्युक्तं जगदीशेन। साध्यं पक्षवृत्तिर्नवा इत्यादिसंशयानां पक्षतात्वं दीधितिकारेण स्वीकृतम्। जगदीशमते तु तादृशसंशयानां न पक्षतात्वमपि तु तादृशसंशयस्थले पक्षः साध्यवान्नवेति संशयोत्पत्त्यैव चानुमित्युत्पादः।

This work consists of Jagadīśa Tarkālaṁkāra's commentary (Mayūkha) on Gangeśa's chapter on Pakṣatā differs from Raghunātha in some places and these have bean discussed in the work.

949

1593 पक्षता-दीधितिः।

Pakṣatā-dīdhitiḥ.

By Raghunāthā Śiromaṇi.

Substance : Country-made yellow paper. Size $17\frac{1}{2} \times 3$ inches. Folia 2 (by counting). Neatly written in Bengali character. 4 lines in a page. Extent about 26 ślokas. Appearance old, torn and worn out. Prose. Generally correct. Incomplete at the end. Condition very bad. Date not mentioned.

There is a square blank space in the middle of each page.

Beginning : तत्रानुमितिलक्षणैककार्यानुकूलत्वसङ्गत्या पक्षधर्मतानिरूपयितुमाह व्याप्तीति।

End : यदि च तत्रानुमितिस्तदा सिद्धिसत्त्वे तत्रानुमितेर्वारणाय तल्लिङ्गकानुमि...(?) तदन्यमात्रलिङ्गकानुमितीच्छाऽतिरिक्ता अनुमितीच्छा वाच्या।... [द्वितीयपत्रस्य (ख) पृष्ठाया-श्चतुर्थपङ्क्तिः]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विवरणम् : अनुमानचिन्तामरायन्तःपातिपक्षताप्रकरणस्य टीकापरोऽयं ग्रन्थः। रचयिता खल्वस्य तार्किकशिरोमणीरघुनाथः। अत्र व्याख्यानात्मकस्योक्तग्रन्थस्य प्रथमतः कियदंशमात्रमस्ति। अयं प्राचीनश्छिन्नोजीर्णश्च संवृत्तः। द्वितीयपत्रे पत्राङ्काभावेऽपि प्रथमपत्रेण तस्य सम्यक् सङ्गतिर्विद्यते। मुद्रणमेतदीयं भूरिशः समजनि।

950

868 पक्षता-दीधितिः।

Pakṣatā-dīdhitiḥ.

By Raghunātha Śiromaṇi.

Substance : Machine-made reddish paper. Size $16\frac{1}{2} \times 3$ inches. Folio 1. Neatly written in Bengali Character. 6 lines in a page. Extent about 28 ślokas. Appearance not old. Prose. Generally correct. Incomplete at the end. Date n.d. Printed.

There is a square blank space in the middle of the first page.

Beginning : अनुमितिलक्षणैककार्यानुकूलत्वसङ्गत्या पक्षधर्मतां निरूपयितुमाह व्याप्तीति। सन्दिग्धेति, यत्र साध्यस्य यादृशसम्बन्धावगाहिनिर्णयनिवर्त्यो यः संशयस्तत्र तादृशसम्बन्धेन साध्यानुमिति पक्षतेत्यर्थः।

End : साधकमानं साध्यवत्त्वनिश्चयः। पाषाण...

विवरणम् : तत्त्वचिन्तामरायनुमानखण्डीय पक्षताप्रकरणस्य दीधित्याख्यव्याख्यानपरोऽयं ग्रन्थः। रघुनाथशिरोमणिरस्य रचयिता। पक्षतादीधितेः प्रथमतः कियदंशमात्रमत्र वर्त्तते। मुद्रितोऽयमनेकत्र।

951

1590 पक्षता-पत्रिका।

Pakṣatā-patrikā.

By Unknown author.

Substance: Country-made yellow paper. Size $16\frac{3}{4} \times 4\frac{1}{2}$ inches. Folia 2 (by counting). Neatly written in Bengali character. 10-12

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

lines in a page. Extent about 140 ślokas. Appearance old, torn and worn out. Prose. Generally correct. Complete.. Condition very bad. Date not mentioned. Unpublished.

Beginning : संशयत्वं स्वनिष्ठविषयित्वघटितधर्मावच्छिन्नप्रतिबन्धकतानिरूपित-प्रतिवध्यताशालित्वं ।

End : तथाविधसंशयस्य वारयितुमशक्यत्वात् मन्मते तादृशसंशयास्वीकारादेव न दोषः । पत्रिकेयमालोचितास्माभिः संशयपक्षतायाः ।

विवरणम् : पक्षता-दीधिति-गादाधरीतः स्थलमेकमाहृत्य तस्योपरि विरचितोऽयं पत्रिकात्मकोनिबन्धः केनचनाज्ञातनामधेयेन नैयायिकेन । निबन्धकृतोरचनाशैलीयं स्वल्पामपि मनोरमणीयतामासादयितुं न शक्नोति । प्रतिपत्रादेवापस्रियमाणा मसी समुपलभ्यते । अयं प्राचीनश्छिन्नोजीर्णश्च संवृत्तः । पत्रद्वयमेव पत्राङ्करहितम् । मुद्रणमस्याद्यापि न जातम् ।

952

1623 पक्षता परामर्शचिन्तामणिः ।

Pakṣatā-parāmarśacintāmaṇiḥ.

By Gaṅgeśopādhyāya.

Substance : Country-made yellow paper. Size 14 × 3 inches. Folia 2 (28a-29b). Neatly written in Bengali character. 6 lines in a page. Extent 37 ślokas. Appearance old. Prose. Generally correct Incomplete at the end. Condition bad. Date not mentioned. Published.

There is a square blank space in the middle of each page.

Beginning of the Pakṣatā : [२८ (क) पृः] व्याप्त्यनन्तरं पक्षधर्मता निरूप्यते ।

End of the Pakṣatā : [२८ (ख) पृः] यद्यपि पक्षत्वस्य केवलान्वयित्वात् नास्यामे(?)कत्वं पक्षप्रवृत्तिनिमित्तमुक्तं(?) ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Beginning of the Parāmarśa: [२६ (क) पृः] पक्षधर्मस्य व्याप्तिविशिष्टज्ञानमनुमितिहेतुः ।

End of the Parāmarśa: [२६ (ख) पृः] यथा वा निद्रासहकारेण वाह्यस्वप्नानुभवः तदनन्तरं संशयः स्वप्नानुभवदर्शनात् तथेहापि ज्ञानारोपनीते······

विवरणम् : अनुमानचिन्तामण्यन्तर्गत-पक्षतापरामर्शप्रकरणे अत्रावतिष्ठेते । एतयोः खलु रचयिता गङ्गेशोपाध्यायः । पक्षताप्रकरणमत्र सम्पूर्णमेवास्ते । परामर्शप्रकरणस्य तु प्रारम्भमात्रमस्ति । प्रथमपत्रस्य (२८ पत्रस्य क) पृष्ठायां पक्षतारम्भणात् पूर्वमुपाध्याभासस्यान्तिमांशोवर्तते । अयं प्राचीनः । प्रकाशनमस्य बहुशः समजनिष्ठ ।

953

521 पक्षता-परामर्शचिन्तामणिः ।

Pakṣatā-parāmarśacintāmaṇiḥ.

By Gaṅgeśopādhyāya.

Substance: Country-made yellow paper. Size 13⅓ × 3½ inches. Folia 5. Neatly written in Bengali character. 5-6 lines in a page. Extent about 226 ślokas. Appearance old. Prose. Generally correct. Pakṣatā grantha is complete and Parāmarśa grantha is incomplete at the beginning and at the end. Date n. d. Printed.

Beginning of the Pakṣatā: व्याप्त्यनन्तरं पक्षधर्मतानिरूप्यते । तत्र न तावत् सन्दिग्धसाध्यधर्मत्वं पक्षत्वं ।

End of the Pakṣatā: यद्यपि पक्षत्वस्य केवलान्वयित्वान्न तस्य भेदकत्वं तथापि पक्षपदप्रवृत्तिनिमित्तमुक्तम् ।

Post Colophon: कालीचरणे शरणं ।

Beginning of the Parāmarśa: नुमितिप्रतिबन्धकमतोव्याप्याभेदज्ञानं तद्धेतुः सिद्धयतीतिचेन्न धूमत्वपुरस्कारेण व्याप्तिस्मरणपक्षधर्मज्ञाने सति विशेषदर्शनात् न धूमे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्याप्यभेदज्ञानं किन्त्वनुमितेरेव तत्रोत्पत्तिस्तत्सामग्रीसत्त्वादतो न व्याप्यभेदज्ञानमनुमिति-प्रतिबन्धकं

End of the Parāmarśa : तर्हि पर्वतीयधूमे नियतसाध्यसामानाधिकरण्यस्य व्याप्यत्वस्य भानं साध्यस्य सामानाधिकरण्या

विवरणम् : गङ्गेशोपाध्यायविरचितस्य तत्त्वचिन्तामणेरनुमानखण्डान्तर्गताविमौ निबन्धौ। अत्रानयोस्तावत् पक्षतानिबन्धः सम्पूर्णः, परामर्शनिबन्ध आद्यन्तविहीनश्च वर्तते। इमौ खलु पराचीनौ संवृत्तौ। मुद्रितावेतावनेकत्र।

954

406 पक्षता-माथुरीटीका।

Pakṣatā-māthurīṭīkā.

By Mathurānātha Tarkavāgīśa.

Substance : Country-made yellow paper. Size $18\frac{1}{2} \times 3\frac{1}{3}$ inches. Folia 2 (2a-3b). Neatly written in Bengali character. 7-9 lines in a page. Extent 80 ślokas. Appearance very old and torn. Prose. Generally correct. Incomplete at the beginning and at the end. Date n. d. printed.

Beginning : [२ (क) पृः] कारिकैवेति न क्वाप्यनुपपत्तिः। भट्टाचार्यास्तु सन्दिग्धः साध्यरूपोधर्मो यस्य पुरुषस्य तत्त्वमिति बहुव्रीहिः (।) धर्मपदञ्च स्वरूपकथनमात्रं तथाच समवायसम्बन्धेन साध्यसन्देहवत्त्वं पक्षत्वमित्यर्थः।

End : केचित्तु बाधकप्रमाणपदं यथोक्तबाधकद्वयपरमेव न चैवम...[३(ख) पृः]

विवरणम् : द्वितीयचिन्तामण्यन्तर्गतस्य पक्षताप्रकरणस्य टीकापरोऽयं निबन्धः। रचयिताऽस्य श्रीमान् मथुरानाथतर्कवागीशः। प्रारम्भ-समाप्तिरहितोऽयम्, अत्यन्त-पराचीनत्वाज्जीर्णत्वच्छिन्नत्वे समुपागतश्च। मुद्रणमस्य वारमेकं समजनि कलिकातास्थ 'एशियाटिक् सोसाइटि' समाख्यसमाजानुमोदितात् कुतश्चिन्मुद्रणयन्त्रालयात्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

955

817 पक्षता-माथुरी-टीका।

Pakṣatā Māthurī ṭīkā.

By Mathurānātha Tarkavāgīśa.

Substance: Country-made yellow paper. Size 18 × 3½ inches. Folia 6 (1a-6b). Neatly written in Bengali Character. 6-8 lines in a page. Extent about 252 ślokas. Appearance old. Prose. Generally correct. Incomplete at the end. Date n. d, Published.

There is a square blank space in the middle of each page.

Beginning: ...नुमान इति अकतृ(?)कत्वसाधने प्रतिहेतावजन्यत्व इत्यर्थः (।)... ...अत्रैव प्रसिद्धानुमान एव उद्यमिति पर्वतोवह्निमान् धूमादित्यादावुपाध्याभासत्वेनोह्य-मित्यर्थः ॥ सत्य(?)नुमानपरिच्छेदरहस्ये उपाधिवादरहस्यं ॥०॥ उपाधिं निरूप्य पक्षतां निरूपयितुं शिष्यावधानाय प्रतिजानीते व्याप्य(?)नन्तरमिति (।)

End: तदसत् सिद्धेरप्रतिबन्धकत्वे परामर्शनिष्ठाप्रामाण्यग्रहाभावस्य पृथगनुमिति-हेतुत्वमते सिद्धात्मा(?)कपरामर्शनिष्ठतत्तज्ज्ञानत्वधर्मितावच्छेदककाप्रामाण्यज्ञान (?)प्रसिद्धेः प्रति-बन्धकत्वे मानाभावः इति...[६(ख) हः]

विवरणम्: द्वितीयचिन्तामण्यन्तर्गतपक्षताप्रकरणस्य व्याख्यापरोऽयं निबन्धः। अस्य खलु निबन्धा तार्किकमूर्द्धन्यस्तर्कवागीशोपनामकः श्रीमान् मथुरानाथः। समाप्तिरहितस्यास्य प्रारम्भपत्रे प्रथमतउपाधिवादरहस्यस्यान्तिमांशोवर्तते। एतदीयप्रथमान्तिमपत्रयोर्मस्यपस्रिय-माणोपलभ्यते। प्रायः प्रत्येकमेव पत्राणां प्रान्तभागाः सलिलसमाश्लेषजचिह्न-सम्पृक्ताः परिदृश्यन्ते। व्याख्यांतुरस्य व्याख्यानं व्युत्पत्त्याधायकत्वेनानवद्यमित्यत्रास्त्यैक-मत्यं नैयायिकानाम्। प्राचीनतामुपागतोऽयम्। मुद्रणमस्य वारद्वयं समजनि "एशियाटिक सोसाइटिसमाख्यसमाजानुमोदित मुद्रणयन्त्रतः, जीवानन्दविद्यासागरीयमुद्रणयन्त्रतश्च।

956

1038 पक्षता माथुरी-टीका।

Pakṣatā Māthurī ṭīkā.

By Mathurānātha Tarkavāgīśa,

Substance: Country-made yellow and reddish paper. Size

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

18 × 4 inches. Folia 9 (1a-9b). Neatly written in Bengali character. 8-9 lines in a page. Extent about 325 ślokas. This is the same as our Cat. No. 955. Appearance old. Prose. Generally correct. Complete. Date n. d. Published.

There is a square blank space in the middle of each page.

Beginning : श्रीरामः। उपाधिं निरूप्य पक्षतां निरूपयितुं शिष्यावधानाय प्रतिजानीते व्याप्त्यनन्तरमिति ।

End : निर्विकल्पकव्यक्तेर्भवतामपि स्वीकारात् इत्यास्तां विस्तरः ॥०॥

Colophon : इति अनुमानरहस्ये पक्षतारहस्यं ॥०॥

Post Colophon : श्रीरामः।

विवरणम् : लिपिस्तावदस्य ग्रन्थस्य विनिर्मिता व्यक्तिद्वयेन । अन्तिमपत्रस्य (ख) पृष्ठायां मसीलोपोपक्रमोजातः ।

957

1441 पक्षता-माथुरी-टीका।

Pakṣatā-Māthurī-ṭīkā.

By Mathurānātha Tarkavāgiśa.

Substance: Counrry-made white paper. Size 19 × 3½ inches. Folia 9 (1a-9b). Neatly written in Bengali character. 6-8 lines in a page. Extent about 319 ślokas. This is the same as our cat No. 955. Appearance old, worm eaten and worn out. Prose. Generally correct. Condition not good. Complete. Date n.d. Published.

There is a square blank space in the middle of each page.

Beginning : श्रीदुर्गा। उपाधिं निरूप्य पक्षतां निरूपयितु शिष्यावधानाय प्रतिजानीते व्याप्त्यनन्तरमिति ।

End : निर्विकल्पकव्यक्तेर्भवतापि स्वीकारादित्यास्तां विस्तरः ॥०॥

Colophon : इति पक्षतारहस्यं।॥०॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विवरणम् : पराचीनत्वं जीर्णत्वञ्चसमुपागतोऽयं निबन्धः। अष्टमपत्रमेतदीयं कीट-दष्टम्। पत्राणामस्य वामपार्श्वभागाः सलिलसम्पर्कजचिह्नसम्पृक्ताः। लिपिरेतदीया तावद्व्यक्तिद्वयेन विनिर्मिता। क्वचित् क्वचित् क्षुद्राः टिप्पन्योवर्तन्ते। ९५५ सूची द्रष्टव्या।

958

1459 पक्षता-माथुरीटीका।

Pakṣatā-māthurīṭīkā.

By Mathurānātha Tarkavāgīśa.

Substance: Machine-made white paper. Size $19\frac{1}{3} \times 3\frac{1}{2}$ inches. Folia 2 (1b-9b). Neatly written in Bengali character. 7-9 lines in a page. Extent about 310 ślokas. This is the same as our previous cat No. 955. Appearance old. Prose. Generally correct. Ccomplete. Condition not good. Date not mentioned. Published.

There is a square blank space in the middle of each page.

Beginning : उपाधिं निरूप्य पक्षतां निरूपयितुं शिष्यावधानाय प्रतिजानीते व्याप्त्य-नन्तरमिति व्याप्तिनिरूपणान्तरमित्यर्थः।

End : निर्विकल्पकादिव्यक्तैर्भवतापि स्वीकारादित्यास्तां विस्तरः।

Colophon : इत्यनुमानपरिच्छेदरहस्ये पक्षतारहस्यं(?) ॥

Post Colophon : श्रीगुरवे नमः ॥ श्रीहरये नमः ॥

विवरणम् : अस्य प्रायः प्रतिपत्रमेवापस्त्रियमाणा मसी समुपलभ्यते। लिपिरेतदीया व्यक्तिद्वयेन विनिर्मितां। मुद्रितपुस्तकादत्र किञ्चित् पाठवैलक्षण्यं परिलक्ष्यते। ९५५ सूची द्रष्टव्या।

959

1457 पक्षता-माथुरीटीका।

Pakṣatā-māthurīṭīkā.

By Mathurānātha Tarkavāgīśa.

Substance : Country-made yellow paper. Size $18\frac{1}{2} \times 3\frac{1}{2}$ inches.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Folia 10(1b-10a). Neatly written in Bengali character. 6-8 lines in a page. Extent about 355 ślokas. This is another copy of our previous cat No. 955 already noticed. Appearance old. Prose. Generally correct. Complete. Condition good. Date not mentioned. Published.

There is a square blank space in the middle of each page.

Beginning : ॐ नमो गणेशाय। उपाधिं निरूप्य पक्षतां निरूपयितुं शिष्यावधानाय प्रतिजानीते व्याप्त्यनन्तरमिति। व्याप्तिनिरूपणान्तरमित्यर्थः।

End : निर्विकल्पकादिव्यक्तेर्भवतापि स्वीकारादित्यास्तां विस्तरः।

Colophon : इति पक्षतारहस्यं।

Post Colophon : किमिन्दुः किं पद्मं किमुमुकुरबिम्बं किमु मुखं, किमब्जे किं मीनौ किमु मदनबाणौ किमु दृशौ। कटौ वा गुच्छौ वा कनककलसौ वा किमु कुचौ तडिद् वा तारा वा कनकलतिका वा किमबला॥

विवरणम् : निबन्धोऽयं प्राचीनः। अस्य प्रायः प्रतिपत्रं प्रान्तभागाः सलिलसमासङ्गजचिह्नान्विताः। मुद्रितपुस्तकादस्य किञ्चित् पाठवैलक्षण्यमुपलभ्यते। ९५५ सूची द्रष्टव्या।

960

1458 पक्षता-माथुरीटीका।

Pakṣatā-māthurīṭīkā.

By Mathurānātha Tarkavāgīśa.

Substance: Country-made yellow paper. Size $18\frac{3}{4} \times 3\frac{1}{3}$ inches. Folia 8 (1a-8b). Neatly written in Bengali character. 7-9 lines in a page. Extent about 327 ślokas. Appearance old and worn out. Prose. Generally correct. Complete. Condition not good. Date not mentioned. Published.

There is a square blank space in the middle of each page.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Beginning : श्रीदुर्गायै नमः । उपाधिं निरूप्य पक्षधर्मतां चिरूपयितु शिष्यावधानाय प्रतिजानीते व्याप्त्यनन्तरमिति व्याप्तिनिरूपणान्तरमित्यर्थः ।

End : निर्विकल्पादिव्यक्तेर्भवतापि स्वीकारादित्यास्तां विस्तरः ।

Colophon : मणेः पक्षतायाः समाप्ता च(?) टीका ।

विवरणम् : पराचीनतां जीर्णताञ्च समुपागतोऽयम् । प्रतिपत्रमेवास्यापस्त्रियमाणा मस्युपलभ्यते । मुद्रितपुस्तकादत्र पाठभेदाः स्पष्टं परिलक्ष्यन्ते । ९५५ सूची द्रष्टव्या ।

961

1532 पक्षता-माथुरीटीका ।

Pakṣatā-māthurīṭīkā.

By Mathurānātha Tarkavāgīśa.

Substance : Country-made yellow paper. Size 16 × 3½ inches. Folia- 6 (1, 4-8). Neatly written in Bengali character. 7-8 lines in a page. Extent about 234 ślokas. Appearance old, torn and worn out. Prose. Generally correct. Incomplete at the middle Condition very bad. Date not mentioned. Published.

There is a square blank space in the middle of each page.

This is another copy of our previous cat no. 955 already noticed.

Beginning : उपाधिं निरूप्य पक्षधर्मतां निरूपयितु शिष्यावधानाय प्रतिजानीते व्याप्त्यनन्तरमिति ।

End : निर्विकल्पकादिव्यक्ते(?)भवतापि स्वीकारादित्यास्तां निरस्तः(?) ।

Colophon : इत्यनुमानपरिच्छेद(?) । पक्षतारहस्यं संपूर्णं ॥

Post Colophon : ॐ तारा जयति ।

विवरणम् : ग्रन्थोऽयं पराचीनश्छिन्नोजीर्णश्च संवृत्तः । २, ३ संख्यक पत्रद्वयमन्तरा न वर्तते । लिपिरस्य व्यक्तिद्वयेन रचिता । क्वचित् क्वचिदपस्त्रियमाणा मसी समुपलभ्यते । ९५५ सूची द्रष्टव्या ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

962

1701 पक्षता-माथुरीटीका ।

Pakṣatā-māthuriṭīkā.

By Mathurānātha Tarkavāgīśa.

Substance : Country-made yellow paper. Size $19 \times 4\frac{1}{4}$ inches. Folia 7 (1a-7b). Neatly written in Bengali character. 7-9 lines in a page. Extent 297 ślokas. Appearance old. Prose. Generally correct. Complete. Condition good. Date n. d. Published.

There is a square blank space in the middle of each page.

This is another copy of our previous cat no. 955 already noticed.

Beginning : [१ (क) पृः] ॐ नमो गणेशाय । उपाधिं तिरूप्य पक्षतां निरुपयितुं शिष्यावधानाय प्रतिजानीते व्याप्त्यनन्तरमिति ।

End : अनुमित्यनन्तरमनुमितिनिर्विकल्पकव्यक्तेस्तदनुव्यवसायव्यक्तेरेवोपनीतभानात्मि-काया उत्पत्तेरतिरिक्तकल्पनाभावात् निर्विकल्पादिव्यक्तेर्भवतापि स्वीकारादित्यास्तां विस्तर इति ।

Colophon : इति पक्षतारहस्यं ॥०॥

विवरणम् : ९५५ सूच्यामस्य विवरणमनुसन्धेयम् ।

963

1579 पक्षता-माथुरीटीका ।

Pakṣatā-māthurīṭīkā.

By Mathurānātha Tarkavāgīśa.

Substance: Country-made yellow paper. Size $13\frac{1}{4} \times 4$ inches. Folio 1. Neatly written in Bengali character. 6-8 lines in a page. Extent about 276 ślokas. Appearance old and worn out. Prose. Generally correct. Incomplete towards the beginning. Condition not good. Date not mentioned. Published.

There is a square blank space in the middle of each page.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

This is another copy of our previous cat no. 955 already noticed.

Beginning: [८ (क) पृः] अवच्छेदकाप्रामाण्यग्रहाभावानामपि पृथगेव हेतुत्वावश्यकतया न हा(?) गौरवापत्तेः ।

End: अनुमित्युत्तरानुमितिनिर्विकल्पकव्यक्तेरेवोपनीतभानात्मिकाया उत्पत्तेरतिरिक्तकल्पनादिव्यक्तेभावितापि(?)स्वीकारादित्यास्तां विस्तरः ॥०॥

Colophon: पक्षतासिद्धान्तरहस्यं ॥

Post Colophon: श्रीभवानीचरणे मम भक्तिरस्तु सदा ।

विवरणम्: ९५५ सूच्यामस्य विवरणमनुसन्धेयम् ।

964

697 पक्षता-माथुरी-पत्रिका ।

Pakṣatā Māthurī patrikā.

By Unknown author.

Substance: Country-made yellow paper. Size 16 × 3½ inches. Folio 1. Neatly written in Bengali character. 11 lines in a page. Extent about 40 ślokas. Appearance fair. Prose. Generally correct. Incomplete at the end.

The Ms. contains a dissertation on the commentary of Pakṣatā (text) by Mathurānātha. The author of their discourse is not known and it is rarely noticed and not printed in the Kroḍapatra-saṁgraha, Chss., Benaras. The present Ms. deals with only Prabhākára's views as refrected by Mathurānātha.

Beginning: पक्षतामूल माथुरी । यत्र सिषाधयिषा अनुमित्यात्मक सिद्ध(य ?)ात्मकपरामर्शः तत्र तदनुमितिव्यक्तेः पुनरुत्पादो दुर्वार इत्यस्य विवरणं ।

End: इन्द्रियादिनिष्ठजनकतानिरूपितप्रत्यक्षत्वावच्छिन्ननिष्ठजन्यतावच्छेदकीभूत यत् प्रत्यक्षत्वं तन्निष्ठावच्छेदकताकव्याप्यलौकिक-प्रत्यक्षनिष्ठकार्यता-निरूपितकारणताश्रयत्वात् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विवरणम् : अस्मिन् पुस्तके मथुरानाथकृतपक्षतामूलटीकाया उपरि काचित् पत्रिका अन्ते खण्डिता अद्याप्यमुद्रिता । प्रभाकरमतसमालोचनात्मिका दृश्यते । अत्र विषयादिविवरणं प्रागेवोक्तं तत्र द्रष्टव्यम् । अत्र ग्रन्थकारनाम नोपलभ्यते ।

965

1103 पक्षता-माथुरी-पत्रिका ।

Pakṣatā Māthuri patrikā.

By Mathurānātha Tarkavāgīśa.

Substance : Country-made yellow paper. Size 16 × 3¾ inches. Folia 5 (by counting). Neatly written in Bengali character. 4-10 lines in a page. Extent about 231 ślokas. Appearance old, torn and worn out. Prose. Generally correct. Complete. Condition bad. Date n. d. Unpublished.

There is a square blank space in the middle of each page.

Beginning : ॐ नमो गणेशाय । सिद्ध्युत्तरानुमितित्वस्य सिषाधयिषाकालीनसिद्ध्यसमानकालीनपरामर्शात् तादृशानुमित्यापत्तिरतस्तद्वारणाय तादृशानुमितावपि सिद्धेर्हेतुत्वं वाच्यं एवं सिद्ध्यनुत्तरानुमितौ सिद्ध्यभावस्य हेतुत्वं वाच्यं तेन सिद्ध्यात्मकपरामर्शात् सिषाधयिषाघटितसामान्यसामग्रीतोऽनुमितित्वावच्छिन्नस्य नापत्तिरिति ।

End : वह्निव्याप्यपर्वतीयेतरवह्न्यभाववान् धूमादित्यादौ यत्र पर्वतीयेतरवह्न्यभाववान् पर्वतोवह्निव्याप्यधूमवानित्याकारकपरामर्शानन्तरं अनुमितिद्वयं जायतामितीच्छा तत इतरबाधवलाद् वह्निव्याप्य पर्वतीयेतरवह्न्यभाववान् पर्वतोवह्निव्याप्यपर्वतीयवह्निमानित्याकारक(?) अनुमित्यात्मकपरामर्शस्तत्र तदनुमितिव्यक्तेः पुनरुत्पादप्रसङ्गः इति माथुर्यां . अत्र प्राभाकरा इति कल्पनाचेत्यादि ग्रन्थस्य परिष्कारः ॥

Post Colophon : ॐ नमः शिवाय नमः ॥ शशिवदनानां व्रजतरुणीनां।··· अधरसुधोर्मिं मधुरिपुरैच्छत् ॥

विवरणम् : अनुमानचिन्तामण्यन्तःपातिपक्षताप्रकरणीयाया माथुर्याः टीकाया उपरि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विनिर्मितोऽयं क्रोड़पत्रात्मकोनिबन्धः। निबन्धुर्नामात्र नोपलभ्यते। पक्षतामूलमाथुरीतः कतिपयस्थलान्याहृत्य तेषामुपरि युक्तिपूर्णेयं विवेचना कृता केनचन तार्किकवरेण। विचार-रीतिरस्य नैयायिकमनोमोदजनिका। ग्रन्थपरिष्कारप्रणाल्यपि नवीनतामाधत्ते। अयं प्राचीनश्छिन्नोजीर्णश्च संवृत्तः। पत्राण्यस्य विषमाणि वर्तन्ते। पत्रपार्श्वेषु पत्राङ्का यथारीति नावतिष्ठन्ते। प्रकाशनमस्य न जातम्।

966

551 पक्षता-माथुरी-वादार्थः।

Pakṣatā Māthurī-Vādārthah.

By Unknown author.

Substance: Country-made purple gray paper. Size $18\frac{1}{4} \times 3\frac{1}{4}$ inches. Folia 6 (1a-6b). Neatly written in Bengali character. 6-8 lines in a page. Extent about 247 ślokas. Appearance very old, torn and worn out. Prose. Generally correct. Complete. Date n. d. Unpublished.

Beginning: ॐ काली। पक्षतावच्छेदकाघटकसाध्यविषयताव्याप्येति। अत्र पक्षता-वच्छेदैका(?)घटकत्वं पक्षतावच्छेदकावच्छिन्नविशेष्यत्वावच्छिन्न - प्रतियोगिताकभेदप्रतियोगिता नवच्छेदकत्वं। अवच्छेदकत्वञ्च निरूपकत्वसम्बन्धावच्छिन्नं ग्राह्यं।

End: यद्यपि यत्रापेक्षात्मकतृतीयक्षण एव वह्न्यनुमितिस्तत्र उक्तपरामर्शादुत्पन्ना-नुमितेः पुनरुत्पादापत्तिभयेन उत्पत्तिसम्बन्धेन कारणत्वकल्पनस्यावश्यकतयाऽनुमितिर्नस्यात् तत्पूर्वं उत्पत्तिसम्बन्धेन परामर्शाभावात् तथापि उत्पत्तिसम्बन्धेन क्वचिदव्यवहितोत्तरत्व-सम्बन्धेनापि कारणत्वस्याविवक्षणीयत्वान्न दोषः इति सुधिभिरालोचनीयं॥

विवरणम्: अनुमानचिन्तामण्यन्तर्गतपक्षताप्रकरणस्य माथुर्याष्टीकाया उपरि विनिर्मि-तोऽयं वादार्थपरोनिबन्धः। अस्य विनिर्मातुर्नामात्र नोपलभ्यते। पक्षतामाथुरीतः कतिपयस्थलान्युपजीव्य तदुपरि नातिविस्तृतं वादार्थं रचयाञ्चकार कश्चन नैयायिकः। अत्र विचारचातुर्यपि काचिदास्ते। तत्रत्यपत्राणां प्रायः सर्वेषामेव पार्श्वभागा वर्तन्ते टिप्पनी-सम्पृक्ताः। अत्यन्तप्राचीनत्वादयं जीर्णत्वं समुपागतः। प्रतिपत्रमेव मसीलेपोपक्रमः संवृत्तः। अमुद्रितोऽयम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

967

640 पक्षता-माथुरी-वादार्थः ।

Pakṣatā Māthurī vādārthaḥ.

By Unknown Author.

Substance : Country-made yellow paper. Size $17 \times 3\frac{1}{4}$ inches. Folio 1. Neatly written in Bengali character. 9 lines in a page. Extent about 54 ślokas. Appearance fair. Prose. Generally correct. Incomplete at the end.

The Ms. contains a dissertation on Mathurānātha's commentary of Pakṣatā, by an unknown author, rarely noticed and not printed in Kroḍapatra saṁgraha, Chss., Benaras. The Ms. ends abruptly.

Beginning : कारणकारणतावच्छेदकसाधारणप्रयोजकत्वञ्च कारणतावच्छेदक व्यावृत्तान्यथासिद्धिचतुष्टयराहित्ये सति नियतपूर्ववर्त्तित्वं ।

End : वस्तुतस्तु वह्न्यभावसाध्यकस्थले पर्वतो वह्निमान्नवेति संशयसंग्रहाय व्याप्यत्वनिवेशः, अन्यथा पर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्नित्वावच्छिन्नप्रकारताकज्ञानत्वावच्छिन्न

विवरणम् : अस्मिन् पुस्तके मथुरानाथकृतपक्षताटीकाया उपरि कश्चिद् वादार्थोऽन्ते खण्डितोऽप्यमुद्रितो दृश्यते । अत्र ग्रन्थकारनाम नास्ति । विषयादिविवरणं प्रागेवोक्तं तत्र द्रष्टव्यम् ।

968

684 पक्षता वादार्थः ।

Pakṣatā Vādārthaḥ.

By Unknown author.

Substance : Country-made yellow paper. Size $14\frac{1}{2} \times 2\frac{1}{2}$ inches. Folio 1. Neatly written in Bengali character. 8 lines in a page. Extent about 36 ślokas. Appearance fair. Prose. Generally correct. Complete.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

The Ms. contains a dissertation on, Pakṣatā section of T.C. Pt. II. by an unknown author. It is rarely noticed and not printed.

Beginning : अथ मिश्रमते स्वप्रागभावविरहविशिष्टत्वविषयसिद्धिप्रागभावरूपाया इच्छायोग्यताया विवक्षणेपि यत्रानुमित्सासिद्धियात्मकपरामर्शानुमितयः, तत्र पुनरनुमित्युत्पत्त्या तादृश प्रागभावकूटरूपमिच्छायोग्यत्वमुक्तं ।

End : न च सिद्धयात्मकपरामोंत्तरमनुमितेरापत्तिः प्रकृतग्रन्थेऽनुसन्धानीयेति न काप्यनुपपत्तिरित्यपि विभावनीयं ।

Post Colophon : श्रीहरिनाथदेवशर्मणा लिखितमेतत् ।

विवरणम् : अस्मिन् पुस्तके पक्षतावादार्थः अज्ञातनामधेयस्य कस्यचित् दृश्यते । हरिनाथशर्मणा केन चित् लिखितमिदं पुस्तकम् । मन्ये, अयं हरिनाथो नवद्वीपवास्तव्यो हरिनाथतर्कसिद्धान्तः शक्तिवादादिटीकाकार एवेति । ग्रन्थोऽयं नाद्यापि मुद्रित इति । अत्र विषयादिविवरणं प्रागेवोक्तं तत्र द्रष्टव्यम् ।

This Harinātha might have been Harinātha Tarkasiddhānta of Navadvip (Bengal) who flourished during the last century and with commentaries on Śaktivāda and many other proses on Nyāya.

969

1501 पक्षतामूलम् ।

Pakṣatāmūlam

By Gaṅgeśopādhyāya.

Substance : Country-made yellow paper. Size $15\frac{1}{2} \times 3\frac{1}{4}$ inches. Folio 1 (by counting)- Neatly written in Bengali character. 6 lines in a page. Extent about 11 ślokas. Appearance old. Prose. Generally correct. Incomplete at the end. Condition good. Date not mentioned. Available in print.

There is a square blank space in the middle of each page.

Beginning : ॐ नमोमहादेवाय । व्याप्त्यनन्तरं पक्षधर्मता निरूप्यते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

End : अतएव प्रत्यक्षपरिकलितमप्यर्थमनुमानेन बुभुत्सन्ते तर्करसिकाः, न हि करिणि दृष्टे चीत्कारेण तमनुमिमतेऽनुमातारः इति वाचस्पतिवचनयोरविरोधः।

विवरणम् : अनुमानचिन्तामण्यन्तर्गतपक्षताप्रकरणात्मकोऽयं निबन्धः। समाप्तिरहितेऽत्र सन्दिग्धसाध्यधर्मत्वरूपपक्षत्वस्य सिषाधयिषात्मकपक्षत्वस्य च भावगम्भीरं निर्वचनमात्रमवतिष्ठते। अयं पराचीनः। प्रकाशनमस्य बहुशः समजनि।

970

998 पक्षतारहस्यम्।

Pakṣatārahasyam.

By Śrī Krisṇa Sārvabhauma Bhaṭṭācārya.

Substance : Country-made yellow paper. Size $19\frac{3}{4} \times 3\frac{1}{2}$ inches. Folia 4 (97b-100b). Neatly written in Bengali character· 8-10 lines in a page. Extent about 192 ślokas. Appearance old and worn out. Prose, Generally correct. Complete. Date n.d. Unpublished.

There is a square blank space in the middle of each page.

Beginning : अनुमितिरूपैककार्यप्रजोजकत्वसङ्गत्या व्याप्तिनिरूपणानन्तरं पक्षतां निरूपयति व्याप्तीति व्याप्त्यनन्तरं व्याप्तिनिरूपणानन्तरं पक्षधर्मतेति पक्षतेत्यर्थः।

End : केचित्तु पक्षपदप्रवृत्तेरनुमित्युपात्तनिमित्तं कारणमित्यर्थः (।) तथाच नेदमितरभेदसाधकमपितु कारणमितिभाव इत्याहुः।

Colophon : इति पक्षतारहस्यम्॥

विवरणम् : अनुमानचिन्तामण्यन्तःपातिपक्षताप्रकरणस्य टीकापरोऽयं निबन्धः। अस्य खलु रचयिता श्रीश्रीकृष्णसार्वभौमभट्टाचार्यः। पक्षता नामानुमितिकारणम्, तत्र च सन्दिग्धसाध्यधर्मत्वरूपमेव पक्षतालक्षणमाहुः केचन प्राचीननैयायिकाः। नवीनास्तु सिषाधयिषाविरहसहकृतसाधकमानाभावस्यैव पक्षतात्वं व्याचचक्षिरे। अत्र संशयपक्षतावादिसम्मतलक्षणस्यैव व्याख्या नातिहस्वोपलभ्यते। नवीनसम्मतलक्षणस्य व्याख्या तावदतिहस्वैव परिलक्ष्यते। वस्तुतस्तु व्याख्यानमेतदीयमतिसंक्षिप्तमपि न बोधसौकर्यं सर्वथा प्रति-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

